
1. — उद्योगपर्व

2. — स्त्री पर्व







१२२

सभापर्व २

स० टी०

प २

श्रीगणेशायनमः बीजांकुरद्रुमसमेस्वरसत्त्वविश्वान्मोहाय्यचिंतयतयूपमभेदबुद्ध्या हास्मायवीजशतगर्भफलाभमेकं गोपालमेवकलयामजगन्निदानं
१ जीवन्मुनिः स्वपरस्वरूप[illegible]यत्रभजापरधियाशिवमार्गयाता संतुष्टरूपविधिभिरसंगविनावयोस्ताः तस्मिन्नमास्करणिरात्मनिलक्षणाणां २ प्रणम्यनारायणा
तीर्थवर्यान्धीरीशामिश्रश्रद्धमीरप्युर्यारः प्राचांगुरूणांहृदयानुरूपंक्रमेः समापर्वणिभावदीपं ३ तत्रपूर्वस्मिन्पर्वणिश्रीशांड्रिकाः ज्ञानबलादेववद्धिमुखा
दिमुक्ताःसुक्तत्वज्ञानंभगवद्भक्तिबलादेवलभ्यतइतिप्रतिपादनीयंहसभापर्वव्याख्यास्यते तत्रभक्तावपिकस्युत्पादनार्थभक्तिबलेनैवपांडवानांदिग्विजयसभाला

नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ वैशंपा[illegible]उवाच ततोब्रवीन्मयः पा
र्थंवासुदेवस्यसन्निधौप्रांजलिः श्लक्ष्णयावाचापूजयित्वापुनः पुनः २ मयउवाच अस्मात्कृष्णात्सुसंक्रुद्धात्पावका
त्परिरक्षितः त्वयात्रातोस्मिकौंतेयब्रूहिकिंकरवाणिते ३ ॥ ३ ३

मोयेश्वर्येद्वेषेणापिभगवद्ध्यानंभगवत्सायुज्यप्रापकमितिशिशुपालनिर्याणेनध्यानमाहात्म्यंनिरूपणीयंअपिपांडवेषुअभक्तानांदुर्योधनादीनांद्वेषोस्मा
३ भक्तेर्दोषाः ध्वनितेझोपदीप्त्रारोणनभगवतोभक्तपक्षपातित्वंसमर्थानामपिपांडवानांसापराधेष्वपिदुर्योधनादिषुअप्रकोपेनभक्तानांतितिक्षाचेतिभक्तानु
रागादर्शिताः। तत्रउपकर्तृप्रत्युपकारोवश्यंकर्तव्यइत्येतद्दर्शयितुंपांडवार्थंमंडपनवद्धितोमोचितेनअभूतपूर्वासभाकृतेतितावदर्शयते। ततोब्रवीन्म
यः पार्थमित्यादिना २ सोऽववदाहेकस्मात्चक्रेणजिघांसतः ३

रा०म०
१

४ ५ विश्वंकर्मेकृतिसाध्यंयस्यसविश्वकर्मा महाकविः शिल्पपंडितः। स्वंगतेनमस्तुपकारार्थंप्राप्तोलिपिमति ७ संदध्यौविचारितवान् १० हेदेवेतेपहेदानव। ११
१२ असुरान्मानुषानिसुपलक्षणांदेवगंधर्वादीनामप्यभिप्रायानलेपचित्रेलेख्यचित्रेचचतुर्दशभुवनांतरस्थतत्रज्ञानीयस्वाभाविकनानाविधलीलाप्रदर्श्यो।

अर्ज्जुनउवाच कृतमेवत्वयासर्वंस्वस्तिगच्छमहासुर प्रीतिमान्भवमेनित्यंप्रीतिमंतोवयंचते ४ मयउवाच युक्तमेतत्वयिविभोयथात्थपुरु
षर्षभ प्रीतिपूर्वमहंकिंचित्कर्तुमिच्छामिभारत ५ अहंहिविश्वकर्मावैदानवानांमहाकविः सोहंवैत्वत्कृतेकर्तुंकिंचिदिच्छामिपांडव ६
अर्ज्जुनउवाच प्राणकृच्छ्राद्विमुक्तंत्वमात्मानंमन्यसेमया एवंगतेनशक्ष्यामिकिंचित्कारयितुंत्वया ७ नचापितवसंकल्पंमोघमिच्छामि
दानव कृष्णस्यक्रियतांकिंचित्तथाप्रतिकृतंमयि ८ चोदितोवासुदेवस्तुमयेनभरतर्षभ मुहूर्त्तमिवसंदध्यौकिमयंचोद्यतामिति ९
ततोविचिंत्यमनसालोकनाथः प्रजापतिः चोदयामासतंकृष्णः सभावैक्रियतामिति १० यदित्वंकर्त्तुकामोसिप्रियंशिल्पवतांवर
धर्म्मराजस्यदैतेययादृशीमिहमन्यसे ११ यांकृतांनानुकुर्वंतिमानवाःप्रेक्ष्यविष्ठिताः मनुष्यलोकेसकलेतादृशींकुरुवैसभां १२
यत्रदिव्यानभिप्रायान्पश्येमहिकृतांस्त्वया आसुरान्मानुषांश्चैवसभांतांकुरुवैमय १३ वैशं[illegible]यनउवाच प्रतिगृह्यतुतद्वाक्यंसंप्र
हृष्टोमयस्तदा विमानप्रतिमांचक्रेपांडवस्यशुभांसभां १४ ततः कृष्णश्चपार्थश्चधर्म्मराजेयुधिष्ठिरे सर्वमेतत्समावेद्यदर्शयामास
तुर्म्मयं १५ तस्मैयुधिष्ठिरः पूजांयथार्हमकरोत्तदा सतुतांप्रतिजग्राहमयः सत्कृत्यभारत॥ १६ ॥ ॥

नेनमेनोवृत्तीः पश्येमयदृशे[illegible]ह्यांउंतरवंत्रिसर्वेवस्तुनातंदृष्टप्रायंभवतीत्यर्थः १३ विमानप्रतिमेतिनाम विमानसदृशीवा १४ १५ १६

पूर्वदेवो हृषयवोदानवः तस्यचरितं विदुसङ्गोसयज्ञकरणादि १७ आश्रवस्यस्वस्थविन्नोभूत्वा मयक्रमेआरचवान् १८ १९ २० किङ्करैस्तः।सर्वतः चतुर्दिक्षु
२१ सभापर्वभावदीपेऽध्यायः प्रथमः २५ अर्थ्यमर्थ्यादनपेतं तथ्यंसत्यं लघुस्वल्पाक्षरं गुरुकंयुक्तिमत् अनन्तरमेवानुत्तरं पूर्वपक्षवदसमाख्येयं तथ्यप

सपूर्वदेवचरितं तत्तदा तत्रविशांपते कथयामासदैत्येयः पाण्डुपुत्रेषुभारत १७ सकालंकंचिदाश्वस्य विश्वकर्माविचिंत्यतु सभांप्रचक्रमेकर्त्तुंपा
ण्डवानांमहात्मनां १८ अभिप्रायेणपार्थानां कृष्णस्यचमहात्मनः पुण्येऽहनि महातेजाः कृतकौतुकमङ्गलः १९ तर्पयित्वाद्विजश्रेष्ठान्
पायसेनसहस्रशः धनंबहुविधंदत्वातेभ्यएवचवीर्य्यवान् २० सर्वर्त्तुगुणसंपन्नांदिव्यरूपांमनोरमां दशकिष्कुसहस्रांतांमापयामास
सर्वतः २१ इतिमहाभारतेसभापर्वणिप्रथमोध्यायः वैशंपायन उवाच उषित्वाखाण्डवप्रस्थेसुख वासंजनार्दनः पार्थैः प्रीति
समायुक्तैः पूजनार्होभिपूजितः १ गमनायमतिंचक्रेपितुर्दर्शनलालसः धर्म्मराजमथामंत्र्य पृथांचपृथुलोचनः २ ववंदेचर
णौमूर्ध्नाजगद्वंद्यः पितृष्वसुः सतयामूर्ध्न्युपाघ्रातः परिष्वक्तश्चकेशवः ३ ददर्शानन्तरंकृष्णोभगिनींस्वांमहायशाः तामुपेत्यहृषीके
शः प्रीत्याबाष्पसमन्वितः ४ अर्थ्यंतथ्यंहितंवाक्यंलघुयुक्तमनुत्तरं उवाचभगवान्भद्रांसुभद्रांभद्रभाषिणीं ५ तयास्वजनगा
मीनिश्राविताविचनानिसंपूजितश्चाप्यसकृत्शिरसाचाभिवादितः ६ तामनुज्ञाप्यवार्ष्णेयः प्रतिनंद्यचभामिनीं ददर्शानन्तरंकृष्णो
धौम्यंचापिजनार्दनः ७ ॥ ॥

ब१

र्थ्यंहितंवाक्यंगुरुस्वल्पाक्षरंमृदु इतिपाठेअर्थ्यंसन्मार्गादनपेतंगुरुवद्धार्थ्यं ५ स्वजनगामीनिपाठेमात्रादिषुस्वबांधवेषुकुशलसंदेशरूपाणि ६ भामि
नींदीप्तिमतीं भाविनीमितिपाठेसद्भावयुक्तां ७

वंवेदैचेतिपुरुषसत्तमः पुरुषेषुअन्नमयप्राणमयमनोमयविज्ञानमयानंदमयेषुपंचसुआद्योव्यवहारः नसत्सः उत्तरोत्तरेषांतुपूर्वपूर्वाधिष्ठानत्वात्तत्तदपेक्षया
सत्सत्तरत्वंपुरुषंब्रह्मतुसर्वेषामधिष्ठानभूतंमोक्षप्यवाच्यत्वात्सत्तमः ननुकथंसत्तमेब्रह्मस्थूलमनणुनिष्कलंनिष्क्रियंशांतमित्यादिश्रुतेः सर्वविशेषशून्येनाम
रूपवंदनादिक्रियायोगोनवेंदेनेतिचेत्अत्रउच्यते कौलिकप्रतिमाद्वारांचैत्रेभोगइवेशना असंगेभूम्निजीवोपाधिकल्पितोपाधियोगतः अनादौसंसारेजीवेश्वरविभाग
गस्याप्यनादित्वात्रज्वांभुजंगइवजीवोपाधस्याविद्यायामुष्टेपिचिदात्मनिईशसत्त्वादिकंकल्पितं इदमेवब्रह्मणः शरीरमिति यथाकौलिकः प्रतिमांकृत्वाइदमेवचैत्र
त्रस्यशरीरमितिभावयति तद्वत् यथाचप्रतिमाद्वाराचैत्रस्यभोगोभवेत्संवेद्यमुद्रायामपिचितिजीवोपाधिकल्पितोपाधिद्वाराईशनादिकंभवति एतावांस्तुविशेषः

वंवेद्यथात्मायंधीमान्पुरुषसत्तमः ज्ञोपदिष्टंसांत्वयित्वाचआत्मानंच
जनार्दनः ८ ॥

जीवस्यस्वाविद्याकल्पितंशरीरंतत्रस्तीतिप्रतिमानिमित्तकोपिभोगः स्वदेहावच्छेदेनैवजायतेनप्रतिमावच्छेदेन चित्तस्तुतद्भावादिसुखाद्यपरकल्पितोपाध्य
वच्छेदेनैवनियंतृत्वादिकंभवति तच्चाकर्मजत्वाच्चितोनसंसृज्यतेयथाजीवेभोगः यथावाकल्पितसर्पगतंभीषणत्वंरज्वां एवंचव्यवहारतः संसारस्या
स्याद्यंतस्वरूपत्वात्तत्कारणीभूतस्यईशस्यशरीरंपितथात्वंवक्तव्यं किमुतईशादिकारणीभूतायाः सूक्ष्ममूर्तेः तथाहि वीजांकुरतरूपमेषुईशसूत्र
विराट्सुअनंतवीजगर्भफलोपमः श्रीकृष्णः अनंतकोटिब्रह्मांडनायकइतिप्रसिद्धं अयमेवश्रीमत्शंकरभगवत्पादैवेंदांतसारेवनवृक्षदृष्टां
तेनसमष्टिव्यष्टिरूपेणस्थूलसूक्ष्मकारणानिप्रतिपाद्यसमष्टिवनदृष्टांतेनप्रतिपादितः शास्त्रेपिअंतस्तदुर्मोपदेशादित्सूत्रयएषोंतरादित्येहिरण्मयः
पुरुषोदृश्यतेहिरण्यश्मश्रुर्हिरण्यकेशआप्रणखात्सर्वएवसुवर्णस्तस्यपथाकप्या

संपुंडरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति नामरूपवंतं आदित्यमंडलांतर्वर्तिनं नारा।
यणमुदाहृत्य तस्य ऋक्साम चैवगेष्णाविति नारायणस्य कृत्स्नप्रपंचात्मकत्वमुक्तं इमे अंगुलिपर्वणी इत्युक्तं ततोऽनंतकोटिब्रह्मांडस्याप्यलंकृत्याकृतिर्ब्रह्मणो
युज्यते अयमेव नंदनंदनो नाम महामायावी सुप्तिप्रलये कैवल्येषु कर्म्मोपरमे स निजं जगदिदं जालं स्वमूर्त्तौ संहृत्य निरोधायापास्तसमस्तविशेषं ब्रह्मात्मानं प्रापय।
ति कर्म्मशेषसत्त्वे पुनरुद्भावयति च ततश्चास्य स्वाविद्याभावादसंगत्वं पराविद्याकल्पितोपाधिसंवेशोऽस्मिन्मायाभोजकत्ववत् नियंतृत्वमप्यविद्याया
श्चाधीतत्वस्य त्वात् तन्निमित्तत्वेचेति सिद्धं ततश्चासंगत्वाद्युक्तमस्य पुरुषस्य न्नमत्वं जनगमयितृत्वरूपजनार्दनत्वेन नियंतृत्वं नियंतृत्वाद्देवत्वं उत्सीदेयुरिमे लोका न
कुर्यां कर्म्म चेदहमिति वक्ष्यमाणरीत्या जनशिक्षार्थं धौम्यवंदनेन वैदिकमर्यादापरिपालकत्वं ह्योपदीमालेनेन च सुहृद्दनुग्राहत्वं चेत्यादि सर्वं समंज
सं। अयमेवार्थो मंगलश्लोकाभ्यामस्माभिः संगृहीतो नमस्मत्त्रेभ्यः ~ ॥ ॥ ॥ ॥ ॥

भ्रातृनपितृश्वसुःपुत्रान् ९ ११ तस्यकर्णास्थितिमतांवरःसनातनस्समर्थः १२ १६ अभीषून्रथाश्वरश्मीन् १७ १८ सुपीडितंगाढंयथाभवतितथा

भ्रातृनभ्यगमद्धिद्वानपार्थेनसहितोवली भ्रातृभिःपंचभिःकृष्णोवृतःशक्रइवामरैः ९ यात्राकालस्ययोग्यानिकर्माणिगरुडध्वजः कर्त्तुकामःशुचिर्भूत्वास्नातवान्समलंकृतः अर्चयामासदेवांश्चद्विजांश्चयदुपुंगवः माल्यजाप्यनमस्कारैर्गंधैरुच्चावचैरपि ११ सकृत्वासर्वकार्याणिप्रतस्थेतस्थुषांवरः उपेत्यसयदुश्रेष्ठोवाह्यकक्षाद्विनिर्गतः १२ स्वस्तिवाच्यार्हतोविप्रान्दधिपात्रफलाक्षतैः वसुप्रदायचततःप्रदक्षिणमथाकरोत् १३ कांचनंरथमास्थायतार्क्ष्यकेतनमाशुगं गदाचक्रासिशार्ङ्गाद्यैरायुधैरावृतंशुभं १४ तिथावथचनक्षत्रेमुहूर्त्तेचगुणान्विते प्रययौपुंडरीकाक्षःशैब्यसुग्रीववाहनः १५ अन्वारुरोहचाप्येनंप्रेम्णाराजायुधिष्ठिरः अपास्यचास्यंतारंदारुकंपत्तसत्तमं १६ अभीषून्सप्रजग्राहस्वयंकुरुपतिस्तदा उपारुह्यार्जुनश्चापिचामरव्यजनंसितं १७ रुक्मदंडंवृहद्भूर्द्धिविदुधावप्रदक्षिणं तथैवभीमसेनोपियमाभ्यांसहितोवली १८ पृष्ठतोनुययौकृष्णमृत्विक्पौरजनैःसह सतथा भ्रातृभिःसर्वैःकेशवःपरवीरहा १९ अवीपमानःशुशुभेशिष्यैरिवगुरुःप्रियैः पार्थमामंत्र्यगोविंदःपरिष्वज्यसुपीडितं २०

२१

भवतितथापरिष्वज्य। २० २१ २१ २१ २१

२४ संविदं पुनरेष्यामीति निश्चयं कृत्वा २५ लोचनैरिति स्वैर्वैद्रियाग्रास्यमपि परमात्मानं प्रथमं प्रतिमा रिरसुः संचिंत्य मनोभिरिति पश्चा इति मांस्पृक्तामनसैव चिंत
तेयत्तरस्तु क्रं २७ मनसो तल्पे शौरिर्मानसमग्निस्तेर्पांतर्दधे अत एव तेऽकामाः निर्विकल्पसमाधिस्थाः यदा सर्वेषमनु संते कामा ये स्य हृदि श्रिताः अथ मर्त्यो मृतो

युधिष्ठिरं स्वजीयित्वा भीमसेनं यमौ तथा परिष्वक्तोर्जुनेनाथ यमाभ्यामभिवादितः २१ योजनार्द्धमथो गत्वा कृष्णः परपुरंजयः युधिष्ठि
रं समामंत्र्य निवर्त्तस्वेति भारत २२ ततोभिवाद्य गोविंदः पादौ जग्राह धर्म्मवित् उत्थाप्य धर्म्मराजस्तु मूर्द्ध्न्युपाघ्राय केशवं २३
पांडवो यादवश्रेष्ठं कृष्णं कमललोचनं गम्यतामित्यनुज्ञाप्य धर्म्मराजो युधिष्ठिरः २४ ततस्तैः संविदं कृत्वा यथावन्मधुसूदनः निव
र्त्त्य च तथा कृच्छ्रात् पांडवान् सपदानुगान् २५ स्वां पुरीं प्रययौ हृष्टो यथा शक्रोमरावतीं लोचनैरनुजग्मुस्ते तमा दृष्टिपथात्तदा २६
मनोभिरनुजग्मुस्ते कृष्णं प्रीतिसमन्वयात् अतृप्तमनसामेव तेषां केशवदर्शने २७ क्षिप्रमंतर्दधे शौरिश्चक्षुषां प्रियदर्शनः
अकामा एव पार्थास्ते गोविंदगतमानसाः २८ निवृत्योपययुर्हृष्टाः स्वपुरं पुरुषर्षभाः स्यंदनेनाथ कृष्णोपि त्वरितं द्वारकामगा
त् २९ सात्वतेन च वीरेण पृष्ठतो याथिनां तदा दारुकेण च सूतेन सहितो देवकीसुतः स गतो द्वारकां विष्णुर्गरुत्मानिव वेगवा
न् ३०

भवत्यत्र ब्रह्म समश्नुत इति श्रुतेः यतो गोविंदे निर्विकल्पब्रह्मणि गतं लीनं मानसं येषां ते तथाभूताः २८ निवृत्येति समाधिसुखानुभवानंतरं व्युत्थानं ध्वनितं २९
स गत इति पक्षिगत्या शीघ्रगमनशीलः गमेः अन्येभ्योपि दृश्यंत इति क्विप् अनुदात्तोपदेशेति अनुनासिकलोपे ह्रस्वस्येति तुगागमः ३० ३०

स

३६ अध्यायः २ १ २ भांडमिवभांडंमूल्यवंनंविचित्रंगोपाहानइवंकृतंहिंगुलादिवन्निर्मितंमणिमयंमणिप्रचुरंयेनकृत्रिममयूरादीनांचद्रकलोचनादि

वैशंपायनउवाच निवसन्धर्मराजस्तुसहभ्रातृभिरच्युतः सुहृत्सीरिवृतोराजाप्रविवेशपुरोत्तमं ३१ विसृज्यसुहृदः सर्वान्भ्रातृंश्च
पुत्रांश्चधर्मराट् मुमोदपुरुषव्याघ्रोद्रोपद्यासहितोनृपः ३२ वैशंपायनउवाच केशवोपिमुदायुक्तः प्रविवेशपुरोत्तमं पूज्य
मानोयदुश्रेष्ठैरुग्रसेनमुखैस्तथा ३३ आहुकंपितरंवृद्धंमातरंचयशस्विनीं अभिवाद्यबलंचैवस्थितः कमललोचनः ३४
प्रद्युम्नसांबनिशठांश्चारुदेष्णगदंस्तथा अनिरुद्धंचभानुंचपरिष्वज्यजनार्दनः ३५ सवृद्धैरभ्यनुज्ञातोरुक्मिण्याभवनंययौ।
मयोपिसुमहाभागः सर्वरत्नविभूषितां विधिवत्कल्पयामाससभांधर्मसुतायवै ३६ इतिश्रीमहाभारतेसभापर्वणि ॥ वै।
शंपायनउवाच अथाब्रवीन्मयः पार्थमर्जुनंजयतांवरं आपृच्छेत्वांगमिष्यामिपुनरेष्यामिचाप्यहं १ उत्तरेणतुकैलासं।
मैनाकंपर्वतंप्रति यियक्षमाणेषुपुरादानवेषुमयाकृतं २ चित्रंमणिमयंभांडंरम्यंबिंदुसरः प्रति सभायांसत्यसंधस्ययदासी
द्वृषपर्वणः ३ आगमिष्यामितद्गृह्ययदितिष्ठतिभारत ततः सभांकरिष्यामिपांडवस्ययशस्विनः ४ मनः प्रह्लादि
नींचित्रांसर्वरत्नविभूषितां अस्तिबिंदुसरस्युग्रागदाचकुरुनंदन ५ ॥ ॥

निक्रियंते ३ ४ ५ ५ ५ ५

स॰टी॰

राज्ञा वृषपर्वणा निहिता सा रत्नानीमय्यः स्तीति भावयामीति योज्यं ततो वा भीमसेनं विना तद्धमनयोग्यस्य पुंसोऽज्ञातत्वादिति भावः भारसहा गदा तत्रेणासन्नि-
पातेन संभविताल्पा यतो दृढा ६ सा वै शतसहस्रस्य लक्षसंख्यगदालक्षेण तुल्येत्यर्थः स्वर्णभारसहस्रस्येति पाठे तु तुलापलशतं प्राहुर्भारः स्याद्विंशतिस्तुलेति

निहितां भावयाम्येवं राज्ञा हत्वा रणे रिपून् सुवर्णबिंदुभिश्चित्रा गुर्वी भारसहा दृढा ६ सा वै शतसहस्रस्य सम्मिता शत्रुघातिनी अ-
नुरूपा च भीमस्य गांडीवं भवतो यथा ७ वारुणश्च महाशंखो देवदत्तः सुघोषवान् सर्वमेतत्प्रदास्यामि भवते नात्र संशयः ८
इत्युक्त्वा सोऽसुरः पार्थं प्रागुदीचीं दिशं गतः अथोत्तरेण कैलासान्मैनाकं पर्वतं प्रति ९ हिरण्यशृंगः सुमहान्महामणिमयो
गिरिः रम्यं बिंदुसरो नाम यत्र राजा भगीरथः १० दृष्ट्वा भागीरथीं गंगामुवास बहुलाः समाः यत्रेष्टं सर्वभूतानामीश्वरेण महा-
त्मना ११ आहृताः क्रतवो मुख्याः शतं भरतसत्तम यत्र यूपा मणिमयाश्चैत्याश्चापि हिरण्मयाः १२ शोभार्थं विहितास्त-
त्र न तु दृष्टांततः कृताः यत्रेष्ट्वा स गतः सिद्धिं सहस्राक्षः शचीपतिः १३ यत्र भूतपतिः सृष्ट्वा सर्वांल्लोकान्सनातनः उपास्य-
ते तिग्मतेजाः स्थितो भूतैः सहस्रशः १४ ॥

स्तुलेति शास्त्रोक्तमानेन गुर्वीत्यर्थः ७ ८ प्रागुदीचीमैशानीं उत्तरेण उत्तरतः ९ हिरण्यशृंगो मैनाकावयवभूतो गिरिः १० ईश्वरेण प्रजापतिना ११
१२ दृष्टांततः शास्त्रसिद्धान्ततः १३ भूतपतिर्महादेवः सृष्ट्वा सृष्टिकर्त्ता। अत्रापि गलेति वक्तव्ये निपू १४ ॥ ॥

१५ शिष्टसंप्रतिपत्तयेइतिपाठेपिशिष्टानधर्मानुष्ठानेप्रवर्त्तयितुमित्यर्थः॥ १६ १७ स्फाटिकंस्फटिकरत्नपलक्षणंनानारत्नमयंसितसारंगपिशंगादिवर्णा
नामद्रव्याणांनांचूर्णानियथापेक्षितमिश्राणिसुकषायवत्तमसृणजपारागदिमंजनफलवर्णाद्यवांतरमिश्ररंगरचनार्थंवृषपर्वयोगेसभार्थंसंपादितंतत्रोपयु
क्तावशिष्टंआनीतवानित्यर्थः १८ किंकरैः रक्षसांजातिविशेषैः १९ २४ दिव्यादिव्येनवचसाअलौकिकेनलौकिकेनचतेजसानवमेघप्रती

नरनारायणौब्रह्मायमः स्थाणुश्चपंचमः उपासतेयत्रसत्रंसहस्रयुगपर्यये १५ यत्रेष्टंवासुदेवेनसत्रैर्वर्षगणाननुवहून् श्र
द्दधानेनसततंधर्मसंप्रतिपत्तये १६ सुवर्णमालिनोयूपाश्चैत्याश्चाप्यतिभास्वराः ददौयत्रसहस्राणिप्रयुतानिचकेशवः
१७ तत्रगत्वासजग्राहगदांशंखंचभारत स्फाटिकंचसभाद्रव्यंयदासीद्वृषपर्वणः १८ किंकरैःसहरक्षोभिर्यदरक्षन्महद्धनं
तदगृह्णान्मयस्तत्रगत्वासर्वंमहासुरः १९ तदाहृत्यचतांचक्रेसोसुरोप्रतिमांसभां विश्रुतांत्रिषुलोकेषुदिव्यांमणिमयीं
शुभां २० गदांचभीमसेनायप्रवरांप्रददौतदा देवदत्तंचार्जुनायशंखप्रवरमुत्तमं २१ यस्यशंखस्यनादेनभूतानिप्रच
कंपिरे सभाचसामहाराजशातकुंभमयद्रुमा २२ दशकिष्कुसहस्राणिसमंतादायताभवत् यथावह्नेर्यथार्कस्य
सोमस्यचयथासभा २३ भ्राजमानातथात्यर्थंदधारपरमंवपुः अभिघ्नतीवप्रभयाप्रभामर्कस्यभास्वरां २४ प्रबभौ
ज्वलमानेवदिव्यादिव्येनतेजसा नवमेघप्रतीकाशादिवमावृत्यधिष्ठिता आयताविपुलारम्याविपाप्माविगतक्लमा २५

काशानवमिमेघैरिवमेघैश्चित्रक्षेत्रेचमत्कारामनवर्षिभिः शृंगारादिभीरसैः॥ तत्रचित्रेषभिनीयप्रदर्शितैः शोभमाना दिवंआवृत्यव्याप्यअभि
भूयेतियावत् विष्ठिताविशेषेणस्थिता विपाप्मापापघ्नीदिव्यतेजःसंपन्नत्वात् विगतक्लमा॥ श्रमच्छेदिनी॥ सुराःस्वात्रचिचित्रमणिवेदिकेति
पादंकल्पयंति २५

प्राकारः परिधिभित्तिः तोरणानि वहिर्द्वाराणि २६ दयाम्वहिंसादीन् यमनियमान् अर्हतीति दयार्हाः भगवद्भक्ताः वलिवाणप्रभृतयः तेषामियं दयार्हाः सा त्वनीति पाठे सात् परमात्मा सो ऽस्त्येषां ते सात्वंतस्तेषामियं सात्वती तिसएवार्थः २७ वहंतीति सभायाः जंगमत्वमुक्तं अत एव विमानमपि तिमे तिना मतस्याः युक्तं २८ २९ नलिनी कमलवती सरसी वैडूर्यैरिंद्रनीलमणिमयपत्रैर्योग्या मणिनालमयांबुजा मणिमयनालां कतकांबुजां च मयः शिल्पिनि रैत्यानां करभेश्वतेरपिचेति विश्वः करभः कलभो वा द्दार्षदे इति विश्वः। मणिनालोज्वलांबुजामिति पाठे तु मणिमयानि नालेषु विकस्वराणि अंबुजानि य

उत्तमद्रव्यसंपन्ना रत्नप्राकारमालिनी बहुचित्रा बहुधना सुकृता विश्वकर्मणा २६ न सात्वती सुधर्मा वा ब्रह्मणो वापि तादृशी समा रूपेण संपन्ना यां चक्रे मतिमान्मयः २७ तां स्म तत्र मयेनोक्ता रक्षंति च वहंति च सभामष्टौ सहस्राणि किंकरा नाम राक्षसाः २८ अंतरिक्षचरा घोरा महाकाया महाबलाः रक्ताक्षाः पिंगलाक्षाश्च शुक्तिकर्णाः प्रहारिणः २९ तस्यां सभायां नलिनीं चकाराप्रतिमां मयः वैडूर्यपत्रविततां मणिनालोज्वलांबुजां ३० हैमसौगंधिकवती नानाद्विजगणायुता पुष्पितैः पंकजैश्चित्रा कूर्मैर्मत्स्यैश्च कांचनैः चित्रस्फटिकसोपाना निष्पंकसलिला शुभा ३१ ३१

स्यां सा तथा मणिमयनालेषु स्वच्छांबुजां वा ३० पद्मसौगंधिकवती पद्माकारैः सौगंधिकैः पद्मरागैर्युक्ता पद्मरागमयपद्मा इत्यर्थः सौगंधिकं तु कह्लारे पद्मरागे चेति मेदिनी हैमसौगंधिकवतीमिति पाठे स्पष्टोर्थः पुष्पितैर्विकसितैः निः पंकेति विद्यमानमपि सलिलमपि स्वच्छत्वात् आशय रूपेणैव प्रकाशते न स्वरूपेण स्फटिकजपाकुसुमवत् अनेन तत्र स्थलभ्रमकारणमुक्तं ३१ ३१ ३१

ति २

मंद्राभिलेनसमुद्भूतां समुच्छलितविंदुः। अतएवसर्वतः प्रसृतनलिनीपत्रेषुमुक्तातुल्यैः जलविंदुभिः आचितां व्याप्तां महामणिशिलामयाः शिलापट्टाः दीर्घचतुरस्रपा
षाणाः तैर्वद्धाः पर्यंते समीपे चतुर्दिक्षु वेदिका यस्याः सा ३२ मणिरत्नचितां तां तु अभ्येत्य अधिगम्य ज्ञात्वा अयंभावः अदृष्टपूर्वैरतिभास्वरैः पत्रनालपुष्पै
रछिन्नत्वात्सलिलस्य काचमय्यां वेदूर्यमणिमय्यां वा भुवि कृत्रिमाण्येव कमलादीनीति भ्रमात् मणिरत्नचिताभूमिरेवेयमिति तां नलिनीं ज्ञात्वा स्थलभ्रमाज्जले

मंद्राभिलसमुद्भूतां मुक्ताविंदुभिराचितां महामणिशिलापट्टबद्धपर्यंतवेदिकां ३२ अभ्येत्समानवाः केचिद्दृष्ट्वापि नविजानते ते
ज्ञानात्प्रपतंतिस्म नराविभ्रांतचेतसः ३३ तांसभामभितोनित्यंपुष्पवंतोमहाद्रुमाः आसन्नानाविधानीलाः शीतछायामनोरमाः
३४ काननानिसुगंधीनिपुष्करिण्यश्चसर्वशः हंसकारंडवोपेताश्चक्रवाकोपशोभिताः ३५ जलजानांचपद्मानांस्थलजानांचा
सर्वशः मारुतोगंधमादायपांडवान्स्मनिषेवते ३६ ईदृशींतांसभांकृत्वामासैःपरिचतुर्दशैः निष्ठितांधर्मराजायमयोराजन्न्य
वेदयत् ३७ सभापर्वणि वैशंपायनउवाच ततः प्रवेशनंतस्यांचक्रेराजायुधिष्ठिरः अयुतंभोजयित्वातुब्राह्मणानांनराधि
पः १ साज्येनपायसेनैवमधुनामिश्रितेनच भक्ष्यैर्मूलैः फलैश्चैवमांसैर्वाराहहारिणैः कृसरेणाथजीवंत्याहविष्येणच
सर्वशः २

पतंतीति ३३ तांसभांअभितइतिकर्मप्रवचनीययोगाद्द्वितीयातस्याःसभायाः समंततइत्यर्थः ३४ पुष्करिण्यस्तटाकाः ३५ ३६ परिचतुर्दशैः चतु
र्दशाधिकैः ३७ इतिनैलकंठीयेभारतभावदीपेसभापर्वणितृतीयोध्यायः १ कृसरेणतिलमिश्रौदनेन ओदनस्तिलमिश्रस्तुकृसरः परिकीर्तितः
तिलकल्कान्विनिक्षिप्यपक्तोवाकृसरोभवेदितिस्मृतिः जीवंत्यापाकविशेषेणओदनस्यैव पवनभाषयाबिरिंजिइत्युच्यते शाकविशेषेणोत्यन्ये २

रम्यापां ४

मांसप्रकारैर्विविधैः खाद्यैश्चापि तथा नृप चोष्यैश्च विविधै राजन्पेयैश्च बहुविस्तरैः ३ अर्हितैश्च ववासोभिर्माल्यैश्चोच्चावचैरपि तर्प
यामास विप्रेन्द्रान्नानादिग्भ्यः समागतान् ४ ददौ तेभ्यः सहस्राणि गवां प्रत्येकशः पुनः पुण्याहघोषस्तत्रासीद्दिवस्पृगिव भार
त ५ वादित्रैर्विविधैर्दिव्यैर्गन्धैरुच्चावचैरपि पूजयित्वा कुरुश्रेष्ठो दैवतानि निवेश्य च ६ तत्र मल्ला नटा झल्लाः सूता वैतालिकास्तथा
उपतस्थुर्महात्मानं धर्मपुत्रं युधिष्ठिरं ७ तथा स कृत्वा पूजां तां भ्रातृभिः सह पाण्डवः तस्यां सभायां रेमे शक्रो यथा दिवि ८ सभायाम
थ यस्तस्यां पाण्डवैः सह आसते आसांचक्रुर्नरेन्द्राश्च नानादेशसमागताः ९ असितो देवलः सत्यः सर्पिर्माली महाशिराः अर्वावसुः
सुमित्रश्च मैत्रेयः शुनको बलिः १० बको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः सुमन्तुर्जैमिनिः पैलो व्यासशिष्यास्तथा वयं ११
तित्तिरिर्याज्ञवल्क्यश्च ससुतो लोमहर्षणः अप्सुहोम्यश्च धौम्यश्च अणीमाण्डव्यकौशिकौ १२ दामोष्णीषस्त्रैवलिश्च पर्णादो घटजानुक
: मौञ्जायनो वायुभक्षः पाराशर्यश्च सारिकः १३ बलीवाकः सिनीवाकः सत्यपालः कृतश्रमः जातूकर्णः शिखावांश्च आलवः पा
रिजातकः १४ पर्वतश्च महाभागो मार्कण्डेयो महामुनिः पवित्रपाणिः सावर्णो भालुकिर्गालवस्तथा १५ जङ्घाबन्धुश्च रैभ्यश्च कोपवे
गश्च भृगुः हरिबभ्रुश्च कौण्डिन्यो बभ्रुमाली सनातनः १६ काक्षीवानौशिजश्चैव नाचिकेतोऽथ गौतमः पैङ्गो वराहः शुनकः शाण्डिल्य
श्च महातपाः १७ कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च मुनयो धर्मविद्वांसो धृतात्मानो जितेन्द्रियाः १८

३२ कालकेयाः कालकायाश्चपत्सानिश्चसुराः ३३ ३३ गौरवाजिनवाससः मृगचर्मपरीधानाः ३४ ३६ सप्तविंशतिश्चित्रसेनाद्यागंधर्वगणाम: ३७

श्व९

एतेचान्येचवहवोवेदवेदांगपारगाः उपासतेमहात्मानंसभायामृषिसत्तमाः १९ कथयंतःकथाःपुण्याधर्मज्ञाःशुचयोऽमला
ः तथैवक्षत्रियश्रेष्टाधर्मराजमुपासते २० श्रीमान्महात्माधर्म्मात्मामुंजकेतुर्विवर्द्धनः संग्रामजिद्दुर्मुखश्चउग्रसेनश्चवीर्यवान्
२१ कक्षसेनःक्षितिपतिःक्षेमकश्चापराजितः कंवोजराजःकमठःकंपनश्चमहावलः २२ सततंकंपयामासयवनानेकएववः
ः वलपौरुषसंपन्नानकृतास्त्रानमितौजसः २३ यथासुरान्कालकेयान्देवोवज्रधरस्तथा जटासुरोमद्रकानांचराजाकुंतिःपुलिं
दश्चकिरातराजः तथांगवंगौसहपुंड्रकेणपांड्योड्रराजौचसहांध्रकेण २४ अंगोवंगःसुमित्रश्चशैव्यश्चामित्रकर्षणाः ः किरातराजरा
जःसुमनायवनाधिपतिस्तथा २५ चाणूरोदेवरातंभोजोभीमरथश्चयः श्रुतायुधश्चकालिंगोजयसेनश्चमागधः २६ सुकर्माचे
कितानश्चपुरुश्चामित्रकर्षनः केतुमान्वसुदानश्चवैदेहोथकृतक्षणः २७ सुधर्माचानिरुद्धश्चश्रुतायुश्चमहावलः अनूपरा
जोदुर्द्धर्षः क्रमजिच्चसुदर्शनः २८ शिशुपालःसहसुतःकरुषाधिपतिस्तथा वृष्णीनांचैवदुर्द्धर्षाःकुमारादेवरूपिणः २९ आ
हुकोविपृथश्चैवचगदःसारणएवच अक्रूरःकृतवर्माचसत्यकश्चशिनेःसुतः ३० भीष्मकोथाहृतिश्चैवद्युमत्सेनश्चवीर्यवान्
कैकेयाश्चमहेष्वासाः यज्ञसेनश्चसोमकिः ३१ केतुमान्वसुमांश्चैवकृतास्त्रश्चमहावलः एतेचान्येचवहवःक्षत्रियामुख्यसं
मताः ३२ उपासतेसभायांस्मकुंतीपुत्रंयुधिष्टिरं अर्जुनंयेचसंश्रित्यराजपुत्रामहावलाः ३३ अशिक्षंतधनुर्वेदंरौरवाजिनवास
सः तत्रैवशिक्षिताराजनकुमाराः वृष्णिनंदनाः ३४ रौक्मिणेयश्चसांवश्चयुयुधानश्चसात्यकिः सुधर्माचानिरुद्धश्चशैव्यश्च
नरपुंगवः ३५ एतेचान्येचवहवोराजानःपृथिवीपते धनंजयसखाचात्रनित्यमास्तेस्मतुंवुरुः उपासतेमहात्मानमासीनंसप्तविंश
तिः चित्रसेनःसहामात्योगंधर्वाप्सरसस्तथा ३७

साम्यंतालविशेषः शंपेसंनिपातः संपाटक्षिणाहस्तगृहीततालविशेषः शंपाटक्षिणापातः स्कवामेतालइतिस्मृतः इत्युक्तेः समारोगीतवाद्यतालानांध्वनिसाम्यं। लयेः द्रुत
मध्यविलंबितेस्थानेउरः शिरः कंठादौ ३९ ४० सभापर्वणपध्यायश्चतुर्थः अथेतित्रोपविष्टेष्विति अत्रनारदोयुधिष्ठिरंप्रश्नमुखेनराजधर्माननुशास्ति १ तत्रश्लोकः स्वरू
पंतावद्याचष्टेः स्यापिकश्लोकतुल्यनामाभूदिति वेदोपनिषदांवेत्तेतिवेदाः ऋग्यजुः सामाथर्वाणः उपनिषदोरहस्यविद्याः चतुर्विधाः तत्रकर्मांगावबद्धोपासनं उमावाअश्व
स्यमेध्यस्यशिरइत्यादिश्रुत्याविहितंकर्मांगेष्वश्वादिषुविराड्दृष्टिकरणं प्रतीकोपासनंअन्नंब्रह्मेत्युपासीतआदित्योब्रह्मेत्यादेशइत्यादिश्रुत्यादिमादिमूर्तिषुब्रह्मदृष्टिकरणं अहंग्र

गीतवादित्रकुशलाः सम्यक्तालविशारदाः प्रमाणेथलयस्थानेकिन्नराः कृतनिश्रमाः ३८ संचोदितास्तुंबुरुणागंधर्वसहिताः
स्तदा गायंतिदिव्यतानैस्तेयथान्यायंमनस्विनः ३९ पांडुपुत्रानृषींश्चैवरमयंतउपासते तस्यांसभायामासीनाः सुव्रताः सत्यसं
गराः दिवीवदेवाब्रह्माणंयुधिष्ठिरमुपासते ४० सभापर्वणि वैशंपायनउवाच अथतत्रोपविष्टेषुपांडवेषुमहात्मसु महत्
सुचोपविष्टेषुगंधर्वेषुचभारत १ वेदोपनिषदांवेत्ताऋषिः सुरगणार्चितः इतिहासपुराणज्ञः पुराकल्पविशेषवित् २

होपासनंत्वंवाअहमस्मिभगवोदेवतेअहंवैत्वमसीतिश्रुतिहारेणात्मनोदेवतायाश्चभेदचिंतनं ज्ञानंब्रह्मात्मानुभवः वेदानांकर्मप्रतिपादकानांतदंतर्गतानामुपनिष
दांचवेत्ता पारंगतोथतत्रज्ञाता अतएवऋषिः गंताफलंप्रतिवेदोक्तकृत्स्नफलभागीकृतानुष्ठानत्वात् अतएवसुरगणार्चितः इतिहासपुराणेप्रसिद्धेपुराकल्पः बहु
कर्तृकमन्वाख्यानंदेवासुराः संयत्ताआसन्नित्यादिकंवेदोक्तं विशेषः एककर्तृकमन्वाख्यानंपरकृत्याख्यंमहीरथेवद्वाहंवैधसरेक्ष्वाकोराजा पुत्रआसीत्यादितस्यये
गवलात्मसक्षरदर्शी २ २ २

न्यायः पंचांगमधिकरणं यथाविषयो विषयश्चैव पूर्वपक्षस्तथोत्तरः पक्षद्वयफलं चैव शास्त्रेऽधिकरणं विदुः अत्र पूर्वपक्षस्वरूपं करोति नीति वाक्यं विषयः तत्र षष्ठी रूपसंबंधी
ति कर्तृव्यक्तालक्षणार्थाउत रूपावयवलक्षणार्थेति संदेहो विशयः एतावेव पूर्वोत्तरपक्षौ ज्ञेयौ कल्पनालाघवानुग्रहादुत्तरः सिद्धांतः फलं त्वनुष्ठानभेदः पूर्वपक्षे
तक्षणाद्यास्त्रीकरणादिना काष्ठांतरं रूपसदृशं निर्मातव्यं सिद्धांते। एकदेशस्य पृथक्करणमात्रमिति इदमेव पंचकं मीमांसाधर्मसूत्रेषु लक्षसंख्यकमेवोचितो निर्णयः संप्रयो
जनः पंचैतान्यनुजानीहि वाक्यमित्युक्ते तद्बुद्धेरिति न स्वांगहनार्थत्वाद्विषयः सांख्य एवमेवं वेति विचारः क्रमः अतिक्रमः सिद्धांतस्य पूर्वः पक्षस्तस्यार्थः निर्णयः सिद्धांतः प्र
योजनकफलमिति वाक्यं वाक्यार्थनिर्णयोपायः एवं पूर्वोत्तरमीमांसाधिकरणानि न्यायाः तद्विद्। धर्मतत्त्वज्ञः मन्वादिप्रणीतशास्त्रतत्त्वज्ञः षडंगवित् शिक्षाकल्पो व्याक

न्यायविद्धर्मतत्त्वज्ञः षडंगविदनुक्रमः एकसंयोगनानात्वसम
वायविशारदः ३ ३ ३ ३ ३

रणं छंदो विचितिर्निरुक्तं ज्योतिषमिति षड्वेदांगानि अनुक्रमः अनुक्रमज्ञः एकसंयोगनानात्वसमवायविशारदः एकादित्रयं सर्वेष्वपि शास्त्रेषु समानं यथा मी
मांसायां समिधो यजति इत्यादिप्रयाजाद्यंगवाक्यानां दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति महावाक्येनैकवाक्यत्वमैक्यं संयोगनानात्वं संयोगपृथक्त्वं यथा दध्ना जुहोती
ति वाक्यान्नित्यमपि दधि दध्नेंद्रियकामस्येति वाक्यांतरेणेंद्रियार्थार्थमपि पृथग्विधीयते तेन नैद्व्यमपि युगपद्ध्यासाध्यत इति समवायः एकस्मिन्कर्मण्यनेकबोध
कानां सन्निपातः यथा दर्शपूर्णमासावेकराजसूये दर्वीहोमादर्शादित्रिकद्वयस्यैव साक्षात्परमापूर्वजनकत्वे उपनिपातः तदंगानामिव परंपरया पूर्वोपकार

कत्वं यद्यप्येतमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति आत्मविविदिषासाधकत्वं पूर्ववेदानुवचनादीनामेककार्यकारित्वलक्षणमे
कं नन्वेककर्मांगत्वाभावे कथमेषामेकं अत आह संयोगनानात्वेति स्वस्ववाक्योत्पन्नानां पृथक्फलानामप्येषां संयोगपृथक्त्वन्यायेन विविदिषार्थत्वमपि युक्तमेवेत्यर्थ
: नन्वेषां समुच्चितानामेककार्यकारित्वे समुच्चयासंभवः राजसूयादीनां ब्राह्मणाद्यनुपयोगित्वात् प्रत्येकं चेदितरवैयर्थ्यमित्याशंक्याह समवायविशारद इति समवा
यः यथाधिकारं कर्मसंबंधः। अयमर्थः ब्राह्मणादीनां राजसूयादिष्वधिकाराभावेन तत्प्राप्तिः विविदिषायाः पापनिवृत्तिफलत्वे केनचिदेवोपपत्तेरनेन तदर्थफलतो निषिद्धा
नां श्येनादीनां प्राप्तिः अत एव हेतुद्वयात् पवित्रेष्ट्यादिकं काम्यमपि न निवार्यते नित्यानामपि न सर्वेषां समुच्चयः विविदिषाख्यदृष्टफलकत्वात् तस्मान्न सर्वकर्मस
मुच्चयो नापीतरवैयर्थ्यमिति एवंरूप एव समुच्चयोऽत्र समवायशब्दार्थः अस्मिन्नर्थे यो विशारदः विवेकसमर्थः यद्वा एकसाधर्म्यात्पृथिव्यादीनां द्रव्यत्वेन रूपेण संयो
गनानात्वं असाधारणधर्मसंबंधः तेन पृथिवीत्वजलत्वादिरूपेणाभेदेऽपि समवायः शरीरे पंचानामपि भूतानां मेलकः एतेषां तत्साधर्म्यवैधर्म्यस[illegible]कारं चेत्याद्युक्त
शलरसर्थः ३

नकेवलं ज्ञातुमेव कुशलोऽपि तु वक्तुमित्याह वक्तेति वक्तापि समानाधिकरणमेवेत्याह प्रगल्भ इति असंबद्धप्रलापीनेत्यर्थः यतः मेधावी ऊहापोहकुशलः तादृशोऽपि स्मृति
मान् अधीतेननाशितवानित्यर्थः नयवित् न्यायविभागादिव्यवहारवित् कविः अनागतदर्शी परापरविभागज्ञः ज्ञानकाण्डकर्मकाण्डयोः यथायोग्यं शिष्येषु विभजनं
तज्ज्ञः यतः प्रमाणकृतनिश्चयः प्रमाणं प्रत्यक्षानुमानागमादि तच्च द्विविधं लौकिकमलौकिकं च आद्यं घटवह्निस्वर्गादिविषयं द्वितीयं निर्विशेषात्मवस्तुतत्त्ववि
षयं तथाहि अहंकारादिकमात्मनि सुषुप्त्याद्यवस्थास्वन्विष्यतीति तत्र प्रत्यक्षं सुषुप्तौ निर्विशेषत्वं तथा द्रष्टृदृश्ययोरेकोपादानकौ भास्यभासकत्वात् श्रोत्रशब्दवत्

वक्ता प्रगल्भो मेधावी स्मृतिमान्नयवित्कविः परापरविभा
गज्ञः प्रमाणकृतनिश्चयः ५ ॥ ॥

भास्यभासकौ च द्रष्टृदृश्यौ तस्मादेकोपादानकौ यौ न तथा तौ नैकोपादानकौ यथा शब्दघ्राणविति व्यतिरेकतो वा साध्यसिद्धौ सत्यां उपादानोपादेय
योरभेदात् द्रष्ट्रात्मवस्तुतत्त्वमिति सिद्ध्यति अनुमानादप्यात्मनो निर्विशेषत्वं घटज्ञानं पटज्ञानमिति दृष्टिविशेषदर्शनानुभवस्य घटाकाशादिवदौपाधिकत्वात्
तथागमेऽपि आत्मनो निर्विशेषत्वं प्रसिद्धः अस्थूलमनण्वनिर्गुणं निष्क्रियमित्यादि ५ ॥ ॥ ॥

स०
१०

नन्वनुमानबलात्चंद्रमोदेशिकत्वप्रसक्तेयजमानः प्रस्तरइत्यादिरागमस्त्वशिथिलीक्रियते अनुमानमपि तत्र शिरःकपालंशुचिप्राण्यंगत्वात्शंखवदित्यादिकंनार
स्थ्यास्थिसस्नेहंसवासाजलमाविशेदित्यागमेन तथाचसर्वमपिप्रमाणंसंशयमनस्तत्रकृतनिश्चयत्वंदूरापेतमित्याशंक्याहपंचावयवयुक्तस्यवाक्यस्यगुणदोष
वित् तत्रपरंबोधयितुंप्रवृत्तस्यानुमानवाक्यंप्रतिज्ञादयः पंचावयवाः तत्रपर्वतोवह्निमानितिप्रतिज्ञा धूमादितिहेतुः यथामहानसइतिदृष्टांतउदाहरणं धूमवांश्चा
यमित्युपनयः तस्माद्वह्निमानितिनिगमनं अस्मिन्वाक्येगुणोऽनुकूलतर्कः यदिवह्निमान्नस्यात्तर्हिधूमवानपिनस्यात् दोषः इष्टोवह्निमानित्यादावाश्रया
सिद्धिप्रभृतिः तावुभौवेत्तीतितथा तथाचानुमानंप्रसक्तागमेनशिथिलीकरोतु व्रीहिमसूरादिश्रुतित्वविभागस्यशास्त्रैकगम्यत्वात्तत्रानुकूलतर्काभावएवानुमान

पंचावयवयुक्तस्यवाक्यस्यगुणदोषवित् उत्तरोत्तरवक्ताचवदतोपिबृहस्पतेः ५ धर्मकामार्थमोक्षेषु
यथावत्कृतनिश्चयः तथाभुवनकोशस्यसर्वस्यास्यमहामतिः प्रत्यक्षदर्शीलोकस्यतिर्यगूर्ध्वमधस्तथा ६

बाधकोनत्वागमः इतिस्थितं तथाचलौकिकप्रमाणाधिकारिणा अपरंकर्मकांडमेवविभज्यतेइतरस्यइतरदितिविवेकः ५ यथावत्कृतनिश्चयः लौकिकानांप्रमाणानां
प्रामाण्यमादायधर्मार्थकामानांपुरुषार्थत्वनिश्चयः इतरेषांप्रामाण्यमुपजीव्यमप्युपरघमोक्षस्यस्वपुरुषार्थत्वनिश्चयः तदालौकिकप्रमाणबाधात् वेदाश्चैवदाउ
तिष्ठन्तेः लौकिकंतद्दृष्टंवैदंप्रमाणत्वात्मनिश्चयादिरभियुक्तोक्तेः स्वआत्मनिश्चयाद्वागेवेतिशेषः आत्मात्मनिश्चयादितिवाछेदः महामतिः आत्मनोवाआत्मेदृशो
नेनमत्स्याविज्ञातेनेदंसर्वंविदितमितितत्सेवसार्वज्ञ्यश्रुतेः ६ ॥ ध छ ध आत्मकृः १ छ

एम०
१०

सांख्ययोगविभागज्ञः सांख्यं वेदान्तविचारः योगश्चित्तवृत्तिनिरोधः अनयोर्विभागः उपयोगः तत्र श्रवणात्मको वाक्यार्थविचारः प्रमाणगतासंभावनानिवृत्त्युपयोगी मननाख्यः श्रुतस्यार्थ
स्य तर्केणानुसंधानरूपो विचारः प्रमेयगतासंभावनानिवृत्त्युपयोगी अद्वैतमेव वेदा वदन्ति युक्तियुक्तं चैतदेवेति सांख्यविभागः निदिध्यासनापरपर्यायो योगः अनात्मसु देहादिष्वात्मत्व
रूपां विपरीतभावनां निवर्त्य सज्ञात ज्ञानज्ञेयाभावं चैतद्द्रष्टात्मस्वयं गोचरयतीति योगविभागः यत्तु द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्ष
णमिति वासिष्ठवचनमुदाहृत्य चित्तनाशाख्यात्मदर्शनस्य द्वावुपायाविति वर्णितं तत्तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतिविरोधः संवादिभ्रमवद्योगेपि ज्ञा
नजननयैव फलदर्शनेन चित्तस्योपसर्जनत्वं कर्मणामिव स्यात्तथा च नोपायान्तरं योगस्यापत्तिः वासिष्ठवाक्यं तु क्रमभेदमाह न तूपायभेदं तथा च रूढोपास्तेर्योग उपसर्जनं वाक्या
र्थज्ञानं प्रधानं श्रुतेनोपास्तिलक्षज्ञानस्योपसर्जनं योगः प्रधानं यथा दृष्टगोपिंडस्यापि अगृहीतशब्दार्थसंगतिकस्यायं गौरिति वाक्यमेव वा ज्ञानं तु न तच्चक्षुः तेन विषयीकृतेपि गो

सांख्ययोगविभागज्ञो निर्विवित्सुः सुरासुरान् ६ ॥

पिंडे गोत्वबुभुत्सानुवर्तते एवं साक्षात्कृततत्पदार्थस्यापि तत्त्वमसीति वाक्यमेव संसारानर्थमूलब्रह्माज्ञानस्य निवर्तकं न मननं तेन दृष्टेपि त्वमर्थे ब्रह्माज्ञानानुवृत्तिदर्शनात् एवं साक्षा
दिमतो गौरिति लक्षणतो ज्ञातगोपदार्थस्यापि गोपिंडदर्शनमेव गोत्वबुभुत्सानिवर्तकं न तु वाक्यं तथा श्रवणादिनानुवृत्तिज्ञातब्रह्मपदार्थस्यापि योगादेव दर्शनं न तु वाक्यात् तेन तं
त्वौपनिषदं पुरुषं पृच्छामीति मनसैवानुद्रष्टव्यमिति च श्रुत्योर्मनसो ज्ञानकरणत्वानुवादकश्रुत्योरेव स्यातां सिद्धान्ति। तदिदमुक्तं सांख्ययोगविभागज्ञ इति विभागो हि द्वयोः समु
च्चित्यैककार्यकारित्वे सति संभवति न तु व्रीहियववद्विकल्पैककार्यकारित्वे स्यात् तावत् सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिता इत्यत्र प्रपंचयिष्यमाणत्वात् एवं ब्राह्म्या विद्यया
संपन्नत्वमुक्त्वा राजयोग्य विद्यान्तरसंपत्तिमप्याह निर्विवित्सुः सुरासुरानित्यादिना निर्विवित्सुः विवित्सुर्विचारं कर्तुमिच्छुः निर्विवित्सुस्तद्विरोधी उभयेषामधीश्वरेण न कलहप्र
वर्तकः यद्वा निर्वैरो युद्धादुपरतिं कर्तुमिच्छुः लोकनाशभयादित्यर्थः एतेन भेदनीतिज्ञत्वमुक्तं ६ ६ ७ ७ ७

रा०
११

संधिः सामविग्रहे निग्रहो दंड इत्यर्थः। अनुमानविभागवित्। स्वपरशक्तिबलाबलेः अनुमानेनोन्निश्चित्य विभागं विभजनं परामात्यादिभ्यो धनप्रदानं तद्धि तन्त्रनुमाय विभागविदिति
गौडाः पठंति। एवं च नीतिशास्त्रप्रसिद्धोपायचतुष्टयाभिज्ञत्वमुक्तं षाड्गुण्यविधियुक्त इत्यत्र षड्गुणाः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः। तस्य षाड्गुण्यं। स्वार्थे ष्यञ्।
तस्य विधिः अज्ञातज्ञापनं तेन युक्तः। सर्वदा विजिगीषुः षाड्गुण्यादिकमुपदिशतीत्यस्य नीतिः शत्रुत्वस्याधिकारिकत्वात् तत्र संधिविग्रहोपप्रेत्येकं द्विविधौ प्रबलदुर्बलयोर्वि।
जिगीषावतोः समभूमौ युद्धप्रसंगे अयं विग्रहमिच्छतीति देवे नैव परः संधिमिच्छतीति दानेनेति। तयोरेव दुर्बलोऽभेद्यदुर्गाश्रितश्चेत् बलवतापि सह देशाधुनत्वादिना विग्रहमि
च्छति इतरस्तेन सहाल्पकरग्रहेणापि संधिमेवेच्छति तथा च दुर्बलद्वारको संधिविग्रहावन्यौ प्रबलद्वारकावन्यौ। तदिदमुक्तं रामायणे द्वियोनी संधिविग्रहाविति तत्र प्रव

संधिविग्रहतत्त्वज्ञस्त्वनुमानविभागवित् षाड्गुण्यविधियु
क्तश्च सर्वशास्त्रविशारदः ७ ॥ ॥

लयोर्निविग्रहः यानासनयोः प्रयोजकः दुर्बलयोनिः संधिद्वैधीभावसमाश्रययोः यथोक्तं कामंदकीये संधेश्च विग्रहस्यापि द्वैगुण्यं संप्रचक्षते यानासने विग्रहस्य रूपं संधे
ः परं द्वयमिति द्वौ गुणाभ्यां तोयस्य स द्विगुणः स च सर्वनीतिर्योभावो द्वैगुण्यं तत्र यानं विजिगीषोररिं प्रति यात्रा आसनं कदाचित् शक्तिप्रतिबंधे च तत्रैव शत्रोर्दुर्गे आवेष्ट्य तत्र
धान्यादिप्रवेशनं प्रतिबध्नतः वस्थानं बलवता विग्रहे बलवत्तरेणात्तः छत्रुणा संधिं कृत्वा उभयत्र दासोस्मीति वाचैवात्मसमर्पणं कर्तव्यं न कर्मणेति स द्वैधीभावः यथोक्तं तत्रैव
बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः इति अरिणापीड्यमानस्य बलवद्दुर्गभूपालाद्याश्रयणं समाश्रयः एवं चोपायांतर्ग
तौ संधिविग्रहावन्यौ षाड्गुण्यांतर्गतौ चान्याविति न पुनरुक्तिः ७ ७ २ ७ ७

राम०
११

सुरगंधर्वसेवी नृत्यगीतप्रियइत्यर्थः सर्वत्रसर्वासुविद्यासुसर्वेषुकर्मसुचअप्रतिघः अप्रतिहतः पूर्णशक्तिमत्वात् अन्यैः असंगत्वकारुण्यादिभिः मुनिः आत्मतत्वानुसंधानवान् ८ आगमत् आगतवान् ९ १० आर्चयत् पूजितवान् ११ १५ कच्चिदर्थाश्चकल्प्यंतेइतिकच्चिदिति कामप्रवेदने स्वाभिप्रायाविष्करणे। त्वदीयाश्चार्थाः स्वका

सुरगंधर्वसेवीचसर्वत्राप्रतिघस्तथा ऐलैश्चान्यैश्चबहुभिर्युक्तोगुणगणैर्मुनिः ८ लोकाननुचरन्सर्वानागमत्तांसभांनृप ना
रदः सुमहातेजाऋषिभिः सहितस्तदा ९ पारिजातेनराजेंद्र पर्वतेनचधीमता सुमुखेनचसौम्येनदेवर्षिरमितद्युतिः १० सभा
स्थान्पांडवान्द्रष्टुंप्रीयमाणोमनोजवः जयाशीर्भिस्तुतंविप्रोधर्मराजानमार्चयत् ११ तमागतमृषिंदृष्ट्वानारदंसर्वधर्मवित् स
हसापांडवश्रेष्ठः प्रत्युत्थायानुजैः सह १२ अभ्यवादयतप्रीत्याविनयावनतस्तदा तदर्हमासनंतस्मैसंप्रदाययथाविधि १३
गांचैवमधुपर्कंचसंप्रदायार्घ्यमेवच अर्चयामासरत्नैश्चसर्वकामैश्चधर्मवित् १४ तुतोषचयथावच्चपूजांप्राप्ययुधिष्ठिरात्
सोर्चितः पांडवैः सर्वैर्महर्षिर्वेदपारगः धर्मकामार्थसंयुक्तंपप्रच्छेदंयुधिष्ठिरं १५ नारदउवाच कच्चिदर्थाश्चकल्प्यंतेधर्मेच
रमतेमनः सुखानिचानुभूयंतेमनश्चनविहन्यते १६ ॥ ॥ ॥ ॥

र्थेयागदानकुटुंबभरणादौसमर्थाभवंतीतिममाभिप्रायइत्यर्थः एवंकरिष्यामीत्येतदुक्तमित्यंतेराज्ञांगीकृतत्वादुपदेशपरोयंग्रंथइत्यवसीयते अर्थधर्मकाममोक्षान्
त्वदीयानविहतानिच्छामीतिक्रमेणपादचतुष्टयार्थः कच्चिदितिसर्वत्रसंबंधनीयं। तत्रापिमनश्चअंतरात्मनिप्रणिधीयमानंनप्रतिहन्यतेवृत्यंतरैरित्यंत्यपादार्थः १६

रा०
१२

त्रिषुउत्तमाधममध्यमेषु अक्लिष्टपुरोहितादिषु धर्मेणासहितां वृत्तिं वर्त्तसे इन्द्रप्रस्थादिषु अर्थेनसहितां प्रजासुपालन बन्धनग्रहाराभ्यां धर्मार्थसहितामितिविवेकः धर्मार्थौ च धर्मार्थौ चेति द्वंद्वैकशेषः तैः सहितामिति समासः १७ कच्चिदर्थेनेति अर्थलोभाद्धर्मबाधो नीचानां धर्मलोभादर्थबाधो विरक्तानां कामेन प्रीतिसारेण तात्कालिकसुखाभासप्रदर्शनवलेन मोहयता धर्मार्थयोर्बाधः कामुकानां प्रसक्तः त्वपि राज्यप्रतिकूलानां नीचत्वविरक्तत्वकामुकत्वानामभावमिच्छामीत्यर्थः १८ परस्परविरोधिनामेषां कथमेकेनानुष्ठान

कच्चिदाचरितां पूर्वैर्नरदेवपितामहैः वर्त्तसे वृत्तिमक्षुद्रां धर्मार्थसहितां त्रिषु १७ कच्चिदर्थेन वा धर्मं धर्म्मेणार्थमथापि वा उभौ वा प्रीतिसारेण न कामेन प्रबाधसे १८ कच्चिदर्थं च धर्मं च कामं च जयतां वर विभज्य काले कालज्ञः सर्वान्वरद सेवसे
१९

मित्याशंक्य कालभेदेनेत्याह कच्चिदर्थमिति पूर्वाह्णे वाचरेद्धर्मं मध्याह्नेर्थमुपार्जयेत् सायाह्ने चाचरेत्काममित्येषा वैदिकी श्रुतिरिति दक्षोक्तकालव्यवस्थामास्थाय त्रिवर्गं सेवेत्यर्थः सदाचरेदिति संबोधनेन परानुग्रहरूपो धर्मः सर्वस्मिन्नपि काले कार्य इति सूचयति सर्वानिति पाठे त्रिवेषम्येन त्वात्मसाम्येनेत्यर्थः १९

राम०
१२

कच्चिद्राजेति। षड्गुणाः वक्ता प्रगल्भो मेधावी स्मृतिमान्नयवित्कविरिति नारदस्मृतौ सविताः वक्तृत्वादयः अत्र राजगुणा ध्रुवक्तृत्वं धारा मात्मादिषु यथा ज्ञानपंकार्योपदेशकोशलं। प्र
गल्भत्वं शत्रु रमनादौ उत्कर्षप्रदर्शनं मेधावित्वं तर्ककौशलं स्मृतिमान् कविरिति निचर्च्य अतीतानागतयोः परामर्शित्वं नयविदिति नीतिशास्त्रवित्त्वं एतैः राजगुणैः रूपायान् वलावलं
अन्योन्यं चतुर्दशत्वं परीक्षसे इति योजना। हे अनघ चतुर्दश भी राजदोषैर्वर्जितान् नेचवक्ष्यंते नास्तिकामनृतं क्रोधं प्रमादं दीर्घसूत्रतां। अदर्शनं ज्ञानवतामालस्यं पंचवृत्तितां
एकचिंतनमर्थानामनर्थज्ञैश्च चिंतनं निश्चितानामनारंभं मंत्रस्यापरिरक्षणं मंगलाद्यप्रयोगं च प्रत्युत्थानं च सर्वशः कच्चित्त्वं वर्जयस्येतान् राजदोषांश्चतुर्दशेति नास्तिक्यं
परलोकापलापः प्रमादः अनवधानता दीर्घसूत्रतां चिरक्रियत्वं पंचेंद्रियपरवशत्वं। अर्थानां प्रयोजनानां एकचिंतनं। एकेनैव चिंतनं अनर्थज्ञैः विपरीतार्थदर्शिभिः
सह चिंतनं मंत्रः मंगलं उत्सवः आदिपदाद्देवपूजादि तस्याप्रयोजनमननुष्ठानं प्रत्युत्थानं च सर्वतः युगपत्सर्वदिग्वस्थितशत्रूद्देशेन दंडयात्रेति तदर्थः यद्वा अंघपराज
यत्वं विंशतिवर्गस्तु रहितो सचकामंदकीये उक्तः। बालो वृद्धो दीर्घरोगी तथा ज्ञातिवहिष्कृतः भीरुको भीरुजनको लुब्धो लुब्धजनस्तथा विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमा

कच्चिद्राजगुणैः षड्भिः सप्तोपायांस्तथानघ वलावलेनसम्पन्नश्चतुर्दशसमीक्षसे २० ॥

न्। अनेकचित्तमंत्रश्च देवब्राह्मणनिंदकः दैवोपहतकश्चैव दैवचिंतक एव च दुर्भिक्षव्यसनोपेतो वलव्यसनसंकुलः अदेशस्थो वहुरिपुर्युक्तोऽकालेन यश्च सः। सत्यधर्मव्य
पेतश्च विंशतिः पुरुषा अमी एतैः संधीन कुर्वीत विग्रह्णीयात्तु केवलमिति उपायाः सप्त साम दान भेद दंड मंत्रौषध इंद्रजालाख्याः वलावलं स्वपरपक्षयोः साम्यपर
स्य हीनता स्वस्य वाहीनता इति त्रिविधं यथायोगं वुद्ध्यादिभिः सामादयः परीक्षणीयाः किमनेन शत्रु सामकर्तव्यं न वा कर्तुं मारध्वं चेत् सिद्धिर्निर्वा सिद्धं चेदनेन कुशलेन
वेति। चारप्रचरणादिना च वलावलप्रभृतिकं परीक्षणीयं। तथा चतुर्दश देशादयोऽपि परीक्षणीयाः ते च नीतिशास्त्रोक्ताः देशो दुर्गं रथो हस्तिवाजियोधाधिकारिणः अंतः
पुरात्र गणनाः शास्त्र लेख्य धनानि सर्वाः परीक्षास्त्वसिपास्तेषां च चतुर्दश नरेश्वरैरिति योधाः शूराः अधिकारिणः देशपालदुर्गपालसेनापत्यादयः गणना अश्वरथध
नासंख्या। लेख्यं आयव्ययनिर्णयाय सर्वस्य पत्रारोहकरणं। धनं पर्याप्तमपर्याप्तं चेति विचार्यं आसवाः मद्यवदपकारिणः प्रच्छन्नशत्रवः। असवइति पाठे वलमित्यर्थः
वलावलेन सम्पन्नमिति पाठे स्वीयं परकीयं च देशादिकं उक्तविरोधेन वलावलेन वुद्ध्या चारैश्च परीक्षणीयमित्यर्थः २० ॥ ॥ ॥

स० १३

एक२

एतदेवाह कच्चिदात्मानमिति आत्मानं प्रबलं परान् दुर्बलांश्च परीक्ष्य सेवसे राज्यं तथा विपरीते जयमूलस्य कोशस्य वृद्धये संधाय परैः सह साम कृत्वा अष्टौ कर्माणि कृषिर्व
णिक्पथो दुर्गं सेतुः कुंजरबंधनं खन्याकरादानं शून्यानां च निवेशनं। अष्टौ संधानकर्माणि प्रयुक्तानि मनीषिभिरिति नीतिशास्त्रोक्तानि सेवसे कुंजरबंधनं वज्रभक्ष
कत्वान्नेषां यथा विभागं ग्रामीणाधनैरेव ग्रामे ग्रामे पोषणार्थं बंधनं। खनिः रत्नाद्युत्पत्तिस्थानं आकरः सुवर्णाद्युत्पत्तिस्थानं इति भेदः खननमात्रेण धनलाभे
नाभिमुखीकरणेन च तयोरलाभे हेतुत्वात् २१ कृष्यादिनापि कोशवृद्धिः स्वाम्यादिप्रकृतिसप्तकस्य परैर्भेदनादिना मोहने कृते सति न भवतीत्यत आह कच्चित्प्रकृ
तय इति सप्त स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च राज्यांगानि प्रकृतयः पौराणांश्रेण्यापि चेतिकोशेक्ताः। तत्र स्वामि नृपा प्रकृतिः सप्तविधा दुर्गाध्यक्षो बला

कच्चिदात्मानमन्वीक्ष्य परांश्च जयतां वर तथा संधाय कर्माणि अष्टौ भारत सेवसे २१ कच्चित्प्रकृतयः
सप्त न लुप्ता भरतर्षभ आढ्यास्तथाव्यसनिनः स्वनुरक्ताश्च सर्वशः २२ ॥ ॥ ॥

ध्यक्षो धर्माध्यक्षश्च भूपतिः पुरोधा वैद्य दैवज्ञः सप्त प्रकृतयः स्मृता इति प्रोक्ताः बलाध्यक्षः बलस्य चतुरंगस्याहारादिदानेन पालकः चमूपतिर्युद्धे चन्वाः प्रणेता ध
र्मः कार्यमात्र अमात्यः मंत्री सुहृत् मायामायविभागकर्त्ता पर्षद्रूपः एते न तावका लुप्ताः परैर्मोहिता मा भूवन् लुप्येते मोहनार्थस्येदं रूपं लुप्ताश्च दुर्गादीनामेव
नाशापत्तिरित्यर्थः अथवा तत्र एवाढ्याः संतो व्यसनिनः द्यूतपानादिरताः मा भूवन् इष्टोत्पत्तिर्हि सो धर्ममतिक्रामति धर्मातिक्रमात्पापं करोतीति स्मृतेरत्र व्या
व्यसनप्रसक्तिस्तदापि नकोपादीनां वृद्धिः स्यात् कथं तर्हि स्युः सर्वप्रकारैः स्वनुरक्ता अरंतं स्वामिकार्ये प्रीतिमंतः २२ २२ २२ २२

राम० १३

दुर्गाध्यक्षादीनांलोभेनविपरीतकार्यकारित्वेननाशहेतुत्वंप्रसिद्धं अमा[illegible]त्यसुहृदोस्तुलोभेनकथंनाशहेतुत्वमित्याशंक्यमंत्रभेदेनेत्याहकच्चिन्नेत्यादिनाअपरिशंकिता :येषुदोषाशंकानास्तितैः कृतकैः कृत्रिमैः सुहृद्भूतैर्हेतुभिः उभयवेतनैः तवमंत्रितंमंत्रः नभिद्यतेनप्रकाश्यतेकच्चित् तर्कैर्हेतुभिर्वेतिपाठेसम्यगपिमंत्रितंकुयुक्तिभिर्नविष्ला व्यतइत्यर्थः त्वत्तोवाकृतककमित्रप्रतिकथया तः अमात्यैर्वाकृतकैः मंत्रितंभिद्यतइतिसर्वत्रसंबंधनीयं २३ मित्रेति मित्रसम्यक्परीक्षितेनसहसंमंत्रवत्वलवा ताशत्रुणासंधिंदुर्बलेनसहविग्रहंमध्यमेनउभयवेतनेनउदासीनेनएताचसहहृतिसाम्येनस्थितिंचकुर्यादितिसार्द्धश्लोकार्थः तत्रमित्रेकेगुणाः परीक्षितेत्यत

कच्चिन्नकृतकेर्हेतैर्येचाप्यपरिशंकिताः त्वत्तोवातववामात्यैर्भिद्यतेमंत्रितंतथा २३ भिन्नोदासीनशत्रूणांकच्चिद्धेत्सिचिकीर्षितं कच्चित्संधिंयथाकालंविग्रहंचोपसेवसे २४ कच्चिद्वृत्तिमुदासीनेमध्यमेचानुमन्यसे कच्चिदात्मसमाःशूराःशुद्धाः संबोधनक्षमाः २५ कुलीनाश्चानुरक्ताश्चकृतास्तेवीरमंत्रिणः विजयोमंत्रमूलोहिराज्ञोभवतिराघव २६ कच्चित्संवृतमंत्रैस्तैरमात्यैः शास्त्रकोविदैः राष्ट्रंसुरक्षितंतातशत्रुभिर्नविलुप्यते २७ कच्चिन्निद्रावशंनैषिकच्चित्कालेविबुध्यसे कच्चिच्चापररात्रेषुचिंतयस्यर्थमर्थवित् २८ २८ ॥ ॥ ॥

आहकच्चिदात्मसमाइति शुद्धाचारत्वंकुलीनत्वंचनैर्मल्यसासाधारणंलिंगंशुद्धाः संबोधनक्षमाइत्यत्रशुचयोजीवितक्षमाइतिपाठेआपन्नस्यराज्ञउज्जीवने क्षमाइत्यर्थः २५ किमेवंविधैर्मंत्रिणोसत्तत्राहाद्विजयइति २६ मंत्रभेदोमाभूदितिसुरक्षितस्फलमाहकच्चित्संवृतेति २७ कच्चिन्निद्रेति यथाका लस्वप्नप्रबोधवताब्राह्मेमुहूर्तेऽमात्यादिभिः सहकृतस्यमंत्रस्यपर्यालोचनंकर्तव्यं ब्राह्मेमुहूर्तेचेवोत्थायचिंतयेदात्मनोहितमितिस्मृतेस्तदानिर्णीतोर्थो नविलंबनइत्यवसायात् २८

कच्चिन्मंत्रेति षड्भिर्गोणाभिधेयतेमंत्रइतिप्रसिद्धेद्वाभ्यामेवमंत्रयितव्यमित्यर्थः मंत्रभेदेनकर्तव्यइत्युक्तंतदुपसंहरतिकच्चित्तइति २९ स्वाम्यमात्यादिप्रकृतिसप्तकानु
ग्रहात्कृष्यादिकर्माष्टकसिद्धिः ततश्चकोशवृद्धिरित्युक्तं तदनुवदतिविशेषविधानार्थं कच्चिदर्थमिति अर्थान्अर्थप्राप्त्युपायान्लघुमूलान्अल्पप्र
यसाध्यान्महोदयान्प्रचुरफलान् तादृशान्कृष्याद्यारंभकर्तृनस्मान् वैश्यादीनतेभ्योपिकरादानेनकोशवृद्धिरेवभवतीतिभावः ३० कच्चित्सर्वेइति क
र्मणांअंतेनैववध्यंतइतिकर्मांताः कृष्यादिकर्मवद्भुः कृषीवलादयः कच्चित्तेपरोक्षासाक्षात्अज्ञातानसंति। अथवाविशंकितास्त्रविश्वास्याः नसंति
अथवापुनरुत्सृष्टाः पुनः पुनस्त्वाक्षेपात्ताः संसृष्टंस्नेहः संसृष्टेत्रिषुसंगतेदर्शनेमर्दिनी चिरपरिग्रहात्ज्ञाताः विश्वास्याः स्निग्धाः अकर्मकराश्च

कच्चिन्मंत्रयसेनैकः कच्चिन्नबहुभिः सह कच्चित्तेमंत्रितोमंत्रोनराष्ट्रंपरिधावति २९ कच्चिदर्थंविनिश्चित्यलघुमूला
न्महोदयान् क्षिप्रमारभसेकर्तुंनविघ्नयसिताद्दृशान् ३० कच्चिन्नसर्वेकर्मांताः परोक्षास्तेविशंकिताः सर्वेवापुनरु
त्सृष्टाः संसृष्टंचात्रकारणं ३१ आसीनलुब्धैःकर्मिकैस्तेचकच्चिदनुष्ठिताः कच्चिद्धनान्कृतान्येवकृतप्रायाणिवापु
नः ३२ विदुस्तेवीरकर्माणिनानावाप्तानिकानिचित् कच्चित्कारुणिकाधर्मेसर्वशास्त्रेषुकोविदाः कारयंतिकुमारां
श्चयोधमुख्यांश्चसर्वशः ३३

त्वमहोदयेकर्मणिकारणाउदयनिमित्तं ज्ञात्वाताद्दृशानेवसंगृहीतायादित्यर्थः ३१ एतदेवाहैतद्वारेति कर्मिकैः हृद्धकमागतैः तेचकृष्यादयश्च
कच्चिदितिमित्रगुप्तिवत्कर्मगुप्तिरप्यकर्तव्येत्यर्थः ३२ अनवाप्तानिअनारब्धानिनविदुः कच्चिदितिआवृत्यायोज्यं कोशवृद्ध्युपायमुक्त्वाबलवृ
द्ध्युपायमाहकच्चित्कारणिकाइति कारणंज्ञापनंशिष्येभ्योविद्याप्रतिपादनंतदर्थंचरंतितिकारणिकाः कृपद्रोणसदृशाआचार्याः कारयंतिशिक्ष
यंति ३३ ३३ ३३

सुहृद्दुर्गामात्यसंपदं क्रमेणत्रिभिराह कच्चित्सहस्रैरित्यादिभिः अर्थकृच्छ्रेषुप्रयोजनसंकटेषुनिःश्रेयसंकल्याणं ३४ ३६ षष्ठीं राष्ट्रसंपदमाहकच्चिदष्टादशान्येष्विति तीर्थानिमंत्रिप्रभृतीन्यष्टादशयान्यवगाह्यराज्ञाकृतकृत्यो भवति तानिचोक्तानिनीतिशास्त्रे मंत्रीपुरोहितश्चैवयुवराजश्चभूपतिः पंचमोद्वारपालश्चषष्ठोंतर्वंशिकस्तथा १ कारागाराधिकारीचद्रव्यसंचयकृत्तथा। कृत्याकृत्येषुचार्थानांनवमोविनियोजकः २ प्रदेष्टानगराध्यक्षः कार्यनिर्माणकृत्तथा धर्माध्यक्षः सभाध्यक्षोदंडपालस्त्रि पंचमः ३ षोडशोदुर्गपालश्चतथाराष्ट्रांतपालकः। अटवीपालकांतानितीर्थान्यष्टादशैववतु ४ चारानविचारयेत्तीर्थेष्वात्मनश्चपरस्यच पाखंडादीनविज्ञातानन्य

कच्चित्सहस्रैर्मूर्खानामेकंक्रीणासिपंडितं पंडितोह्यर्थकृच्छ्रेषुकुर्यान्निःश्रेयसंपरं ३४ कच्चिद्दुर्गाणिसर्वाणिधनधान्यायुधो दकैः यंत्रैश्चपरिपूर्णानितथाशिल्पिधनुर्धरैः ३५ एकोप्यमात्योमेधावीशूरोदांतोविचक्षणः राजानंराजपुत्रंवाप्रापयेन्महतींश्रियं ३६ कच्चिदष्टादशान्येषुस्वपक्षेदशपंचच त्रिभिस्त्रिभिरविज्ञातैर्वेत्सितीर्थानिचारकैः ३७ ॥

न्योन्यमितरेष्वपि ५ मंत्रिणंयुवराजंचहित्वास्वेषुपुरोहितमिति एषांतीर्थशब्दवाच्यत्वेहलायुधः योनौजलावतारेचमंत्र्याद्यष्टादशस्वपि पुण्यक्षेत्रेतथापात्रेतीर्थंस्या द्दर्शनेष्वपीति परेषामष्टादशसुस्वस्यमंत्रिपुरोहितयुवराजंर्जपंचदशसुचतीर्थेषुचारानन्यैः परस्परं चाविज्ञातान्त्रीन्त्रीनप्रयुज्यतत्र्यैर्वात्तीसर्वचारसंवादेतथ्यंजा नीयात् ज्ञात्वाचस्वप्रजानामनुरंजनेनपरप्रजानांदुःखितानामभयदानादिनाऽऽकर्षणेनचस्वराष्ट्रवृद्धिःस्यादित्युक्तंभवति ३७ ३७ ॥

जय २

र्दैवाज्ञानांगेगाणस्वामिनांसंपदंविवक्षुः मुख्यस्वामिसंपदंतावदाहकच्चिद्विद्यामिति अविदितः परैःकिंकरैः प्रतिपन्नः सावधानः प्रतिपन्नः इतियावद्भतीकारैयत्नवा
न्निसयुक्तः नित्योद्योगी ३८ विनयसंपन्नः शिक्षायुक्तः। कुलपुत्रः सत्कुलजः अनसूयुः परगुणेषुदोषारोपमकुर्वन् अनुप्रष्टा शास्त्रचर्चाकुशलः असंकीर्ण

कच्चिद्विद्यामविदितः प्रतिपत्तिश्चसर्वदा नित्ययुक्तोरिपुश्चसर्वोन्वीक्षसेरिपुसूदन ३८ कच्चिद्विनयसंपन्नः कुलपुत्रोबहुश्रुतः
अनसूयुरसंकीर्णः सत्कृतस्तेपुरोहितः ३९ कच्चिदग्निषुतेयुक्तोविधिज्ञोमतिमानृजुः हुतंचहोष्यमाणंचकालेवेदयतेस
दा ४० कच्चिदंगेषुनिष्णातोज्योतिषः प्रतिपादकः उत्पातेषुचसर्वेषुदैवज्ञः कुशलस्तव ४१ कच्चिन्मुख्यामहत्स्वेवमु
मध्यमेषुचमध्यमाः जघन्याश्चजघन्येषुभृत्याः कर्मसुयोजिताः ४२ अमात्यानुपधातीतान्पितृपैतामहान्शुचीन्
श्रेष्ठान्श्रेष्ठेषुकच्चित्त्वंनियोजयसिकर्मसु ४३ कच्चिन्नोग्रेणदंडेनभृशमुद्विजतेप्रजाः राष्ट्रंतवानुशासंतिमंत्रिणोभ

रतर्षभ ४४ ४४ ४

इतिपाठसदसद्विवेकवान् ३९ अजुरकुटिलः ४० अंगेषुसामुद्रिकशास्त्रोक्तरीत्याअंगानांपरीक्षायां उत्पातेषुदिव्यभौमशारीरेषुधूमकेतुभूकंपवामनेत्रस्फु
रणादिषुआगाम्यशुभसूचकेषु ४१ सेनापत्याकरकोशाध्यक्षः रूप्याद्यध्यक्षराः निम्नमुख्यमध्यमनीचानि ४२ उपधातीतान्छलरहितान् श्रेष्ठेषुमंत्रकार्येषु
४३ ४४ ॥

पतितमितिव्यतिरेकदृष्टान्तः नावजानन्तिनावमन्यन्तेतत्रहेतुः उग्रप्रतिग्रहीतारं उग्रमितिक्रियाविशेषणं यद्वा उग्रंहिंसकंकर्मतेनप्रतिग्रहीतारंधनस्य प्रजापीडकमित्यर्थः
यथोक्तंप्रजापीडनसंतापात्समुद्भूतोमहानिलः राज्ञः प्राणान्बलंकोशंनादग्ध्वाविनिवर्ततइति तथाचनाशहेतुमेकाकिनः अवज्ञैवउचिताः तस्ययानन्नकर्तव्यमि
त्यर्थः कामयानंकामतोयानंपर्यटनंयस्यतंस्वैरिणमिव अप्रशस्तादर्शनप्रदत्वाच्चस्त्रियोयथावमन्यन्तेतद्वत् ४५ दृष्टोधनमानादिना ४६ दृष्टावदाताः प्रगल्भाः निःकप
टाश्चअतएवविक्रान्ताजयंकृतवन्तः एवंगुणाःस्वामिसंपदमुत्कान्तवृद्धिहेतुमाहत्वयासत्कृत्यमानिताइत्यादिना ४७ भक्तंअहरहर्देयंधान्यादिवेतनंमासान्तेदेयंवित्तं

कच्चित्त्वांनावजानंतियाजकाः पतितंयथा उग्रप्रतिग्रहीतारंकामयानमिवस्त्रियः ४५ कच्चिद्धृष्टश्चशूरश्चमतिमान्धृतिमांछुचिः
कुलीनश्चानुरक्तश्चदक्षः सेनापतिस्तव ४६ कच्चिद्बलस्यचमुख्याः सर्वेयुद्धविशारदाः दृष्टावदाताविक्रान्तास्त्वयासत्कृत्यमानिता
: ४७ कच्चिद्बलस्यभक्तंचवेतनंचयथोचितं संप्राप्तकालेदातव्यंददासिनविकर्षसि ४८ कालातिक्रमणाद्धेवभक्तवेतनयोर्भृता
भर्तुः कुर्वंत्यप्रियंभृत्याः सोनर्थःसुमहानस्मृतः ४९ कच्चित्सर्वेनुरक्तास्त्वांकुलपुत्राःप्रधानतः कच्चित्प्राणांस्तवार्थेषुसंत्यजंतिसदा।
युधि ५० कच्चिन्नैकोबहून्सर्वान्सर्वशः सांपरायिकान् अनुशास्तियथाकामंकामात्माशासनातिगः ५१ कच्चित्पुरुषकारेणपु
रुषः कर्मशोभयन् लभतेमानमधिकंभूयोवाभक्तवेतनं ५२ कच्चिद्विद्याविनीतांश्चनरान्ज्ञानविशारदान् यथार्हंगुणतश्चैव
दानेनाभ्युपपद्यसे ५३ कच्चिद्दारान्मनुष्याणांतवार्थेमृत्युमीयुषां व्यसनंचाभ्युपेतानांबिभर्षिभरतर्षभ ५४ कच्चिद्भयादुपगतं
क्षीणंवारिपुमागतं युद्धेवाविजितंपार्थपुत्रवत्परिरक्षसि ५५ ॥

विकर्षणंकालातिक्रमः ४८ दौर्गत्याद्दारिद्र्यात् ४९ प्रधानतः मंत्रिणामारभ्य मंत्रिप्रभृतयइत्यर्थः ५० सांपरायिकान्संग्रामहितान्वीरान्गजरथतुरग
रोहान्पदातींश्च अर्थान्प्रयोजनानिनानुशास्तिसर्वेष्वेकाधिपत्येनभेदेनसर्वनाशोयुगपदेवस्यादितिभावः ५१ कच्चित्पुरुषेणकृतश्लाघोभवतीतिभावः ५२ कच्चि
द्विद्येतिवृद्धिदानमानयसेतिभावः कच्चिद्दारानितिजीवतांशूराणांविश्वासार्थं व्यसनंचेतिपरलोकार्थं ५४ तेरेवाहयुद्धेवेति ५५ ॥ ॥ ॥

स०
१६

सर्वस्याशेतिप्रजानुकूल्यमपिजयेहेतुः ५६ एवंविजयहेतुंप्रकृतिसंपदमुक्त्वाविजयकालमाह कच्चिद्व्यसनिनमिति व्यसनैः स्त्रीद्यूतंमृगयामद्यंनृत्यंगीतंतथाटनं वाद्यं।
निद्रादिवास्वापोव्यसनानिरागादेशस्मृतैर्युक्तं त्रिविधंबलंमंत्रकोशभृत्यबलानि प्रभुमंत्रोत्साहसंज्ञकोवा ५७ पार्ष्णिमूलंपार्ष्णिग्राहकआदिर्यस्यतत्तद्द्वादशविधंमंडलं
तच्चोक्तंकामंदकीये अमात्यराष्ट्रदुर्गाणिकोशोदंडश्चपंचमः एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः संपन्नस्तुप्रकृतिभिर्महोत्साहः कृतश्रमः जेतुमेषणशीलश्चवि
जिगीषुरितिस्मृतः अरिर्मित्रमरेर्मित्रंमित्रमित्रमतः परं अथारिमित्रमित्रंचविजिगीषोः पुरस्कृताः पार्ष्णिग्राहस्ततः पश्चादाक्रंदस्तदनंतरं आसारावनयोश्चैवविजिगीषो
स्तुपृष्ठतः अरेश्चविजिगीषोश्चमध्यमोभूम्यनंतरः अनुग्रहेसंहतयोर्व्यस्तयोर्निग्रहेप्रभुः मंडलाद्बहिरेतेषामुदासीनोबलाधिकः अनुग्रहेसंहतानांव्यस्तानांचवधेप्रभुरि
ति विजिगीषुशत्र्वोर्मित्रे तन्मित्रेचेतित्रीणिद्वंद्वानिक्रमेणपुरतः विजिगीषोः पृष्ठतः पार्ष्णिग्राहाक्रंदौ पार्ष्णिग्रहः पृष्ठरक्षकः आक्रंदः प्रोत्साहकः एतयोरनुग्राह

कच्चित्क्षेमंवसर्वस्याः पृथिव्याः पृथिवीपते समश्चानभिशंक्यश्चयथामातायथापिता ५६ कच्चिद्व्यसनिनंशत्रुंनिशम्यभरतर्षभ
अभियासिजवेनैवसमीक्ष्यत्रिविधंबलं ५७ यात्रामारभसेदिष्ट्याप्राप्तकालमरिंदम पार्ष्णिमूलंचविज्ञायव्यवसायंपराजयं
५८ बलस्यचमहाराजदत्त्वावेतनमग्रतः कच्चिच्चबलमुख्येभ्यः परराष्ट्रेपरंतप उपच्छन्नानिरत्नानिप्रयच्छसियथार्हतः ५९

कोआसारौतत्रअग्रतःगतोपार्ष्णिग्रहासारआक्रंदासारश्चेतिदशपुरुषाः विजिगीषुशत्र्वोः पार्श्वमध्यमः सर्वेषांपार्श्वेउदासीनः इतिमंडलंपार्ष्णिमूलमित्युच्यते व्यवसायं
कृतनिश्चयं कृत्यंच अलब्धवेतनोलुब्धोमानीचाप्यवमानितः क्रुद्धश्चकोपितोकस्मात्तथाभीतश्चभीषितः यथाभिलषितैः कामैर्भिद्यादेतांश्चतुर्विधान् परकीया
न्स्वकीयांस्तुरक्षेद्विजयकामुकः इति। नीतिशास्त्रोक्तं पराजयंपराजयमूलानांव्यसनानांपरपक्षेसद्भावं स्वपक्षेचाभावंविज्ञायदिष्ट्याविशिष्टैर्दैवज्ञादिद्वाराज्ञातात्र
दैवव्यसनंपंचविधं मानुषंचपंचविधं यथोक्तंकामंदकीये हुताशनोजलंव्याधिर्दुर्भिक्षंमरकस्तथा इतिपंचविधंदैवंव्यसनंमानुषंपरं आयुक्तेभ्यश्चचोरेभ्यः परेभ्योरा
जवल्लभात् पृथिवीपतिलोभाच्चप्रजानांपंचधाभयमिति ५८ उपच्छन्नानिपरैरलक्ष्याणिरत्नानिउत्कृष्टवस्तूनिभेदायेत्यर्थः ५९ ॥ ॥ ॥

राम०
१६

स्वनुष्ठिताः शोभनेनप्रकारेणसम्यगनुष्ठिताः विधिवद्गुणाः येसामादयः विधिवत्अनुष्ठिताः संतोगुणाः हितायभवंतिअन्यथाविपरीताय यथोक्तमभियुक्तैः चतुर्यो
पायसाध्येतुरिपौसांत्वमपक्रियेति यद्वासामादयो वश्यमनुष्ठेयाः यद्वाषड्गुणाः संधिविग्रहयानासनद्वैधीभावसंश्रयाः विधिवदग्निहोत्रादिविधिवदवश्यानुष्ठेयाः
नरकारोस्वराष्ट्रभंगादिनाज्ञानेनप्रजापीडनेनराज्ञोदोषोत्पत्तिः ६१ मूलंस्वराज्यंपरदृष्टमन्यथिभिः शूरैरधिष्ठितंसततंदृढंपरानभिभाव्यंकृत्वा अष्टांगसंयुक्ता रथानाग
हयायोधाः पत्तयः कर्मकारकाः चारादेशिकमुख्याश्च ध्वजिन्यष्टांगिकामता। चतुर्विधबला मौलमैत्रभृत्याटविकैर्बलैर्युक्ता। बलमुख्यैः सेनापतिभिः प्रतिवर्धिनीमा

कच्चिदात्मानमेवाग्रे विजित्य विजितेंद्रियः पराञ्जिगीषसे पार्थ प्रमत्तानजितेंद्रियान् ६० कच्चित्रयास्यतः शत्रून्सर्वे यांति स्व
नुष्ठिताः सामदानं च भेदश्च दंडश्च विधिवद्गुणाः ६१ कच्चिन्मूलं दृढं कृत्वा परान्यासि विशांपते तांश्च विक्रमसे जेतुं जित्वा च परिरक्ष
सि ६२ कच्चिदष्टांगसंयुक्ता चतुर्विधबला चमूः बलमुख्यैः सुनीतैस्ते द्विषतां प्रतिवर्धिनी ६३ कच्चिल्लवं च मुष्टिं च परराष्ट्रे
परंतप अविहाय महाराज निहंसि समरे रिपून् ६४ कच्चित्स्वपरराष्ट्रेषु बहवोधिकृतास्तव अर्थान्समधितिष्ठंति रक्षंति च
परस्परं ६५ ॥ ॥

प्रातिकूल्येनछेदिनी ६३ लवः सस्यच्छेदनकालः मुष्टिः सस्यानांगोपनकालः दुर्भिक्षमितियावत् लूनच्छेदनेमुष्टौयेआम्यान्अधिकरणाघत्तिनोपरराष्ट्रेस्वेत्रेस्थ
पुसस्येषुसुखलभ्यान्नैर्दुर्भिक्षेचराजकुललक्षमक्तोपहतीविभिन्नैरन्नान्ताक्रांताः शत्रवः सुखेनजेयाइत्यर्थः ६४ स्वपरराष्ट्रेषुस्वेनिरक्षितार्थस्वराष्ट्रेइवपरराष्ट्रेऽपिवि
हावहवः अधिकृताः स्थानेस्थानेस्थिताः स्थानपमादयो अर्थान्प्रयोजनानिप्रजावशीकरणकार्यहरणादीनिरक्षंतिचपरस्परं संभूयपरकीयमागतंसेनापसा
रिकं अभिभूयराष्ट्रंस्वीयांश्चरक्षंतीत्यर्थः ६५

अभ्यवहार्याणि भक्ष्याणि गात्रसंस्पर्शनानि वस्त्राणि संघर्षणानीति पाठे चंदनागरुकुंकुमकस्तूरिकादीनि घ्रेयाणि उत्तमधूपादीनि अनुमताः विश्वस्ताः नवनीत ददर्थरक्षणे तेन तु देशान्तरे मन्नानि तानि सर्वमेव वशीकुर्वतीत्यर्थः ६५ कोशो धनगृहं कोशधान्यस्थानं ६७ आभ्यन्तरेभ्यः बाह्येभ्यः सेनापत्यादिभ्यः त्वत्तुभयाभ्यन्तरेभ्यः पुत्रामात्यादिभ्यः त्वान पिमिथः पुत्रममात्यादमाज्ञं च पुत्राद्रक्ष्यसि ६८ कच्चिन्नेति पानादिव्यसनजं अयं तव पूर्वाह्ने धर्माचरणकाले श्रमाः नमतिज्ञानन्तीति नावेदयन्ति आवेद

कच्चिदभ्यवहार्याणि गात्रसंघर्षणानि च घ्रेयाणि च महाराज रक्षंत्यनुमतास्तव ६६ कच्चित्कोशश्च कोष्ठं च वाहनं हारमायुधं आयश्च कृतकल्याणैस्तव भक्तैरनुष्ठितः ६७ कच्चिदाभ्यन्तरेभ्यश्च बाह्येभ्यश्च विशांपते रक्षस्यात्मानमेवाग्रे तांश्च स्वेभ्यो मिथश्च तान् ६८ कच्चिन्न पानैर्द्यूतैर्वा क्रीडाभिः प्रमदासु च प्रतिजानंति पूर्वाह्ने व्ययं व्यसनजं तव ६९ कच्चिदायस्य चार्द्धेन चतुर्भागेन वा पुनः पादभागैस्त्रिभिर्वापि व्ययः संशोध्यते तव ७० कच्चिज्ज्ञातीन् गुरून् वृद्धान् वणिजः शिल्पिनः श्रितान् अभीक्ष्णमनुगृह्णासि धनधान्येन दुर्गतान् ७१ कच्चिदायव्यये युक्ताः सर्वे गणकलेखकाः अनुतिष्ठंति पूर्वाह्ने नित्यमायं व्ययं तव ७२ कच्चिदर्थेषु संप्रौढान् हितकामाननुप्रियान् नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषं ७३ ॥ ॥ ॥

नेदितव्यानीमागताः शिष्टाः पुरोहितादयः पानादिदुर्व्यसनासक्तं त्वां ज्ञात्वा सर्वे युरितिभावः ६९ सुभिक्षसाम्यदुर्भिक्षेषु आयस्य पादेन पादाभ्यां त्रिभिः पादैर्वा व्ययः संशुद्ध्यते पूर्यते सर्वथापि कोशवृद्धिः कार्येतिभावः ७० दुर्गतान् दरिद्रान् ७१ अनुतिष्ठंतीति निवेदयंतीति ७२ अनुप्रीरत्त्व हितकामस्त्वज्ञानानंतरं प्रियान् कर्मभ्योपकर्षः अधिकारच्युतिः सा च पूर्वं किल्बिषमप्राप्य दोषमदृष्ट्वा न कर्तव्येत्यर्थः ७३ ७३ ७३

७४ अप्राप्तमव्यवहाराः अभीरवः ७५ ७६ देवमातृका वृष्टिनिष्पाद्यसस्याः ७७ प्रत्येकं चरणं। प्रतिशतं एकं वृद्ध्येति संबंधः। एकैकः प्रतिमासं वर्द्धनीय इत्यर्थः पादिकं
चरणं तस्य इति पादः तुर्यस्य चरणत चतुर्थांशो वृद्धिः तथा च किंचिदधिका द्धनात् वृद्धिः। आधमर्ण्य बंधके वृद्धिरन्यत्र निर्बंधके इति विभागः यत्तु द्विकं त्रिकं चतुष्कं च पंचकं च समं शते
ते मासस्य वृद्धिं हरेत् इति पादादिति त्रिकादि पक्षस्तु आधमर्णिक व्यवसायानुसारेणेति ज्ञेयं ७८ वार्त्ता कृषिर्वाणिज्यं पाशुपाल्यं कुसीदं चेति चतुर्विधा ७९
कश्चिच्छूरा इति। प्रतिग्रामं पंच पंच इति स्वनुष्ठिताः भनमनुष्ठितमनुष्ठानं येषां ते तथा। तेच प्रशास्ता समाहर्त्ता संविधाता लेखकः साक्षी चेति समाहर्त्ता प्रजाभ्यो द्रव्यमुद्धृत्य

कश्चिद्धिद्विलाघुरुत्वानुत्तमाधममध्यमान् तत्कर्मस्वनुरूपेषु नियोजयसि भारत ७४ कच्चिन्नलुब्धाश्चोरा वा वैरिणो वा विशांपते अप्रा
प्तव्यवहारा वा तव कर्मस्वनुष्ठिताः ७५ कच्चिन्न चौरैर्लुब्धैर्वा कुमारैः स्त्रीबलेन वा त्वया वा पीड्यते राष्ट्रं कच्चित्तुष्टाः कृषीवलाः ७६
कच्चिद्राष्ट्रे तडागानि पूर्णानि च बृहंति च भागशो विनिविष्टानि न कृषिर्देवमातृका ७७ कच्चिन्न बीजं भक्तं च कर्षकस्यावसीदति पादि
कं च शतं वृद्ध्या ऋणं ददास्यनुग्रहं ७८ कच्चित्स्वनुष्ठिता तात वार्त्ता ते साधुभिर्जनैः वार्त्तायां संश्रितस्तात लोकोयं सुखमेधते ७९ क
च्चिच्छूराः कृतप्रज्ञाः पंच पंच स्वनुष्ठिताः क्षेमं कुर्वंति संहत्य राजन् जनपदे तव ८० कच्चिन्नगरगुप्त्यर्थं ग्रामा नगरवत्कृताः ग्रामवच्च कृ
ता घोषाः तेच सर्वे त्वदर्पणाः ८१

कीकृत्य राज्ञे प्रेषयिता संविधाता प्रजासमाहर्त्ता एकवाक्यताधारकः संहत्य एकीभूय ८० नगरवदित्यनेन वह्नभिः शूरैरधिष्ठिता ग्रामाः वह्नतेरेन नगराणि वत्वक्तानि धर्मजेन
परेश्वरस्थानं पुरसंज्ञं ग्रामाः स्वल्पजनवत्कृताः आपणादियुक्तं नगरं प्रांताः सीमास्थाः आरण्यकानां ग्रामाः तेच सर्वे त्वदर्पणाः प्रांतग्रामनगरपुरेशानां त्वय्येव कृता
कृत्स्नधनस्य चार्पणं निवेदनं येषां ते तथाभूताः प्रांताधिपो ग्रामाधिपतौ सोपि नगराधिपतौ सोपि देशाधिपतौ सोपि साक्षात्त्वयि सर्वं निवेदयंतीत्यर्थः ८१

विषमाणिसदुर्गाणि निघ्नंतोयेचरंतितान्बलेनसहितः पुराध्यक्षोनुरक्तैर्विदित्सर्थः समेषुविषमेष्वपीतिपाठविषमेषुइति कालेषु अतिवृष्ट्याद्यईतयः २२ आसांवच
ने आसांपुरस्त्रगुरुत्सनमाषसे २३ आत्मपिकंभकल्याणं २४ पश्चिमेचतुर्थेतस्मादेवद्वौप्रथमेमोद्वितीयत्ततीयाविसर्थः २५ २७ यमवत्तसहिदंस्येषुकूरः

कच्चिद्बलेनानुगताः समेषुविषमेषुच पुराणिचोरा न्निघ्नंतश्चरंतिविषयेतव २२ कच्चित्स्त्रियः सांत्वयसिकच्चिन्ताश्चसुरक्षिता
ःकच्चिन्नश्रद्धास्यासांकच्चिद्गुह्यंनभाषसे २३ कच्चिदात्ययिकंश्रुत्वातदर्थमनुचिंतयच प्रियाण्यनुभवन्शेषेनत्वमंतः पुरेनृप
२४ कच्चिद्द्वौप्रथमौयामौरात्रेः सुप्त्वाविशांपते संचिंतयसिधर्मार्थौयामउत्थायपश्चिमे २५ कच्चिद्दर्शयसेनित्यंमनुष्याण्मं
डलेकृतः उत्थायकालेकालज्ञैः सहपांडवमंत्रिभिः २६ कच्चिद्रक्तांवरधराः खड्गहस्ताः स्वलंकृताः उपासतेत्वामभितोर
क्षणार्थमरिंदम २७ कच्चिद्दंड्येषुयमवत्पूज्येषुचविशांपते परीक्ष्यवर्तसेसम्यगप्रियेषुप्रियेषुच २८ कच्चिच्छारीरमाबा
धमौषधैर्नियमेनवा मानसंवृद्धसेवाभिः सदापार्थापकर्षसि २९ कच्चिद्वैद्याश्चिकित्सायामष्टांगायांविशारदाः सुहृ
दश्चानुरक्ताश्चशरीरेतेहिताः सदा ३०

वृद्धेषुविनयवानन्नहत २४ आबाधंदुःखंनियमेनयथ्याशनादिना मानसमाबाधंअष्टांगायांचिकित्सायां निदानंपूर्वलिंगानि रूपाण्युपशमस्तथासंप्राप्तिरो
गधीरोगीपरिचारकस्वेचेति अष्टावंगानि अथवारोगोरोगहेतुः आरोग्यमारोग्यहेतुः तेषांलक्षणानिच ३० ॥ ॥ ॥

अर्थिनः याचकाः प्रत्यर्थिनः परंपरागतवृत्तिप्रतिबंधात् क्षुध्याविन्नाः प्रोत्सपतदर्थिनः शत्रवोवानपश्यदृष्ट्येनपश्यसीदेवेतिउच्यते ९१ ९३ कच्चिन्नेति येति बलेन पूर्वपरिपी
डितः सवनदत्तः सएवकालान्तरे मंत्रेणउभाभ्यां मंत्रबलाभ्यां कश्चिद्बलवान्तिष्ठतियोजना कच्चिन्नेति पादे तेनच बलेसैन्ये योरिः पूर्वपीडितः तस्माद्दिष्टस्तेवत् ९४ प्रधानतः प्रा
धान्येन हृताः दानमानाभ्यां वशीकृताः आहृताश्रितिवापाठः ९५ विद्यासु साधूनां ब्राह्मणानां गुरूणां तेषां गुरुं दृष्ट्वाः चाद्दनप्रवर्त्तते ॥ ९६ ९७ तथा कर्तुं वैराच

कच्चिन्नलोभान्मोहाद्वामानाद्वापिविशांपते अर्थिप्रत्यर्थिनः प्राप्तान्नपश्यसिकथंचन ९ कच्चिन्नलोभान्मोहाद्वाविश्रंभात्प्रणयेन
नवा आश्रितानांमनुष्याणांवृत्तिंत्वंसंहरस्यपिवै ९२ कच्चिद्वैराजनसहितायिचेतराष्ट्रवासिनः त्वयासहविरुध्यन्तेपरैः क्रीताः कथंचन
९३ कच्चित्तेदुर्बलः शत्रुर्बलेनपरिपीडितः मंत्रेणबलवान्कश्चिदुभाभ्यांवकथंचन ९४ कच्चित्सर्वेनुरक्तास्त्वांभूमिपालाः प्रधानतः
कच्चित्प्राणांस्त्वदर्थेषुसंत्यजंतित्वयाहृताः ९५ कच्चित्तेसर्वविद्यासुगुणतोर्चाप्रवर्त्तते ब्राह्मणानांचसाधूनांतववैनः श्रेयसीसुभा दक्षि
णात्वंरहस्यैर्णानित्यंस्वर्गापवर्गयोः ९६ कच्चिद्धर्म्मेत्रयीमूलेपूर्वैराचरितेजनैः यतमानस्तथाकर्तुंतस्मिन्कर्म्मणिवर्त्तसे ९७ क
च्चित्तवगृहेहव्यानिस्वाहस्मृतिमिवेद्विजाः गुणवंतिगुणोपेतास्त्वयाधर्मसरक्षिणा ९८ कच्चित्क्रतूनेकचित्तोवाजपेयांश्चसर्वशः पुंड
रीकांश्चकार्त्स्न्येनयतसेकर्तुमात्मवान् ९९ कच्चिज्ज्ञातीन्गुरून्वृद्धान्दैवतान्तापसानपि चैत्यांश्चवृक्षान्कल्याणान्ब्राह्मणांश्च
नमस्यसि १०० कश्चिच्छोकेनमन्युर्वात्वयाप्रोत्साद्यतेनघ अपिमंगलहस्तश्चजनः पार्श्वेनुतिष्ठति १०१

रितवर्त्मं तस्मिन्त्रयीमूले तवाध्यक्षं तत्समक्षं सदक्षिणां सदाक्षिणालाभं यथास्यात्तथाः इति ९८ ९९ चैत्यान्ग्रस्थ्यशिलवतोग्रामस्यचकान्वृक्षान् १०० शोकः
नीचानां मन्युः अशानां मंगलहस्तो मंगलप्रदो मंत्रादिवित्पुरोहितादिः अनुतिष्ठति स्वस्त्ययनं करोति १०१ १०१

याएषाद्दशनीहन्निरर्शिसैवसावेदिकीकच्चित्तस्मीत्यर्थः १०२ १०३ कच्चिदार्य्यइतिआर्य्योविशुद्धात्मावसन्नपिकस्मिंश्चिन्निंद्यकर्म्मणिनिमित्तेक्षारितोधनधान्यादिनारि
क्तः कृतोराजभिः कृतदंडास्तस्यशुद्धंतिमलिनाजनाइत्यादिशास्त्रप्रमाणपात्तुशुचिरपिसन्नदृष्टशास्त्रकुशलैरनुपासितपंडितैर्मूर्खैरमात्यैः कच्चिन्नवध्यतेहन्यते ऽधिकध
नलोभात् अदृष्टइतिसविसर्गपाठेतुशास्त्रकुशलैरमात्यैरज्ञानइत्यर्थः १०४ दुष्टः स्वभावतः तस्करोदुष्टकर्म्मकारी तस्करैवं चोरान्वेषिभिः क्रोष्टुपालैः दृष्टः सकारणः

कच्चिदेषाचतेवृद्धिर्हेत्तिरेषाचतेनघ आयुष्याचयशस्याचधर्मकामार्थदर्शनी १०२ एतयावृत्तयामानस्यबुध्यारांऽसमीदृशि विनिसच्चमहीराजा
सोऽस्यंतंसुखमेधते १०३ कच्चिदार्योविशुद्धात्माक्षारितश्चोरकर्म्मणि अदृष्टशास्त्रकुशलैर्नलोभाद्वध्यतेशुचिः १०४ दुष्टोगृहीतस्तत्कारी
तद्दैतेदृष्टः सकारणः कच्चिन्नमुच्यतेस्तेनोद्रव्यलोभान्नरर्षभ १०५ उत्पन्नान्कच्चिदाढ्यस्यदरिद्रस्यचभारत अर्थान्नमिथ्यापश्यंतितवा।
मात्याहृताजनैः १०६ नास्तिक्यमनृतंक्रोधंप्रमादंदीर्घसूत्रतां अदर्शनंज्ञानवतामालस्यंक्षिप्तचित्तता एकचिंतनमर्थानामनर्थज्ञै
श्चचिंतनं १०७ निश्चितानामनारंभंमंत्रस्यापरिरक्षणं अमंगल्यप्रयोगंचसंगमंविषयेषुच १०८ कच्चित्त्वंवर्जयस्येतान्राजन्
दोषांश्चतुर्दश प्रायशोयैर्विनश्यंतिकृतमूलाऽपिपार्थिवाः १०९ कच्चित्तेसफलावेदाः कच्चित्तेसफलंधनं कच्चित्तेसफलादाराः क
च्चित्तेसफलंश्रुतं ११०

चोरितंद्रव्यसहितोविध्यतश्चनियोजना १०५ उत्पन्नानि चोवार्थे आढ्यस्यदरिद्रस्यवाऽर्थान्उत्पन्नान्वीजकणिशान्यायेनस्वल्पकालेनैववहुगुणांवृद्धिंप्राप्तानृतवत्त्व।
मात्याः मिथ्याऽत्रनृतानंचौर्य्यादिनाऽन्यायेनार्जितानितिकच्चिन्नपश्यंतिजनैः पिशुनैः हृतान्दृष्टविवेकाः पा ऽंगतेरर्थैर्नेष्टनाः वशीकृताः लुब्धोहिलिप्सुः परत्रासंततमपि
दोषमारोप्यतद्दित्तजिही र्षतीतिप्रसिद्धं १०६ नास्तिक्यमित्यादिसार्द्धश्लोकत्रयंव्याख्यातं १०९ ११० ११० ११०

११३ कच्चिदभ्यागता इति अवहार्यन्ते दाप्यन्ते शुल्कं राजग्राह्यं करं १०४ पण्यानि विक्रेयद्रव्याणि उपधाभिः छलैः ११५ ११६ कृषितंत्रे कृषुकर्मसु गोषु पुष्पफलेषु आर्द्रे शुष्के धान्ये
अन्तर्थागोषु जातेषु पुष्पफलेषु दुग्धघतं पञ्चसु एतेषु मधुसर्पिषी अन्नं वै मधु करोति अतो धान्यादिकमन्नं घृतं च यल्लोके वृत्त्यन्तरमिति सूच्यते १७ द्रव्यं शिल्पिनां

युधिष्ठिर उवाच कथं वै सफला वेदाः कथं वै सफलं धनं कथं वै सफला दाराः कथं वै सफलं श्रुतं ११ नारद उवाच अग्निहोत्र
फला वेदा दत्तभुक्तफलं धनं रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतं १२ वैशंपायन उवाच एतदाख्याय स मुनिर्नारदो वै महात
पाः पप्रच्छानंतरमिदं धर्मात्मानं युधिष्ठिरं १३ नारद उवाच कच्चिदभ्यागता दूराद्वणिजो लाभकारणात् यथोक्तमवहार्यन्ते शुल्कं शु
ल्कोपजीविभिः १४ कच्चित्ते पुरुषा राजन्पुरे राष्ट्रे च मानिताः उपानयन्ति पण्यानि उपधाभिरवंचिताः १५ कच्चिच्छृणोषि
वृद्धानां धर्मार्थसहिता गिरः नित्यमर्थविदां तात यथा धर्मार्थदर्शिनां १६ कच्चित्ते कृषितंत्रेषु गोषु पुष्पफलेषु च धर्मार्थं च द्वि
जातिभ्यो दीयते मधुसर्पिषी १७ द्रव्योपकरणं किंचित्सर्वदा सर्वशिल्पिनां चातुर्मास्यावरं सम्यङ् नियतं संप्रयच्छसि १८
कच्चित्कृतं विजानीषे कर्तारं च प्रशंससि सतां मध्ये महाराज सत्करोषि च पूजयन् १९ ॥ ॥ ॥

वेतनं उपकरणं स्वकार्यसाधनसामग्री यथा चित्रकारस्य रंजकद्रव्यादि चातुर्मास्यावरं मासचतुष्टयपर्याप्तं न्यूनाधिकं १८ १९ ॥

स्त्रं संक्षेपवाक्यं अवस्थावाहस्त्यादीनां लक्षणपरीक्षाचिकित्सौषधोद्दीपनमाहनादिप्रकारप्रतिपादकं ग्रंथाः सिद्धांतमात्रं संक्षेपयुक्तान्यूरहस्यसितं नराचार्येभ्यः २० यंत्राणि अग्नेयोषधबलेन सीसकाश्मादिगोलप्रक्षेपकाणि लोहमयानि भाषायां नालशब्दाभिधेयानि तेषां सूत्रं सूचकं शास्त्रं नागरं नगरहितं २१ अस्त्राणि मंत्रप्रयुक्तानि शस्त्राणि ब्र

कच्चित्सूत्राणि सर्वाणि गृह्यसि भरतर्षभ हस्तिसूत्राश्वसूत्राणि रथसूत्राणि वा विभो १२० कच्चिदभ्यस्यते सम्यग्गृहे ते भरतर्षभ धनुर्वेदस्य सूत्रं वै यंत्रसूत्रं च नागरं २१ कच्चिदस्त्राणि सर्वाणि ब्रह्मदंडश्च तेऽनघ विषयोगास्तथा सर्वे विदिताः शत्रुनाशनाः २२ कच्चिदग्निभयाच्चैव सर्पव्यालभयात्तथा रोगरक्षोभयाच्चैव राष्ट्रं स्वं परिरक्षसि २३ कच्चिदंधांश्च मूकांश्च पंगून्व्यंगानबांधवान् पितेव पासि धर्मज्ञ तथा प्रव्रजितानपि २४ षडनर्था महाराज कच्चित्ते पृष्ठतः कृताः निद्रालस्यं भयं क्रोधो मार्दवं दीर्घसूत्रता २५ वैशंपायन उवाच ततः कुरूणामृषभो महात्मा श्रुत्वा गिरो ब्राह्मणसत्तमस्य प्रणम्य पादावभिवाद्य तुष्टो राजाब्रवीन्नारदं देवरूपं २६ युधिष्ठिर उवाच एवं करिष्यामि यथा त्वयोक्तं प्रज्ञा हि मे भूय एवाभिवृद्धा उक्त्वा तथा चैव चकार राजा लेभे महीं सागरमेखलां च २७ नारद उवाच एवं यो वर्तते राजा चातुर्वर्ण्यस्य रक्षणे स विहृत्येह सुसुखी शक्रस्यैति सलोकतां २७ ६स्याध्यायः ॥ ॥

स्त्रदंडः आभिचारिकविद्या २२ व्यालः सर्पः व्याघ्रादेरप्येतदुपलक्षणं २३ प्रव्रजितान् जातिबहिष्कृतान् अन्नमात्रार्थिनो दीनान् १२४ १२७ उपसंहरति एवं यो वर्ततेत्यादि २७ इति नैलकंठीये भारतभावदीपे सभापर्वणि कच्चिदध्यायविवरणं समाप्तं ॥ ॥ ॥ ॥ ॥

संपूज्याथाभ्यनुज्ञात इति १६ दिव्यसभालाभगर्वितो युधिष्ठिर उवाच भवानिति संचरते समागम्य छीतिसत्वेगामेर्गस्यर्थमात्रोपलक्षणपरत्वान्नचेरेरपितङ् कर्मव्यतिहा
रेवातङ् संलोकेषु संचरसि लोकाश्च हार्दाकाशनिष्ठत्वापि संचरतीतिवार्थः तेनसर्वज्ञत्वमुक्तं पूर्वंमनुष्यसृष्टेः प्राक्निर्मितान्देवलोकानित्यर्थः क्वचिदितिदेवलो

इतिमहाभारतेसभापर्वणियुधिष्ठिरनारदप्रश्नोनाम वैशंपायनउवाच संपूज्याथाभ्यनुज्ञातोमहर्षेर्वचनात्परं प्रत्युवाचानुपूर्व्येण
धर्मराजोयुधिष्ठिरः १ भगवन्न्याय्यमाहैतंयथावद्धर्मनिश्चयं यथाशक्तियथान्यायंक्रियतेयंविधिर्मया २ राजभिर्यद्यथाकार्यं
पुरावैतन्नसंशयः यथान्यायोपनीतार्थंकृतंहेतुमदर्थवत् ३ वयंतुसत्पथंतेषांयातुमिच्छामहेप्रभो नतुशक्यंतथागंतुंयथातै
नियतात्मभिः ४ वैशंपायनउवाच एवमुक्त्वासधर्मात्मावाक्यंतदभिपूज्यचमुहूर्तात्प्राप्तकालंचदृष्ट्वालोकचरंमुनिं ५ ना
रदंसुस्थमासीनमुपासीनोयुधिष्ठिरः अपृच्छत्पांडवस्तत्रराजमध्येमहाद्युतिं ६ युधिष्ठिरउवाच भवान्संचरतेलोकान्स
दानानाविधान्बहून् ब्रह्मणानिर्मितान्पूर्वंप्रेक्षमाणोमनोजवः ७ ईदृशीभवताकाचिद्दृष्टपूर्वासभाक्वचित् इतोवाश्रेय
सीब्रह्मंस्तन्ममाचक्ष्वपृच्छतः ८ वैशंपायनउवाच तच्छ्रुत्वानारदस्तस्यधर्मराजस्यभाषितं पांडवंप्रत्युवाचेदंस्मयन्मधुरया
गिरा ९ नारदउवाच मानुषेषुनमेतातदृष्टपूर्वानचश्रुता सभामणिमयीराजन्यथेयंतवभारत १० ॥

कापेक्षयामनुष्यलोके क्वचित्कालेवा भविताभवित्री अनागतदर्शित्वात्तवेत्त इपिविदितमेवेत्यर्थः ८ स्मयन्युधिष्ठिरेपिगर्वोस्तुतेदेवतामहाभाग्याज्ज्ञानं
चेतिविस्मयंप्राप्नुवन् ९ मानुषेषुनदृष्टानश्रुतेतिअग्रेपिनदृश्यतेनश्रोष्यते दैवकल्पसमानत्वपरत्वादुत्तरस्यापीत्यर्थः १० ॥ ॥ ॥

स० २१

कैलासेतिकुबेरस्येत्यर्थः ११ गतक्लमांश्रविघादिक्लेशैर्वर्जितां तेनदृष्टवांस्तत्सदृशांसभांत्वंजानासि दिव्यदिव्यैरिति दिव्यादिविभवाः रंभोर्वश्यादयः अदिव्यास्तदन्येमानुषाः पित्रादयः सयदिपितृलोककामोभवतिसंकल्पादेवास्यपितरः समुत्तिष्ठंतीतिनसपितृलोकेनसंपन्नोमहीयतइतिब्रह्मलोकेतत्सत्वस्यापिश्रवणात् अभिप्रेयंतेसंकल्प

सभांतुपितृराजस्यवरुणस्यचधीमतः कथयिष्येतथेंद्रस्यकैलासनिलयस्यच ११ ब्रह्मणश्चसभांदिव्यांकथयिष्येगतक्लमां दिव्यादिव्यैरभिप्रायैरुपेतांविश्वरूपिणीं १२ देवैः पितृगणैः साध्यैर्यज्वभिर्नियतात्मभिः जुष्टांमुनिगणैः शांतैर्वेदयज्ञैःसदक्षिणैः यदितेश्रवणेबुद्धिर्वर्त्ततेभरतर्षभ १३ नारदेनैवमुक्तस्तुधर्मराजोयुधिष्ठिरः प्रांजलिर्भ्रातृभिःसार्द्धंतैश्चसर्वैर्द्विजोत्तमैः १४ नारदंप्रत्युवाचेदंधर्मराजोमहामनाः सभाःकथयतांसर्वाःश्रोतुमिच्छामहेवयं १५ किंद्रव्यास्ताःसभाब्रह्मन्किंविस्ताराःकिमायताः पितामहंचकेतस्यांसभायांपर्युपासते १६ वासवंदेवराजंचयमंवैवस्वतंचके वरुणंचकुबेरंचसभायांपर्युपासते १७ एतत्सर्वंयथान्यायंदेवर्षेवदतस्तव श्रोतुमिच्छामसहिताःपरंकौतूहलंहिनः १८ एवमुक्तःपांडवेननारदःप्रत्यभाषत क्रमेणराजन्दिव्यास्ताःश्रूयंतामिहनःसभाः १९ सभापर्वणि नारदउवाच शक्रस्यतुसभादिव्याभास्वराकर्मनिर्मिता स्वयंशक्रेणकौरव्यनिर्जितार्कसमप्रभा १ ॥ ॥

तदनभिप्रायाःविषयाःतैःविश्वरूपिणींभावकसंकल्पानुसा[illegible]रिनानारूपवतीं मानसीमित्यर्थः १३ जुष्टांसेवितां यदिश्रवणेबुद्धिर्वर्त्ततेतर्हिकथयिष्येइति पूर्वेणसंबंधः १९ अध्यायः शक्रस्येति कर्मभिर्विश्वकर्मणायत्नैःनिर्मिता शक्रेणजितांचेतिसंबंधः २ २ २ २

स० २१

अध्यर्द्धमर्द्धमायताद्दीर्घा वैहायसी खेचरी २ निरातंका निर्भया शिवा शंजनना शुभा कल्याणावहा ३ शच्या नामतः श्रिया शोभया ४ ५ मरुतो गृहमेधिन इति सा

विस्तीर्णा योजनशतं शतमध्यर्द्धमायता वैहायसी कामगमा पंचयोजनमुच्छ्रिता: २ जराशोकक्लमापेता निरातंका शिवा शुभा वेश्मा
सनवती रम्या दिव्यपादपशोभिता ३ तस्यां देवेश्वर: पार्थ सभायां परमासने आस्ते शच्या महेन्द्राण्या श्रिया लक्ष्म्या च भारत ४ बि
भ्रद्वपुरनिर्देश्यं किरीटी लोहितांगद: विरजोंबरश्चित्रमाल्यो ह्रीकीर्त्तिद्युतिभि: सह ५ तस्यामुपासते नित्यं महात्मानं शतक्रतुं मरुत:
सर्वशो राजन्सर्वे च गृहमेधिन: ६ सिद्धा देवर्षयश्चैव साध्या देवगणास्तथा मरुत्वन्तश्च सहिता भास्वन्तो हेममालिन: ७ एते सानुच
रा: सर्वे दिव्यरूपा: स्वलंकृता: उपासते महात्मानं देवराजमरिंदमं ८ तथा देवर्षय: सर्वे पार्थ: शक्रमुपासते अमला धूतपाप्मा
नो दीप्यमाना इवाग्नय: ९ तेजस्विन: सोमसुतो विशोका विगतज्वरा: पराशर: पर्वतश्च तथा सावर्णिगालवौ १० शंखश्च लि
खितश्चैव तथा गौरशिरा मुनि: दुर्वासा: क्रोधन: श्येनस्तथा दीर्घतमा मुनि: ११ पवित्रपाणि: सावर्णिर्याज्ञवल्क्योथ भालुकि: उ
द्दालक: श्वेतकेतुस्ताण्ड्यो भांडायनिस्तथा १२ हविष्मांश्च गरिष्ठश्च हरिश्चंद्रश्च पार्थिव: हृद्यश्चोदरशांडिल्य: पाराशर्य: कृषीव
ल: १३ वातस्कंधो विशाखश्च विधाता काल एव च करालदन्तस्त्वष्टा च विश्वकर्मा च तुंबुरु: १४ अयोनिजा योनिजाश्च
वायुभक्षा हुताशिन: ईशानं सर्वलोकस्य वज्रिणं समुपासते १५ १५ १५

मानाधिकरण्यं सोमसुतः सोमाभिषवकर्त्तारः सोमयाजिन इति यावत् १० १५ १५ १५ १५

१९ अर्थः अर्थाद्यभिमानिन्यो देवताः २० अद्यरोगात्मस्ते आग्निरंगिरा इति विश्रुतः दक्षिणाग्निर्गार्हपत्यस्याहवनीयादितित्रयी निर्मथ्यो वैद्युतः शूरः संवर्तो लौकिकस्तथा
जाठरो विषगः क्रव्यात्क्षेमवान्वैष्णवस्तथा दस्युमान्वलदश्चैव शांतः पुष्टो विभावसुः ज्योतिष्मान्भरतो भद्रः स्विष्टकृद्वसुमान्क्रतुः सोमश्च पितृमांश्चैव पावकाः सप्त

सहदेवः सुनीथश्च वाल्मीकिश्च महातपाः समीकः सत्यवांश्चैव प्रचेताः सत्यसंगरः १६ मेधातिथिर्वामदेवः पुलस्त्यः पुलहः क्रतुः मरुत्त
श्च मरीचिश्च स्थाणुश्चात्रिर्महातपाः १७ कक्षीवान्गौतमस्तार्क्ष्यस्तथा वैश्वानरो मुनिः मुनिः कालकवृक्षीय आश्राव्योऽथ हिरण्मयः १८
संवर्तो देवहव्यश्च विष्वक्सेनश्च वीर्यवान् दिव्या आपस्तथौषध्यः श्रद्धा मेधा सरस्वती १९ अर्थो धर्मश्च कामश्च विद्युतश्चैव पाण्डव जलवाहा
स्तथा मेघा वायवस्तनयित्नवः २० प्राची दिग्यज्ञवाहाश्च पावकाः सप्तविंशतिः अग्नीषोमौ तथैन्द्राग्नी मित्रश्च सवितार्यमा २१ भगो विश्वे
च साध्याश्च गुरुः शुक्रस्तथैव च विश्वावसुश्चित्रसेनः सुमनास्तरुणस्तथा २२ यज्ञाश्च दक्षिणाश्चैव ग्रहास्तोभाश्च भारत यज्ञवाहाश्च ये
मंत्राः सर्वे तत्र समासते २३ तथैवाप्सरसो राजन् गंधर्वाश्च मनोरमाः नृत्यवादित्रगीतैश्च हास्यैश्च विविधैरपि २४ रमयंति स्म नृपते देव
राजं शतक्रतुं स्तुतिभिर्मंगलैश्चैव स्तुवंतः कर्मभिस्तथा २५ विक्रमैश्च महात्मानं वलवृत्रनिषूदनं ब्रह्मराजर्षयश्चैव सर्वे देवर्षयस्त
था २६ विमानैर्विविधैर्दिव्यैर्दीप्यमाना इवाग्नयः स्रग्विणो भूषिताः सर्वे यांति [illegible] चायांति चापरे २७ बृहस्पतिश्च शुक्रश्च नित्य
मास्तां हि तत्र वै एते चान्ये च बहवो महात्मानो यतव्रताः २८ विमानैश्चंद्रसंकाशैः सोमवत्प्रियदर्शनाः ब्रह्मणः सदृशा राजन् भृगुः सप्त
र्षयस्तथा २९ एषा सभा मया राजन् दृष्टा पुष्करमालिनी शतक्रतोर्महाबाहो याम्यामपि सभां शृणु ३० इति सभापर्वणि इन्द्रसभावर्ण
नं नाम ॥ ॥ स१

विंशतिः २१ २२ सर्वयज्ञदक्षिणाद्यः २३ २९ पुष्करमालिनीनामतः ३० अध्यायः ॥ ॥ ॥ ॥ ॥

१ तैजसी ज्योतिर्मयी सौवर्णी वा भूयसी महती पूर्वं सभातः २ सर्वतः कामरूपिणी यस्यां सर्वं वस्तु संकल्पसमकालमेव सर्वात्मकं भवतीत्यर्थः ३ ४ कामाः काम्यमा
नाविषयाः प्रभूतं बहु भक्ष्यं अपूपादि भोज्यं क्षीरान्नादि ५ लेह्यं खण्डशर्करादि चोष्यं इक्षुखण्डादि स्रजः पंक्तयः तस्या भक्ष्याद्यन्नस्य कामफलाः आम्रादयः पि

नारद उवाच कथयिष्ये सभां याम्यां युधिष्ठिर निबोध मां वैवस्वतस्य यां पार्थ विश्वकर्मा चकार ह १ तैजसी सा सभा राजन् बभूव शत
योजना विस्तारायामसम्पन्ना भूयसी चापि पाण्डव २ अर्कप्रकाशा भ्राजिष्णुः सर्वतः कामरूपिणी नातिशीता न चात्युष्णा मनस
श्च प्रहर्षिणी ३ न शोको न जरा तस्यां क्षुत्पिपासे न चाप्रियं न च दैन्यं क्लमो वापि प्रतिकूलं न चाप्युत ४ सर्वे कामाः स्थितास्तस्यां
ये दिव्या ये च मानुषाः रसवच्च प्रभूतं च भक्ष्यं भोज्यमरिंदम ५ लेह्यं चोष्यं च पेयं च हृद्यं स्वादु मनोहरं पुण्यगंधाः स्रजस्तत्र नित्यं
कामफला द्रुमाः ६ रसवंति च तोयानि शीतान्युष्णानि चैव ह तस्यां राजर्षयः पुण्यास्तथा ब्रह्मर्षयोऽमलाः ७ यमं वैव
स्वतं तात प्रहृष्टाः पर्युपासते ययातिर्नहुषः पूरुर्मांधाता सोमको नृगः ८ त्रसदस्युश्च राजर्षिः कृतवीर्यः श्रुतश्रवाः अ
रिष्टनेमिः सिद्धश्च कृतवेगः कृतिर्निमिः ९ प्रतर्दनः शिबिर्मत्स्यः पृथुलाक्षो बृहद्रथः वार्त्तो मरुत्तः कुशिकः सांकाश्यः
सांकृतिर्ध्रुवः १० चतुरश्वः सदश्वोर्मिः कार्त्तवीर्यश्च पार्थिवः भरतः सुरथश्चैव सुनीथो निशठो नलः ११ दिवोदास
श्च सुमनाश्चैव अंबरीषो भगीरथः व्यश्वः सदश्वो वध्र्यश्वः पृथुवेगः पृथुश्रवाः १२ पृषदश्वो वसुमनाः क्षुपश्च सुमहाबलः
रुषद्गुर्वृषसेनश्च पुरुकुत्सो ध्वजी रथी १३

पनसादिकं फलसम्भवति कामानुसारादित्यर्थः १३ १३ १३ १३

स०
२३

१७ रामइति रामलक्ष्मणयोर्विष्णुशेषरूपेण स्वस्थानस्थयोरपि प्रतिमारूपेणाऽयामकानुग्रहार्थमत्रावस्थानं बोध्यं १८ धृतराष्ट्रस्यैक शततमिति पुराणेषु प्रायेणाधिका
राणामेवकीर्त्तनं तेषां च प्रतिकल्पं समाननामरूपकर्मत्वादनेककल्पधर्मसभावासिनां तेषां च उक्तं युक्तं सेनापत्यादिशब्दवदधिकारवाचित्वाद्धृतराष्ट्रादिशब्दानां १३

ऋषिर्षेणो दिलीपश्च महात्मा चाप्युशीनरः औशीनरिः पुंडरीकः शार्य्यातिः शरभः शुचिः १४ अंगोरिष्टश्च वेनश्च दुष्यंतः संजयो
जयः भांगासुरिः सुनीथश्च निषधोथ वहीनरः १५ करंधमो वाह्लिकश्च सुद्युम्नो बलवान्मधुः ऐलो मरुत्तश्च तथा बलवान्पृथिवीप
तिः १६ कपोतरोमा तृणकः सहदेवार्जुनौ तथा अश्वः साश्वः कृशाश्वश्च शशबिंदुश्च पार्थिवः १७ रामो दाशरथिश्चैव लक्ष्म
णोथ प्रतर्दनः अलर्कः कक्षसेनश्च गयो गौराश्व एव च १८ जामदग्न्यश्च रामश्च नाभागसगरौ तथा भूरिद्युम्नो महाश्वश्च पृथ्वा
श्वो जनकस्तथा १९ राजा वैण्यो वारिसेनः पुरुजिज्जनमेजयः ब्रह्मदत्तस्त्रिगर्तश्च राजोपरिचरस्तथा २० इंद्रद्युम्नो भीमजा
नुर्गौरपृष्ठो नघोलयः पद्मोथ मुचुकुंदश्च भूरिद्युम्नः प्रसेनजित् २१ अरिष्टनेमिः सुद्युम्नः पृथुलाश्वोऽष्टकस्तथा श
तं मत्स्या नृपतयः शतं नीपाः शतं हयाः २२ धृतराष्ट्राश्चैकशतमशीतिर्जनमेजयाः शतं च ब्रह्मदत्तानां वीरिणामीरिणां
शतं २३ भीष्माणां द्वे शते चैव भीमानां तु तथा शतं शतं च प्रतिविंध्यानां शतं नागाः शतं हयाः २४ पलाशानां शतं ज्ञेयं
नकाशकुशादयः शांतनुश्चैव राजेंद्र पांडुश्चैव पिता तव २५ उशंगवः शतरथो देवराजो जयद्रथः वृषदर्भश्च राजर्षिर्बुद्धि
मान्सह मंत्रिभिः २६ ॥ ॥

राम०
२३

२४ अयमेवन्यायः पलाशादिष्वपि यद्वाभिमानिदेवतानां सुतेयरत्याश्रयवानाह पलाशानामिति २५ २६ २६

३० कालचक्रं चेति संवत्सराद्यभिमानिन्यो देवताः दुष्कृतकर्म्माणः विद्याविहीनकर्ममात्रनिष्ठाः ३१ ३२ ३३ असंबाधा असंकीर्णा ३४ ३५ संन्यासिनः निष्कामकर्मकर्त्तारः काम्यानां कर्म्मणां त्यागिनो वा एषैषामपि स्थापस्त्वेव नत्वध्यात्मफलार्थं निमित्तच्छायां गंधरसस्पृष्ट्यादेतेरवं धर्म्मं चर्यमाणां मध्ये अनुसंधेतरितिआनुषं

अथापरे सहस्राणि ये गताः शशबिंदवः इष्ट्वाश्वमेधैर्बहुभिर्महद्भिर्भूरिदक्षिणैः २७ एते राजर्षयः पुण्याः कीर्त्तिमंतो बहुश्रुताः तस्यां सभायां राजर्षे वैवस्वतमुपासते २८ अगस्त्योथ मतंगश्च कालो मृत्युस्तथैव च यज्वानश्चैव सिद्धाश्च ये च योगशरीरिणः २९ अग्निष्वात्ताश्च पितरः फेनपाश्चोष्मपाश्च ये सुधावंतो बर्हिषदो मूर्त्तिमंतस्तथापरे ३० कालचक्रं च साक्षाच्च भगवान्हव्यवाहनः नरा दुष्कृतकर्म्माणो दक्षिणायनमृत्यवः ३१ कालस्य नयने युक्ता यमस्य पुरुषाश्च ये तस्यां शिंशपपालाशास्तथा काशकुशादयः ३१ उपासते धर्मराजं मूर्त्तिमंतो जनाधिप ३२ एते चान्ये च बहवः पितृराजसभासदः नशक्याः परिसंख्यातुं नामभिः कर्मभिस्तथा ३३ असंबाधा हि सा पार्थ रम्या कामगमा सभा दीर्घकालं तपस्तप्त्वा निर्मिता विश्वकर्म्मणा ३४ ज्वलंती भासमाना च तेजसा स्वेन भारत तामुग्रतपसो यांति सुव्रताः सत्यवादिनः ३५ शांताः संन्यासिनः शुद्धाः पूताः पुण्येन कर्म्मणा सर्वे भास्वरदेहाश्च सर्वे च विरजोंबराः ३६ चित्रांगदाश्चित्रमाल्याः सर्वे ज्वलितकुंडलाः सुकृतैः कर्मभिः पुण्यैः परिवर्हैश्च भूषिताः ३७ गंधर्वाश्च महात्मानः संघशश्चाप्सरोगणाः वादित्रं नृत्यगीतं च हास्यं लास्यं च सर्वशः ३८ पुण्याश्च गंधाः शब्दाश्च तस्यां पार्थ समंततः दिव्यानि चैव माल्यानि उपतिष्ठंति नित्यशः ३९

णिकफलभागित्वदर्शनात् निर्मितेरपि सैन्ये अर्थाः दिव्यान्नपानादयः ३६ ३७ ३८ ३९ ३९ ३९

स०
२४

पुष्करैरप्त्रिमन्दिस्तीर्थविशेषैः मालिनीं शोभिनीं ५१ अध्यायः १ दिव्यैरितिन्नस्मामित्युत्तरश्लोकाद्यस्य रूप्यते अवतानैर्विज्ञानवद्धक्षस्वरूपाच्छादकैः लताप्रतानैर्सिताः

शतंशतसहस्राणिधर्मिणांतंप्रजेश्वरं उपासतेमहात्मानंतपयुक्तामनस्विनः ५० ईदृशीसासभाराजन्मित्रराज्ञोमहात्मनः वरु
णस्यापिवक्ष्यामिसभांपुष्करमालिनीं ५१ सभापर्वणियमसभावर्णनं नारदउवाच युधिष्ठिरसभादिव्यावरुणस्यामितप्रभा प्रमाणे
नयथायाम्यासुभ्रप्राकारतोरणा १ अंतःसलिलमास्थायविहिताविश्वकर्मणा दिव्यैरत्नमयैर्वृक्षैः फलपुष्पप्रदैर्युता २ नील
पीतासितश्यामैः सितैर्लोहितकैरपि अवतानैस्तथागुल्मैर्मंजरीजालधारिभिः ३ तथाशकुनयस्तस्यांविचित्रामधुरस्वराः अनिर्दे
श्यावपुष्मंतः शतशोथसहस्रशः ४ सासभासुखसंस्पर्शानशीतानचघर्मदा वेश्मासनवतीरम्यासितावरुणपालिता ५ यस्यामास्ते
सवरुणोवारुण्याचसमन्वितः दिव्यरत्नांबरधरोदिव्याभरणभूषितः ६ स्रग्विणोदिव्यगंधाश्चदिव्यगंधानुलेपनाः आदित्यास्तत्रवरु
णंजलेश्वरमुपासते ७ वासुकिस्तक्षकश्चैवनागश्चैरावतस्तथा कृष्णश्चलोहितश्चैवपद्मश्चित्रश्चवीर्यवान् ८ कंवलाश्वतरौना
गौधृतराष्ट्रवलाहकौ मणिमान्कुंडधारश्चकर्कोटकधनंजयौ ९ पाणिमान्कुंडधारश्चवलवान्पृथिवीपते प्रह्लादोमूषिकाद
श्चतथैवजनमेजय १० पताकिनोमंडलिनः फणावंतश्चसर्वशः एतेचान्येचवहवस्सर्पास्तस्यांयुधिष्ठिर उपासतेमहात्मानंवरुणं
विगतक्लमाः ११ वलिर्वैरोचनोराजानरकः पृथिवीजयः संह्लादोविप्रचित्तिश्चकालखंजाश्चदानवाः १२ सुहनुर्दुर्मुखः शंख
ः सुनामासुमतिस्ततः घटोदरोमहापार्श्वः क्रथनः पिठरस्तथा १३ १३ १३

वद्याः ३ वपुष्मंतः प्रशस्तदेहाः ४ ५ वा०नुरागवरुणान्या माध्यावा ६ १३ १३ १३ १३

राम०
२४

२४ २८ संपतता समागच्छता २९ इतिसभापर्वणिवरुणसभावर्णनंनामाध्यायः १ १ १ १ १ १ १

विश्वरूपः स्वरूपश्चविरूपोथमहाशिराः दशग्रीवश्चवालीचमेघवासादशावरः १४ टिट्टिभोविटभूतश्चसंह्रादश्चेंद्रतापनः दैत्यदानव
संघाश्चसर्वेरुचिरकुंडलाः १५ स्रग्विणोमौलिनश्चैवतथादिव्यपरिच्छदाः सर्वेलब्धवराः शूराः सर्वेविगतमृत्यवः १६ तेतस्यांवरुणं
देवंधर्मपाशधरंसदा उपासतेमहात्मानंसर्वेसुचरितव्रताः १७ तथासमुद्राश्चत्वारोनदीभागीरथीचसा कालिंदीविदिशावेण्वानर्म
दावेगवाहिनी १८ विपाशाचशतद्रुश्चचंद्रभागासरस्वती इरावतीवितस्ताचसिंधुर्देवनदीतथा १९ गोदावरीकृष्णवेणाकावेरी
चसरिद्वरा किंपुनाचविशल्याचतथावैतरणीनदी २० तृतीयाज्येष्ठिलाचैवशोणश्चापिमहानदः चर्मण्वतीतथाचैवपर्णाशाचम
हानदी २१ सरयूर्वारवत्याथलांगलीचसरिद्वरा करतोयातथात्रेयीलौहित्यश्चमहानदः २२ लंघतीगोमतीचैवसंध्यात्रिःस्रोत
सीतथा एताश्चान्याश्चराजेंद्रसुतीर्थालोकविश्रुताः २३ सरितः सर्वतश्चान्यास्तीर्थानिचसरांसिच कूपाश्चसप्रस्रवणादेहवंतोयुधि
ष्ठिर २४ पल्वलानितडागानिदेहवंत्यथभारत दिशस्तथामहीचैवतथासर्वेमहीधराः २५ उपासतेमहात्मानंसर्वेजलचरा
स्तथा गीतवादित्रवंतश्चगंधर्वाप्सरसांगणाः २६ स्तुवंतोवरुणंतस्यांसर्वएवसमासते वारुणश्चतथामंत्रीसुनाभः पर्युपास
ते २७ पुत्रपौत्रैः परिवृतोगोनाम्नापुष्करेणच सर्वेविग्रहवंतस्तेतमीश्वरमुपासते २८ एषामयासंपतताचारुणीभरतर्षभ दृ
ष्टपूर्वासभारम्याकुबेरस्यसभांशृणु सभापर्वणिवरुणसभावर्णनं ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥

सभायै १ शशिप्रभाप्रावरणा शशिप्रभामपिधावल्येन तिरस्करोतीत्यर्थः २ विषक्ता लग्ना शृंगैरिति छेदः मनोह‍ृदयसंहारीति पाठे मनःचित्तं हरयं करम्वगोलकाकृतिर्मांसखंडः

नारद उवाच सभा वैश्रवणी राजन् शतयोजनमायता विस्तीर्णा सप्ततिश्चैव योजनानि सितप्रभा १ तपसा निर्जिता राजन् स्वयं वैश्रवणेन सा शशिप्रभाप्रावरणा कैलासशिखरोपमा २ गुह्यकैरुह्यमाना सा विषक्तेव शोभते दिव्या हेममयैरुच्चैः प्रासादैरुपशोभिता ३ महारत्नवती चित्रा दिव्यगंधा मनोरमा सिताभ्रशिखराकारा प्लवमानेव दृश्यते ४ दिव्या हेममयैरंगैर्विद्युद्भिरिव चित्रिता तस्यां वैश्रवणो राजा विचित्राभरणांबरः ५ स्त्रीसहस्रैर्वृतः श्रीमानास्ते ज्वलितकुंडलः दिवाकरनिभे पुण्ये दिव्यास्तरणसंवृते ६ दिव्यपादोपधाने च निषण्णः परमासने सदारणा मुदाराणां वनानि परिलोडयन् सौगंधिकवनानां च गंधं गंधवहो वहन् नलिन्याश्चालकाख्याया नंदनस्य वनस्य च शीतो हृदयसंह्लादी वायुस्तमुपसेवते ८ तत्र देवाः सगंधर्वा गणैरप्सरसां वृताः दिव्यतानैर्महाराज गायंति स्म सभागताः ९ मिश्रकेशी च रंभा च चित्रसेना शुचिस्मिता चारुनेत्रा घृताची च मेनका पुंजिकस्थला १० विश्वाची सहजन्या च प्रम्लोचा उर्वशी इरा वर्गा च सौरभेयी च समीची बुद्बुदा लता एताः सहस्रशश्चान्या नृत्यगीतविशारदाः १३ उपतिष्ठंति धनदं गंधर्वाप्सरसां गणाः अनिशं दिव्यवादित्रैर्नृत्यगीतैश्च सा सभा अशून्या रुचिरा भाति गंधर्वाप्सरसां गणैः किन्नरा नाम गंधर्वा नरा नाम तथापरे १४ मणिभद्रोऽथ धनदः श्वेतभद्रश्च गुह्यकः कशेरको गंडकंडुः प्रद्योतश्च महाबलः १५ कुस्तुंबुरुः पिशाचश्च गजकर्णो विशालकः वराहकर्णस्ताम्रोष्ठः फलकक्षः फलोदकः १६ हंसचूडः शिखावर्तो हेमनेत्रो विभीषणः पुष्पाननः पिंगलकः शोणितोदः प्रवालकः १७ १७ १७

: ५ ८ दिव्यतानैः रम्यैस्तानैर्गीतयाल्पप्रसिद्धैरेकोनपंचाशत्संख्यैः ९ १० ११ १२ १३ १४ १५ १६ १७

वृक्षवास्यनिकेतश्चवीरवासाश्चभारत एतेचान्येचवहवोयक्षाः शतसहस्रशः १८ सदाभगवतीलक्ष्मीस्तत्रैवनलकूवरः अहंचवहुशस्त
स्याभवंत्यन्येचमद्विधाः १९ ब्रह्मर्षयोभवंत्यत्रतथादेवर्षयोपरे क्रव्यादाश्चतथैवान्येगंधर्वाश्चमहाबलाः २० उपासतेमहात्मानंतस्यांध
नदमीश्वरं भगवान्भूतसंघैश्चवृतः शतसहस्रशः २१ उमापतिः पशुपतिः शूलभृद्भगनेत्रहा त्र्यंवकोराजशार्दूलदेवीचविगतक्लमा
२२ वामनैर्विकटैः कुब्जैः क्षतजाक्षैर्महारवैः मेदोमांसाशनैरुग्रैरुग्रधन्वामहाबलः २३ नानाप्रहरणैरुग्रैर्वातैरिवमहाजवैः वृतः स
खायमन्वास्तेसदैवधनदंनृप २४ प्रहृष्टाःशतशश्चान्येबहुशः सपरिच्छदाः गंधर्वाणांचपतयोविश्वावसुर्हहाहूहूः २५ तुंवुरुः पर्व
तश्चैवशैलूषश्चतथापरः चित्रसेनश्चगीतज्ञस्तथाचित्ररथोपिच २६ एतेचान्येचगंधर्वाधनेश्वरमुपासते विद्याधराधिपश्चैवचक्रधर्मासह
हानुजैः २७ उपाचरंतितत्रस्मधनानामीश्वरंप्रभुं किन्नराःशतशस्तत्रधनानामीश्वरंप्रभुं आसतेचापिराजानोभगदत्तपुरोगमाः द्रुम
ः किंपुरुषेशश्चउपास्तेधनदेश्वरं २९ राक्षसाधिपतिश्चैवमहेंद्रोगंधमादनः सहयक्षैः सगंधर्वैःसहसर्वैर्निशाचरैः ३० विभीष
णश्चधर्मिष्ठउपास्तेभ्रातरंप्रभुं हिमवान्पारियात्रश्चविंध्यकैलासमंदराः ३१ मलयोदर्दुरश्चैवमहेंद्रोगंधमादनः इंद्रकीलः सु
नामश्चतथादिव्यौचपर्वतौ ३२ एतेचान्येचवहवः सर्वेमेरुपुरोगमाः उपासतेमहात्मानंधनानामीश्वरंप्रभुं ३३ नंदीश्वरश्च
भगवानमहाकालस्तथैवच शंकुकर्णमुखाः सर्वेदिव्याः पारिषदास्तथा ३४ ३४ ३४

स०
२६

३७ आसीदस्याहसायोजनीयोयदाभवः कदाचित्कुबेरसभामध्यास्ते तदा कुबेरोपिभवादनुज्ञामाप्य तन्निकटे आस्तउपविशति ३८ ४० अध्यायः पितामह १ देव
युगेकृतयुगे २ ३ मानसीमित्यनेनभौतिकत्वमाहृतिः तथाहि आतिवाहिकएवायंत्वाहतैपश्चित्तदेहकः आधिभौतिकतयावुद्ध्याग्रहीतस्थिरभावनादितिवासिष्ठो
क्तरीत्याप्रपंचस्यद्वैविध्यंदृश्यते तत्रायंस्थूलभूतमयश्चाधिभौतिकः सूक्ष्मभूतमयश्चातिवाहिकः सएवञ्चतिअनंतकार्याकारंवोढुंसमर्थोतिवाहीसूक्ष्मभूतसंघस्ते

न३

कार्ष्णः क्रौरीमुखोवांद्रंतीविजयश्चतपोधिकः श्वेतश्चवृषभस्तत्रनर्दन्नास्तेमहाबलः ३५ धनदंराक्षसाश्चान्येपिशाचाश्चउपासते पारिष
दैः परिवृतमुपायांतंमहेश्वरं ३६ सदाहिदेवदेवेशंशिवंत्रैलोक्यभावनं प्रणम्यमूर्ध्नापौलस्त्योवहुरूपमुमापतिं ३७ ततोभ्यनुज्ञांसं
प्राप्यमहादेवाद्धनेश्वरः आस्तेकदाचिद्भगवान्भवोधनपतेः सखा ३८ निधिप्रवरमुख्यौचशंखपद्मौधनेश्वरौ सर्वान्निधीन्प्रगृ
ह्याथउपास्तांवैधनेश्वरं ३९ सासभातादृशीरम्यामयादृष्टांतरिक्षगा पितामहसभाराजन्कीर्तयिष्येनिवोधतां ४० सभापर्वे
णिधनदसभावर्णनंनाम नारदउवाच पितामहसभांतातकथ्यमानान्निवोधमे शक्यतेयानतिर्देष्टुमेवंरूपेतिभारत १
पुरादेवयुगेराजन्नादित्योभगवान्दिवः आगच्छन्मानुषंलोकंदिदृक्षुर्विगतक्लमः २ चरन्मानुषरूपेणसभांदृष्ट्वास्वयंभुवः स
तामकथयन्मह्यंदृष्ट्वातत्वेनपांडव ३ अप्रमेयांसभांदिव्यांमानसींभरतर्षभ अनिर्देश्यांप्रभावेनसर्वभूतमनोरमां ४

ननिर्हृतः इतियोगात् अतएवतत्रेंद्रादिलोकरूपेस्वर्गेयत्नदुःखेनसंभिन्नंनचग्रस्तमनंतरंअभिलाषोपनीतंचतत्सुखंयः परास्पदीमितिस्वर्गपदनिर्वचनंसंगच्छते। संभि
न्नमिश्रंग्रस्तंभोगोत्तरंपायावहं। अभिलाषः संकल्पः तत्राप्याधिभौतिकस्पतत्वंआतिवाहिकः रज्जुरिवभुजंगस्य अस्यापितत्वंचित्तमेवतदिदमुक्तंचित्तदेहकइति
ताहशीचप्रजापतिसभातो: मानसत्वंतत्रयुक्तं ४ ५

राम०
२६

६ औषधैः ज्योतिष्मत्यादिभिः कल्पोक्तप्रकारेणसाधितैः ७ ८ ब्रह्मव्रतंहार्दब्रह्मोपासनं ९ ततः सइति सूर्यद्वारेणगतेविरजाः अर्चयातीतिब्रह्मसभाप्रवेशोधिदेवमसक्ष्मस
र्यस्येवद्वारत्वेत्र्यध्यात्मंतुरागम्यसूर्यनाडीद्वारा १० एवमितिमानसत्वादिवरज्ज्वुरगवत्सतीअसतीवेतिनिर्वक्तुंनशक्या क्षणेनेति रज्जुर्यथाभावकत्वदर्शनेधानस्रक्सर्पदंड

श्रुत्वापुराणमहंतस्याः सभायाः पांडवर्षभ दर्शनेसुतृषाराजन्नादित्यमिदमब्रुवं ४ भगवन्द्रष्टुमिच्छामिपितामहसभांशुभां येनवा
तपसाशक्याकर्मणावापिगोपते ६ औषधैर्वातथायुक्तैरुत्तमापापनाशनी तन्ममाचक्ष्वभगवन्पश्येयंतांसभांयथा ७ सत
न्ममवचः श्रुत्वासहस्रांशुर्दिवाकरः प्रोवाचभरतश्रेष्ठव्रतंवर्षसहस्रिकं ८ ब्रह्मव्रतमुपास्स्वत्वंप्रयतेनांतरात्मना ततोहंहिमवत्पृ
ष्ठेसमारब्धोमहाव्रतं ९ ततः सभगवान्सूर्योमामुपादायवीर्यवान् आगच्छत्तांसभांब्राह्मींविपाप्माविगतक्लमः १० एवं
रूपेतिसाशक्याननिर्देष्टुंनराधिप क्षणेनहिबिभर्त्यन्यदनिर्देश्यंवपुस्तथा ११ नवेदपरिमाणंवासंस्थानंचापिभारत ना
चरूपंमयातादृक्दृष्टपूर्वंकदाचन १२ सुसुखासासदाराजन्नशीतानचघर्मदा नक्षुत्पिपासेनग्लानिंप्राप्यतांप्राप्नुवंत्यु
त १३ नानारूपैरिवकृतामणिभिः सासुभास्वरैः स्तंभैर्नचधृतासातुशाश्वतीनचसाक्षरा १४ दिव्यैर्नानाविधैर्भावैर्भास
द्भिरमितप्रभैः १५ ॥ ॥

धारादिरूपान्यथयमपिवैकुंठकैलासादिरूपेणाभातीत्यर्थः ११ १३ स्तंभैरिति यत्तानक्षरानापक्षयवती अतः शाश्वतीतिसा एतत्तत्स्वंब्रह्मपुरमितिश्रुतेः १४
१५

अतिचंद्रमिति स्वयमिस्मश्चयंस्वयमहंकरोमिस्वयंत्वंकरोषिसस्वयंत्वंकरोषिसस्वयंकृतवानिस्मादियोगात् आहृतामसगास्मवाचकं। सएवसमासप्रकाशकंज्योतिर्यस्मासा
स्वयंप्रभा जागरेहिसूर्यादीनांघटादिप्रकाशकत्वंदृष्टंतदात्मनएवेतिसाधयितुंसूर्याद्यभावकालेस्वप्नप्रकाशात्रायंपुरुषः स्वयंज्योतिरितिश्रुत्यासाटोपमुक्तं १६ तस्या
मितिासः महत्तत्त्वाभिमानीसूक्ष्ममनश्चास्य: यंप्रकृत्यस्मर्यतेमनोमहान्मतिर्ब्रह्मापूर्बुद्धिः ख्यातिरीश्वरप्रज्ञासंविच्चितिश्चैवस्मृतिश्चपरिपठ्यतेइतिअतएव
भगवान्तत्त्वैश्वर्यवान् देवमायपास्वाविद्ययाविदधल्लोकानितिशेषः विदधदेवमानुषानितिपाठेपिस्वाविद्ययेत्यध्याहार्यं एकोनविंशसत्त्वपिस्वसदेहेषुपदार्थेषु

अतिचंद्रंचसूर्यंचशिखिनंचस्वयंप्रभा। दीप्यतेनाकपृष्ठस्थाभासयंतीवभास्करं १६ तस्यांसभगवानास्तेविदधद्देवमानुषान् स्वयमेको
ऽनिशंराजन्सर्वलोकपितामहः १७ उपतिष्ठंतिवाप्येतंप्रजानांपतयः प्रभु दक्षःप्रचेताःपुलहोमरीचिः कश्यपः प्रभुः १८ भृगुरत्रिर्व
सिष्ठश्च[illegible]गौतमोऽथतथांगिराः पुलस्त्यश्चक्रतुश्चैवप्रह्लादःकर्दमस्तथा १९ अथर्वांगिरसश्चैववालखिल्यामरीचिपाः मनोंतरिक्षंवि
द्याश्चवायुस्तेजोजलंमही २० शब्दस्पर्शौतथारूपंरसोगंधश्चभारत प्रकृतिश्चविकारश्चयच्चान्यत्कारणंभुवः २१ अगस्त्यश्चमहाते
जामार्कं[illegible]डेयश्चवीर्यवान् जमदग्निर्भरद्वाजः संवर्तश्च्यवनस्तथा २२ दुर्वासाश्चमहाभागऋष्यशृंगश्चधार्मिकः सनत्कुमारोभ
गवान्योगाचार्योमहातपाः २३ असितोदेवलश्चैवजैगीषव्यश्चतत्त्ववित् ऋषभोजितशत्रुश्चमहावीर्यस्तथामणिः २४ आ
युर्वेदस्तथाष्टांगोदेहवांस्तत्रभारत चंद्रमाः सहनक्षत्रैरादित्यश्चगभस्तिमान् २५ वायवःक्रतवश्चैवसंकल्पःप्राणएवच मूर्तिमं
तोमहात्मानोमहाव्रतपरायणाः २६ एतेचान्येचवहवोब्रह्माणंसमुपस्थिताः अर्थोधर्मश्चकामश्चहर्षोद्वेषस्तपोदमः २७ आ
यांतितस्यांसहितागंधर्वाप्सरसांगणाः विंशतिः सप्तचैवान्येलोकपालाश्चसर्वशः २८

ऐंद्रजालिकवदेकस्यैवनृत्यः १७ एकस्यैवविविधैकव्यंगपसार्वात्म्यंअहंमनुरभवंसूर्यश्चेत्यादिश्रुतिप्रसिद्धंप्रपंचयतिउपतिष्ठंतीत्यादिनाध्यायशेषेण १८ २० यच्चा
न्यत्कालादृष्टादि २१ २७ सप्तचैवान्येइतिस[illegible]सविंशतिर्नक्षत्राणीत्येके अन्येतुविंशतिर्गंधर्वाप्सरसांगणाः सप्तवान्येगंधर्वामुख्याः तेचहंसोहहाहूहूर्वि
श्वावसुर्वररुचिस्तथा तुंबरुस्तंबरुश्चैवगंधर्वाःसप्तकीर्तिताइति २८ २८ २८ २८

२९ मंत्रः सामगानाश्रयभूतोऽग्नआयाहीत्यादिः रथंतरं सामविशेषः हरिमान्वसुमानितिकर्मविशेषयोरिदंनामनी। साधिराजानः सेंद्राः। नामद्वंद्वैः अग्नीषोमेन्द्राग्न्यादिभिः ३० हवींषि
व्रीहियवादिजीवाः ३१ ३२ उपवेदाः आयुर्वेदोधनुर्वेदोगांधर्वश्चार्थशास्त्रकमिति अंगानिशिक्षादीनि ३३ दुर्गतरणीवाणीप्रणवः साचसप्तविधा अकारउकारोमकारः अ

शुक्रोबृहस्पतिश्चैवबुधोंगारकएवच शनैश्चरश्चराहुश्चग्रहाः सर्वेतथैवच २९ मंत्रोरथंतरंचैवहरिमान्वसुमानपि आदित्यास्साधिराजानो
नामद्वंद्वैरुदाहृताः ३० मनुर्नेविश्वकर्माचवसवश्चैवमारुत तथापितृगणाः सर्वेसर्वाणिचहवींष्यथ ३१ ऋग्वेदः सामवेदश्चयजुर्वेद।
श्चपारुच अथर्ववेदस्तथासद्यःशास्त्राणिचैवह ३२ इतिहासोपवेदाश्चवेदांगानिचसर्वशः ग्रहायज्ञाश्चसोमश्चदेवताश्चापिसर्वशः
सावित्रीदुर्गतरणीवाणीसप्तविधातथा मेधाधृतिः श्रुतिश्चैवप्रज्ञाबुद्धिर्यशः क्षमा ३४ सामानिस्तुतिशस्त्राणिगाथाश्चविविधास्त
था भाष्याणितर्कयुक्तानिदेहवंतिविशांपते ३५ नाटकाविविधाः काव्याः कथाख्यायिककारिकाः तत्रतिष्ठंतितेपुण्यायेचा
न्येगुरुपूजकाः ३६ क्षणालवामुहूर्ताश्चदिवारात्रिस्तथैवच अर्द्धमासाश्चमासाश्चऋतवः षट्भारत ३७ संवत्सराः पंचयुगा
महोरात्रश्चतुर्विधः कालचक्रंचतद्दिव्यंनित्यमक्षयमव्ययं ३८ धर्मचक्रंतथाचापिनित्यमास्तेयुधिष्ठिर अदितिर्दितिर्दनुश्चै
वसुरसाविनताइरा ३९ कालिकासुरभीदेवीसरमाचाथगौतमी ४० ४० ४० ४०

र्द्धमात्रा नादः विंदुः शक्तिरितिसप्तप्रकाराः शांतरूपाधिष्ठानप्राप्तकारस्तथैः संस्कृतप्राकृतपैशाच्यपभ्रंशललितमागधगद्यरूपाद्यस्तस्ते ३४ ३७ संवत्सराः षष्टिः प्रभ
वाद्यः तेचपंचपंचएकैकंयुगं चतुर्विधः मानुषोऽहोरात्रः षष्टिघटिकाभिः पित्र्योमासेनदैवोवत्सरेणब्राह्मः कल्पेनेति कालचक्रंद्वादशाराश्यात्मकं ३८ ४०

वैराजाः विरजप्रभवाः प्रमपितृगणाश्चाग्निष्वात्तादयः ४९ ५० महादेवोईश्वरोपिसहोमोब्रह्मविद्यासहितस्तत्रैवांतर्गतः ५१ नारायणाश्चविद्याप्राप्याः सुहृत्स्वात्मापितत्रैवप्रा

प्राणाकद्रुश्चवेदेश्चोदेवतानांचमातरः रुद्राणीश्रीश्चलक्ष्मीश्चभद्राषष्ठीतथापरा ४१ पृथिवीगांगतादेवीह्रीः स्वाहाकीर्त्तिरेवच
सुरदेवीशचीचैवतथापुष्टिररुंधती ४२ संततिश्चप्रमानियतिः सृष्टिर्देवीरतिस्तथा एताश्चान्याश्चवैदेव्यउपतस्थुः प्रजापतिं ४३
आदित्यावसवोरुद्रामरुतश्चाश्विनावपि विश्वेदेवाश्चसाध्याश्चपितरश्चमनोजवाः ४४ पितृणांचगणान्विद्धिसप्तैवपुरुषर्ष
भ मूर्त्तिमंतोवैचत्वारस्त्रयश्चाप्यशरीरिणः ४५ वैराजाश्चमहाभागाअग्निष्वात्ताश्चभारत गार्हपत्यानाकचराः पितरोलोकवि
श्रुताः ४६ सोमपाएकशृंगाश्चचतुर्वेदाः कलास्तथा एतेचतुर्षुवर्णेषुपूज्यंतेपितरोनृप ४७ एतैराप्यायितैःपूर्वंसोम
श्चाप्यायतेपुनः तएतेपितरःसर्वेप्रजापतिमुपस्थिताः ४८ उपासंतेचसंहृष्टाब्रह्माणममितौजसं राक्षसाश्चपिशाचा।
श्चदानवागुह्यकास्तथा ४९ नागाःसुपर्णाःपशवःपितामहमुपासते स्थावराजंगमाश्चैवमहाभूतास्तथापरे ५० पुरंदर
श्चदेवेंद्रोवरुणोधनदोयमः महादेवःसहोमोऽत्रसदागच्छतिसर्वशः ५१ महासेनश्चराजेंद्रसदोपास्तेपितामहं देवोना
रायणस्तस्मिंस्तथादेवर्षयश्चये ५२ ऋषयोवालखिल्याश्चयोनिजाःयोनिजास्तथा यच्चकिंचित्त्रिलोकेस्मिन्दृश्यतेस्थाणु
जंगमंसर्वंतस्यामयाहदृष्टमितिविद्धिनराधिप ५३ ५३ ५३ ५३

प्यतइत्यर्थः ५२ एकस्यापिसार्वात्म्यमुक्तंउपसंहरतियच्चेति ५३ ५३ ५३

तस्मात्स्थिकारिणाम् आहाष्टाशीतीति तेसमेतेत्रसारिनायत्वोषीतकीयश्रुतं पर्यंकस्थं ब्रह्माणेन सह संवाद इति किंच तत्र उपबर्हण इति ब्राह्म्या श्रिया शोभमाने दमस्तपः शौचमित्यादिना प्रसिद्ध्या श

८३

अष्टाशीतिसहस्राणि ऋषीणामूर्ध्वरेतसां प्रजावतां च पंचाशदृषीणामपि पांडव ५४ ते स्म तत्र यथाकामं दृष्ट्वा सर्वे दिवौकसः प्र
णम्य शिरसा तस्मै सर्वे यांति यथागतं अतिथीनागतान् देवान् दैत्यान्नागांस्तथा द्विजान् यक्षान्सुपर्णान्कालेयान्गंधर्वाप्सरसस्तथा
५६ महाभागानमितधीर्ब्रह्मा लोकपितामहः दयावान्सर्वभूतेषु यथार्हं प्रतिपद्यते ५७ प्रतिगृह्य तु विश्वात्मा स्वयंभूरमितद्युतिः सांत्व
मानार्थसंभोगैर्युनक्ति मनुजाधिप ५८ तथा तैरुपयातैश्च प्रतियद्भिश्च भारत आकुला सा सभा तात भवति स्म सुखप्रदा ५९ सर्व
तेजोमयी दिव्या ब्रह्मर्षिगणसेविता ब्राह्म्या श्रिया दीप्यमाना शुशुभे विगतक्लमा ६० सा सभा तादृशी दृष्टा मया लोकेषु दुर्लभा
सभेयं राजशार्दूल मनुष्येषु यथा तव ६१ एता मया दृष्टपूर्वाः सभा देवेषु भारत सभेयं मानुषे लोके सर्वश्रेष्ठतमा तव ६२ सभापर्व
णि ब्रह्मसभावर्णनं नाम युधिष्ठिर उवाच प्रायशो राजलोकस्ते कथितो वदतां वर वैवस्वतसभायां तु यथावद्वदतो मुने १ वरु
णस्य सभायां तु नागास्ते कथिता विभो दैत्येन्द्राश्चापि भूयिष्ठाः सरितः सागरास्तथा २ तथा धनपतेर्यक्षा गुह्यका राक्षसास्तथा गं
धर्वाप्सरसश्चैव भगवांश्च वृषध्वजः पितामहसभायां तु कथितास्ते महर्षयः सर्वे देवनिकायाश्च सर्वशास्त्राणि चैव ह ४ शक्रस्य तु
सभायां तु देवाः संकीर्तिता मुने उद्देशतश्च गंधर्वा विविधाश्च महर्षयः ५ ५ ५

मरिसंपस्या ६० ६२ ब्रह्मसभाध्यायः एवं सत्यमुपोद्घातयति प्रायश इत्यादिना ५ ५ ५ ५ ५

सद्दस्लवर्षव्रतगाप्यंव्रह्मसभामुपेक्ष्यहरिश्चंद्रस्यामांद्रसभांशाकप्रवेशंगमत्वात्तत्साधनं पृच्छतिरुकएवेति ६ ९ यत्मांपृच्छसीत्यादेःदाशार्हेनगरीमतीमंतस्यपरमतात्सर्येशक्रलो
कप्रापकोराजसूयः अतियत्नसाध्यः सिद्धत्वातीतानर्थहेतुरतोव्रह्मसभाप्रापकमेवव्रतमनुष्ठेयमिति। अर्वातरजास्मर्येतुमृंभारहरणार्थंव्रह्मणाप्रेरितोनारदः। सर्वसंहारहेतु

एकस्यतुराजर्षेहरिश्चंद्रोमहामुने कथितस्तेसभायोवैदेवेंद्रस्यमहात्मनः ६ किंकर्मतेनाचरितंतपोवानियतव्रत येनासौसहशक्रे
णस्पर्द्धतेसुमहायशाः ७ पितृलोकगतश्चैवत्वयाविप्रपितामम दृष्टः पांडुर्महाभागकथंवापिसमागतः ८ किमुक्तवांश्चभगवंस्त
न्ममाचक्ष्वसुव्रत त्वत्तः श्रोतुंसर्वमिदंपरंकौतूहलंहिमे नारदउवाच यन्मांपृच्छसिराजेंद्रहरिश्चंद्रंप्रतिप्रभो तत्तेहंसंप्रवक्ष्यामिमाहा
त्म्यंतस्यधीमतः १० सराजावलवानासीत्सम्राट्सर्वमहीक्षितां तस्यसर्वेमहीपालाः शासनावनताः स्थिताः तेनैकंरथमास्थाय
जैत्रंहेमविभूषितं शस्त्रप्रतापेनजिताद्वीपाःसप्तजनेश्वर १२ सनिर्जित्यमहींकृत्स्नांसशैलवनकाननां आजहारमहाराजराजसूयंमहा- एज ५
क्रतुं १३ तस्यसर्वेमहीपालाधनान्याजह्रुराज्ञया द्विजानांपरिवेष्टारस्तस्मिन्यज्ञेचतेभवन् १४ प्रादाच्चद्रविणंप्रीत्यायाचकानांनरे
श्वरः यथोक्तवांस्तस्तितस्मिंस्ततः पंचगुणाधिकं १५ अतर्पयच्चविविधैर्वसुभिर्ब्राह्मणांस्तदा प्रसर्पकालेसंप्राप्तेनानादिग्भ्यः स
मागतान् १६ भक्ष्यभोज्यैश्चविविधैर्यथाकामपुरस्कृतैः रत्नौघतर्पितैस्तुष्टैर्द्विजैश्चसमुदाहृतं १७ तेजस्वीचयशस्वीचनृपेभ्यो।
भ्यधिकोभवत् एतस्मात्कारणाद्राजन्हरिश्चंद्रोविराजते तेभ्योराजसहस्रेभ्यस्तद्विद्धिभरतर्षभ १८ समाप्यचहरिश्चंद्रोमहायज्ञंप्र।
तापवान् अभिषिक्तश्चशुशुभेसाम्राज्येननराधिप १९

राजसूयंयुधिष्ठिरद्वाराकारयितुंयुधिष्ठिरंहृष्टचोद्योजयतीति १० येनेष्ट्राराजसूयेनमंडलस्येश्वरश्चयः शास्तियश्चाज्ञयाराज्ञः संसम्राडितिशब्द्यते ११ जंबूद्वीपः कुशद्वी
पः शाकः क्रौंचश्चशाल्मलिः गोमेदः पुष्करश्चैवसप्तद्वीपाः प्रकीर्तिताः १२ १५ तेप्रसर्पोऽस्मिविसर्जनमितिनिघंटुः १६ १७ १८ १९

येचान्येचमहीपालाराजसूयंमहाक्रतुं यजंतेतेसहेंद्रेणमोदंतेभरतर्षभ २० येचापिनिधनंप्राप्ताःसंग्रामेष्वपलायिनः तेतत्सदन
माप्याथमोदंतेभरतर्षभ २१ तपसायेचतीव्रेणत्यजंतेहकलेवरं तेतत्स्थानंसमासाद्यश्रीमंतोभांतिनित्यशः २२ पिताचत्वाहकौंतेय
पांडुःकौरवनंदनः हरिश्चंद्रेश्रियंदृष्ट्वानृपतौजातविस्मयः २३ विज्ञायमानुषंलोकमायांतंमांनराधिप प्रोवाचप्रणतोभूत्वावदेथा
स्त्वंयुधिष्ठिरं २४ समर्थोसिमहींजेतुंभ्रातरस्तेस्थितावशे राजसूयंक्रतुश्रेष्ठमाहरस्वेतिभारत २५ त्वयीष्टवतिपुत्रेहंहरिश्चंद्रवद्
द्रुतं मोदिष्येबहुलाःशश्वत्समाःशक्रस्यसंसदि २६ एवंभवतुवक्ष्येहंतवपुत्रंनराधिपं भूर्लोकंयदिगच्छेयमितिपांडुमथाब्रु
वं २७ तस्यत्वंपुरुषव्याघ्रसंकल्पंकुरुपांडव गंतासित्वंमहेंद्रस्यपूर्वैःसहसलोकतां २८ बहुविघ्नश्चनृपतेक्रतुरेषस्मृतो
महान् छिद्राण्यस्यतुवांछंतियज्ञघ्नाब्रह्मराक्षसाः २९ युद्धंचक्षत्रशमनंपृथिवीक्षयकारणं किंचिदेवनिमित्तंचभवत्यत्रक्ष
यावहं ३० एतत्संचिंत्यराजेंद्रयत्क्षेमंतत्समाचर अप्रमत्तोत्थितोनित्यंचातुर्वर्ण्यस्यरक्षणे ३१ भवएधस्वमोदस्वधनैस्तर्पयच
द्विजान् एतत्तेविस्तरेणोक्तंयन्मांत्वंपरिपृच्छसि ३२ आपृच्छेत्वांगमिष्यामिदाशार्हनगरींप्रति वैशं एवमाख्यायपार्थेभ्योनार
दोजनमेजय जगामैतैर्वृतोराजन्नृषिभिर्यैःसमागतः ३३ गतेतुनारदेपार्थोभ्रातृभिःसहकौरव राजसूयंक्रतुश्रेष्ठंचिंतयामा
सपार्थिवः ३४ सभापर्वणिसभावर्णनंसमाप्तं वैशं ऋषेस्तद्वचनंश्रुत्वानिशश्वासयुधिष्ठिरः चिंतयन्राजसूयेष्टिंनलेभेशर्मभा
रत १ राजर्षीणांचतंश्रुत्वामहिमानंमहात्मनाम् यज्वनांकर्मभिःपुण्यैर्लोकप्राप्तिंसमीक्ष्यच २ २

दीपनामित्युवाचेतिशेषः पाठांतरेतुस्पष्टं ८ १० अविग्रहाः कलहशून्याः ११ वार्द्धुषी वृद्ध्युपजीविका यज्ञसत्वानिक्रतूनांसामर्थ्यानिसघः पुष्कलफलप्रदत्वादिविषयाणि
१२ अनुकर्षदारिद्र्यात्राजकीयद्रव्यस्यातीतवर्षस्यऋणत्वेनधारणं निष्कर्षकराधिक्येनप्रजापीडनं मूर्छनंवृद्धिः १३ १५ षट्सुसंधिविग्रहादिषुयस्यप्रियादिकंकर्त्तुंनैगमै

हरिश्चंद्रंचराजर्षिंरोचमानंविशेषतः यज्वानंयज्ञमाहर्त्तुंराजसूयमियेषसः ३ युधिष्ठिरस्ततः सर्वानर्चयित्वासभासदः प्रत्यर्चितश्चतैः स
र्वैर्यज्ञायैवमनोदधे ४ सराजसूयंराजेंद्रकुरूणामृषभस्तदा आहर्तुंप्रवणंचक्रेमनः संचिंत्यसोसकृत् ५ भूयश्चाद्भुतवीर्यौजा
धर्ममेवानुचिंतयन् किंहितंसर्वलोकानांभवेदितिमनोदधे ६ अनुगृह्णन्प्रजाः सर्वाः सर्वधर्मभृतांवरः अविशेषेणसर्वेषांहितंच
क्रेयुधिष्ठिरः ७ सर्वेषांदीयतांदेयंमुष्णन्कोपमदावुभौ साधुधर्मेतिधर्मेतिनान्यच्छ्रूयेतभाषितं एवंगतेततस्तस्मिन्पितरीवा
श्वसन्जनाः नतस्यविद्यतेद्वेष्टाततोस्याजातशत्रुता ९ परिग्रहान्नरेंद्रस्यभीमस्यपरिपालनात् शत्रूणांक्षपणाच्चैवबीभत्सोः सव्यसा
चिनः १० धीमतः सहदेवस्यधर्माणामनुशासनात् वैनत्यात्सर्वतश्चैवनकुलस्यस्वभावतः ११ अविग्रहावीतभयाः स्वकर्मनिर
ताः सदा निकामवर्षाः स्फीताश्चआसन्जनपदास्तथा वार्द्धुषीयज्ञसत्वानिगोरक्षंकर्षणंवणिक् १२ विशेषात्सर्वमेवैतत्संजज्ञे
राजकर्मणा अनुकर्षंचनिष्कर्षंव्याधिपावकमूर्छनं १३ सर्वमेवनतत्रासीद्धर्मनित्येयुधिष्ठिरे दस्युभ्योवंचकेभ्यश्चराज्ञः प्रतिपरस्परं
१४ राजवल्लभतश्चैवनाश्रूयतमृषाकृतं प्रियंकर्तुमुपस्थातुंबलिकर्मस्वकर्मजं १५ अभिहर्तुंनृपाः षट्सुपृथग्जात्यैश्चनैगमै
: ववृधेविषयस्तत्रधर्मनित्येयुधिष्ठिरे १६ ॥ ॥

वणिग्भिः सहास्थासन्नितिशेषः इतरेनृपाः वणिग्वत्प्रयेनकरदीकृताइत्यर्थः तत्रतस्मिन्विषयोदेशः १६ १६ ॥ ॥

कामतोयथेष्ठंउपयुंज्ञाने: दिव्यान्नचस्त्रादिभोगंकुर्वेभिः यतोलोभेजेः विमोहोस्थे: राजैसैर्वृत्तिविशेषैस्तत्क्षादिभिः नाहंशैरपिवर्द्धधेद्वृद्धिमानत्रभूत १० यस्मिनविषये राजनराति
पित्रतः पितृगुरो: नीतिशिक्षरणादिभिःमातृतोमातृगुरोः वात्सल्यादिभिः १९ २० वाहुरांगुरांजलधातुजयं सम्राड्गुरांमूलात्तुजयं २१ २२ अनयः अग्निस्थापना

कामतोप्युपयुंज्ञानेराजैसैर्लोभिजैर्जनैः सर्वव्यापीसर्वगुणीसर्वसाहः ससर्वराड् १७ यस्मिन्नधिकृतः सम्राड्भ्राजमानोमहायशाः यत्र
जाननृश्यादिशः पितृतोमन्नतस्तथा अनुरक्ताः प्रजाश्चासन्नागोपालाद्विजातयः १८ वैशाम् समंत्रिणः समानाप्यभ्रातृंश्चवरन्तावरः
राजसूयप्रतितदापुनः पुनरपृच्छत १९ तेपृच्छ्यमानाः सहितावेचार्य्यमंत्रिणस्तदा युधिष्ठिरंमहाप्राज्ञंपिपक्षुमिदमब्रुवन २० येना
भिषिक्तोनृपतिर्वारुणंगुणमृच्छति तेनराजापितंकृत्स्नंसम्राड्गुणमभीप्सति २१ तस्यसम्राड्गुणार्हस्यभवतः कुरुनंदन राजसू
यस्यसमयंमन्यंतेसुहृदस्तव २२ तस्ययज्ञस्यसमयःस्वाधीनः क्षत्रसंपदा साम्नाषडग्नयोयस्मिंश्चीयंतेशंसितव्रतैः २३ दर्वीहोमानु
पादायसर्वान्यःप्राप्नुतेक्रतून अभिषेकंचयस्यांतेसर्वजित्सनचोच्यते २४ समर्थोसिमहाबाहोसर्वेतेवशगावयं अचिरात्त्वंमहारा
 जॅसूयमवाप्स्यसि २५ अविचार्यमहाराजराजसूयेमनः कुरु इत्येवंसुहृदः सर्वेपृथक्चसहचाब्रुवन २६ सधर्म्यपांडवस्तेषांव
चः श्रुत्वाविशांपते धृष्टमिष्टंवरिष्ठंचजग्राहमनसाहरिं २७ श्रुत्वासुहृद्वचस्तच्चजानंश्चाप्यात्मनः क्षमं पुनः पुनर्मनोदध्ये
राजसूयायभारत २८ सभ्रातृभिः पुनर्द्धीमानृत्विग्भिश्चमहात्मभिः मंत्रिभिश्चापिसहितोधर्मराजोयुधिष्ठिरः धौम्यद्वैपाय
नाद्येश्चमंत्रयामाससमंत्रवित् १९

र्यो निस्थजिलानिसाम्नासामवेदविहितैः मंत्रैश्चीयंतेरच्यंते २३ दर्वीतिदर्वीहोमाःअग्निहोत्रादिस्तस्त्सम्नीनसर्वान्क्रतून इष्टिपशुसोमयागान्प्राप्नुतेभ्याप्नोतितत्समुदायात्मक
इत्यर्थः। अभिषेकफलंसर्वजित्त्वं आत्रेयेणगमभिषेचतस्मादृंगः समंततसर्व तः पृथिवींजयन्परीयायेतिश्रुतं २४ २६ धृष्टंप्रगल्भं इष्टंआप्ततमं वरिष्ठंश्रेष्ठतमं २७ २९

कथंभवेत फलवतीतिशेषः ३० ३१ आत्मवान्जितचित्तः ३३ विमृश्येकथंयज्ञः सिद्ध्येत्कथंवालोकनाशोनस्यादितिविमर्शंकृतवान् सामर्थ्यंपृथ्वीजेतुंयोगंधनसंपत्तिं व्ययागमौधनस्यैव ३४ एतान्सम्यक्संख्यादिनाधियाचविमृश्य ३५ ३६ सर्वस्मात्लोकात्इतिलोकोत्कृष्टंपरम्लोकातीततस्मात्परंतमसः परस्तादितिश्रुतेः अतएवाप्र

युधिष्ठिरउवाच इयंयाराजसूयस्यसम्राडर्हस्यसुक्रतोः त्वद्धानस्यवदन्तःस्पृहामेसाकथंभवेत् ३० वैशं० एवमुक्तास्त्वनेतेनराज्ञाराजीवलोचने इदमूचुर्वचः कालधर्मराजंयुधिष्ठिरं ३१ अर्हस्त्वमसिधर्मज्ञराजसूयंमहाक्रतुं अथैवमुक्तेनृपतावृत्विग्भिर्ऋषिभिस्तथा ३२ मंत्रिणोभ्रातरश्चास्यतद्वचः प्रत्यपूजयन् सतुराजामहाप्राज्ञः पुनरेवात्मनात्मवान् ३३ भूयोविमृषतेपार्थोलोकानांहितकाम्यया सामर्थ्ययोगंसंप्रेक्ष्यदेशकालौव्ययागमौ ३४ विमृश्यसम्यक्चधियाकुर्वन्प्राज्ञोनसीदति नहियज्ञसमारंभः केवलात्मविनिश्चयात् ३५ भवतीतिसमाज्ञाययत्नतः कार्यमुद्वहन् सनिश्चयार्थंकार्यस्यकृष्णमेवजनार्दनं सर्वलोकात्परंमत्वाजगाममनसाहरिं अप्रमेयंमहाबाहुंकामाज्जातमजंनृषु ३७ पांडवस्तर्कयामासकर्मभिर्देवसम्मतैः नास्याकिंचिदविज्ञातंनाकिंचिदकर्मजं ३८ नसकिंचिन्नविषहेदितिकृष्णममन्यत सतुतांनैष्ठिकींबुद्धिंकृत्वापार्थोयुधिष्ठिरः ३९ गुरुवद्भूतगुरवेप्राहिणोद्दूतमंजसा शीघ्रगेनरथेनाशुसदूतः प्राप्ययादवान् ४२ ॥ ॥ ॥

स२

प्रमेयंवाङ्मनसातीतत्वात्वड्ः स्वांप्रजायेयेत्यादिश्रुतारीश्वरात् नतुकर्मवशत्वात् ३७ देवानांसंमतैः बालेनापिपूतनावधादिभिः संमितैरितिपाठेदेवकर्मसतुल्यैरित्यर्थः ३८ नास्येतिसर्वज्ञः सर्वकृत्सर्वसहइतिपादत्रयार्थः ३९ भूतगुरवेपिगुरुवत्आशीर्वादसंदेशादिनायुक्तं ४० ४१ ४२ ४२

४२ भ्रातापितृस्वसृजेन ४३ ४४ शंसितानंसावसरं कल्पंसमर्थं ४५ ५१ अध्यायः सर्वैः सर्वराजयाद्गजसूयोधिक्रियतेराजेयस्मप्रधानमहत्वनिवर्हणमुपायेनजरासं

द्वारकावासिनंकृष्णंसंद्वारवसांसमासदत् दर्शनाकांक्षिणंपार्थोदर्शनाकांक्षयाच्युतः ४१ इंद्रसेनेनसहितइंद्रप्रस्थमगात्त्वरा
व्यतीत्यविविधान्देशान्त्वरावान्क्षिप्रवाहनः ४२ इंद्रप्रस्थगतंपार्थमभ्यगछज्जनार्दनः संपूर्वंपितृवद्भ्राताधर्मराजेनहृ
जितः ४३ भीमेनचततोपश्यत्स्वसारंप्रीतिमान्पितुः प्रीतःप्रीतेनसुहृदारेमेसहितस्तदा ४४ अर्जुनेनयमाभ्यांचगु
रुवत्पर्युपासितः तंविश्रांतंशुभेदेशेक्षेमिणंकल्यमच्युतं ४५ धर्मराजःसमागम्यज्ञापयत्स्वप्रयोजनं युधिष्ठिरउवाच
प्रार्थितोराजसूयोमेनचासौकेवलेप्सया प्राप्यतेयेनतत्त्वंहिविदितंकृष्णसर्वशः ४६ यस्मिन्सर्वंसंभवतियश्चसर्वत्रपूज्यते
यश्चसर्वेश्वरोराजाराजसूयंसविंदति ४७ तंराजसूयंसुहृदःकार्यमाहुःसमेत्यमे तत्रमेनिश्चिततमंतवकृष्णगिराभवे
त् ४८ केचिद्धिसौहृदादेवनदोषंपरिचक्षते स्वार्थहेतोस्तथैवान्येप्रियमेववदंत्युत ४९ प्रियमेवपरीप्संतेकेचिदात्म
नियद्धितं एवंप्रायाश्चदृश्यंतेजनवादाःप्रयोजने ५० त्वंतुहेतूनतीत्यैतान्कामक्रोधौव्युदस्यच परमंयत्क्षमंलोकेयथा
वद्वक्तुमर्हसि ५१ सभापर्वणिवासुदेवागमनं कृष्णउवाच सर्वैर्गुणैर्महाराजराजसूयंत्वमर्हसि जानतस्त्वेवतेसर्वंकिंचिद्वक्ष्या
मिभारत १ जामदग्न्येनरामेणक्षत्रंयदवशेषितं तस्मादवरजंलोकेयदिदंक्षत्रसंज्ञितं २ ॥ ॥ ॥

रो.ज.२

धवधेनैवनायनदस्मीभिप्रेत्याहजानतस्तेइत्यादिना १ अवरजंअर्वाग्जातं यद्यपत्यलायनपरंअवशेषितंक्षत्रंतस्मात्अवराज्ञनीचान्नीचजंअतएवक्षत्र
संज्ञितंनतुक्षत्रकर्मयोग्यं २ २

स०
३२

तेष्वायंकुलसंकल्पः सर्वक्षत्रसमुदायेनसंकेतितः कृतः यः सर्वजित्सः अस्माकंमध्येसम्राड्राज्ञामधिराजाभविष्यतीतिवक्ष्यमाणः निदेशवाग्भिः पूर्वैपूर्वोपरे
शवाकोहमस्मिइतितेन्नविदितं निदेशभाग्भिरितिपाठेअस्वतंत्रैः क्षत्रियैरित्यर्थः ३ तत्रपूर्ववंशलः सम्राड्जातइत्याहऐलस्येति ऐलः पुरूरवाः इक्ष्वाकुवंशस्य
च मनोः इलाइक्ष्वाकुश्च तत्रइलायाः पुरूरवादयः इक्ष्वाकोर्नाभागादयश्चेतिसोमसूर्यवंश्यराजसु द्वौमुख्यौतयोः प्रकृतिंप्रजामिवप्रजाकरइत्यात् कौसीम
प्रकृतिरित्यत्रआहराज्ञानइति श्रेणिवद्धाः तत्माराम्नावलीवद्धाइवआत्तयावद्धाः ४ वंशद्वयेप्येवंक्रमतः शतंसम्राजांकुलानिजातानीत्याह ऐलवंश्या

कृतोयंकुलसंकल्पः क्षत्रियैर्वसुधाधिप निदेशवाग्भिस्तत्तेहविदितंभरतर्षभ ३ ऐलस्येक्ष्वाकुवंशस्यप्रकृतिंपरिचक्षते राजानः
श्रेणिवद्धाश्चतथान्येक्षत्रियाभुवि ४ ऐलवंश्यास्तुयेराजंस्तथैवैक्ष्वाकवोनृपाः तानिचैकशतंविद्धिकुलानिभरतर्षभ ५ ययातेस्त्वेव
भोजानांविस्तरोगुणतोमहान् भजतेद्यमहाराजविस्तारंसचतुर्दिशं ६ तेषांतथैवतांलक्ष्मींसर्वक्षत्रमुपासते इदानीमेववैराजन्जरा
संधोमहीपतिः ७ अभिभूयश्रियंतेषांकुलानामभिषेचितः स्थितोमूर्ध्निनरेंद्राणामोजसाक्रम्यसर्वशः ८ सोवनींमध्यमांभु
क्त्वामिथोभेदममन्यत प्रभुर्यस्तुपरोराजायस्मिन्नेकवशेजगत् ९ ससाम्राज्यंमहाराजप्राप्तोभवतियोगतः तंसराजाजरासंधं
संश्रित्यकिलसर्वशः १० राजन्सेनापतिर्यातःशिशुपालःप्रतापवान् तमेवचमहाराजशिष्यवत्समुपास्थितः ११ वक्रः
करूषाधिपतिर्मायायोधीमहाबलः अपरौचमहावीर्यौमहात्मानौसमाश्रितौ १२ जरासंधंमहावीर्यंतौहंसडिभकावु
भौ वक्रदंतःकरूषश्चकरभोमेघवाहनः मूर्ध्नादिव्यमणिंविभ्रद्यमद्भुतमणिंविदुः १३ मुरुंचनरकंचैवशास्तियोयवना
धिपः अपर्यंतवलोराजाप्रतीच्यांवरुणोयथा १४ १४

इति ५ ययातेःवंशेइतिशेषः अद्यसंप्रति ६ इदानीमेवअभिषेचितोनरेंद्रैरितिशेषः ७८ मध्यमांमथुरादेशरूपां अस्मदीयांअस्मासुद्वारवतीं
गतेषुभुक्त्वामिथःअस्माभिः सहभेदंवैरंअमन्यत तेनसःअस्मान्सर्वक्षत्रान्जित्वासएवसाम्राज्यंप्राप्तइत्याहप्रभुरित्यादिना चतुर्जस्तुपरोराजेतिपाठे
चतुर्जोजरासंधःद्वैमातरोपितानराराक्षसीचेतिचतुर्भ्योजातत्वात्

राम०
३२

भगदत्तो मध्यस्थ इत्याह भगेति १५ १६ त्वमस्ति तु कुंतिभोज एक एवेत्याह मातुल इति १७ पौंड्रकोपि परपक्ष एवास्तीत्याह जरेति १८ २० अस्मच्छ्वशुरो भीष्मकोपि परप

भगदत्तो महाराज वृद्धस्तव पितुः सखा स वाचा प्रणतस्तस्य कर्मणा च विशेषतः १५ स्नेहबद्धश्च मनसा पितृवद्भक्तिमांस्त्वयि प्रतीच्यां दक्षिणं चांतं पृथिव्याः प्रति यो नृपः १६ मातुलो भवतः शूरः पुरुजित्कुंतिवर्द्धनः स ते सन्नतिमानेकः स्नेहतः शत्रुसूदनः १७ जरासंधं गतस्त्वेवं पुरा यो न मया हतः पुरुषोत्तमविज्ञातो योसौ चेदिषु दुर्मतिः आत्मानं प्रतिजानाति लोकेस्मिन्पुरुषोत्तमम् आदत्ते सततं मोहाद्यः स चिन्हं च मामकं १९ वंगपुंड्रकिरातेषु राजा बलसमन्वितः पौंड्रको वासुदेवेति योसौ लोकेभिविश्रुतः २० चतुर्थभाङ्महाराज भोज इंद्रसखो बली विद्याबलाद्यो व्यजयत्स पांड्यक्रथकैशिकान् २१ भ्राता यस्याकृतिः शूरो जामदग्न्यसमोभवत् स भक्तो मागधं राजा भीष्मकः परवीरहा २२ प्रियाण्याचरतः प्रह्वान्सदा संबंधिनस्ततः भजतो न भजत्यस्मानप्रियेषु व्यवस्थितः २३ न कुलं स बलं राजन्नभ्यजानात्तथात्मनः पश्यमानो यशो दीप्तं जरासंधमुपस्थितः २३ उदीच्याश्च तथा भोजाः कुलान्यष्टादश प्रभो जरासंधभयादेव प्रतीचीं दिशमाश्रिताः २५ शूरसेना भद्रकारा बोधाः शाल्वाः पटच्चराः सुस्थलाश्च सुकुट्टाश्च कुलिंदाः कुंतिभिः सह २६ शाल्वायनाश्च राजानः सोदर्यानुचरैः सह दक्षिणा ये च पांचालाः पूर्वाः कुंतिषु कोशलाः २७ तथोत्तरां दिशं चापि परित्यज्य भयार्दिताः मत्स्याः सन्न्यस्तपादाश्च दक्षिणां दिशमाश्रिताः २८ तथैव सर्वपांचाला जरासंधभयार्दिताः स्वराष्ट्रं संपरित्यज्य विद्रुताः सर्वतो दिशं २९ कस्यचित्त्वथ कालस्य [illegible] कंसो निर्मथ्य बांधवान् बार्हद्रथसुते देव्याव[illegible]पागच्छद्वृथामतिः ३०

सेद्ध्वास्तीत्याह चतुर्थेति पृथिव्याश्चतुर्थांशभाक् २१ २३ सः बलं कुलं चात्मनो न ज्ञातवान् येनाप्रमेयकृष्णपक्षे गत्वा मया ज्ञामात्रापि सह कलहमिच्छतीति भावः २४ ३०

स० ३३

३४ कुलेर्मंत्री पुरोहितश्चैवेत्यादिनाप्राक्प्रदर्शितैः ३५ नहन्यामोनंतनवंतः वर्षशतैर्वषशतनतुल्यैस्त्रिभिर्वर्षैरित्यर्थः ३६ ३९ संहंसः हतः मरणतुल्यांमूर्छा

अस्ति: शाम्भिश्चनाम्नातःसहदेवानुजेबले बलेनैतेनसज्ञातीन्निभिन्यप्रद्ययामतिः ३१ अहंसमाप्तः सतस्मासीरत्तीवापनयोमहान् भो जरासंधस्पर्द्धैश्चपीड्यमानैर्दुरात्मना ३२ ज्ञातिचारामभीप्सन्दिरस्मत्संभावनाकृता दत्ताकूरायसुतनुंनामाङ्कसुतांतदा ३३ संका षेणद्वितीयेनज्ञातिकार्यमयाकृतं हतोकंसस्सुनामानोमयारामेणचाप्युत ३४ भयंतुसमतिक्रांतेजरासंधेसमुद्यते मंत्रोयमंत्रितो राजन्कुलैरष्टादशावरैः ३५ अनारमंतोनिभिंतोमहास्त्रैः शत्रुघातिभिः नहन्यामोवयंतस्यत्रिभिर्वर्षशतैर्बलं ३६ तस्यत्वमरसंका शौर्बलेनबलिनांवरौ नामभ्यांहंसडिभकावशस्त्रविधनावुभौ ३७ तावुभौसहितौवीरैर्जरासंधश्चवीर्यवान् त्रयस्त्रयाणांलोकानांप र्याप्ताइतिमेमतिः ३८ नहिकेवलमस्माकंयावंतोन्येचपार्थिवाः तथैवतेषामासीच्चबुद्धिर्बुद्धिमतांवर ३९ अथहंसइतिख्यातःक श्चिदासीन्महान्नृपः रामेणसहतस्तत्रसंग्रामेष्टादशावरे ४० हतोहंसइतिप्रोक्तमथकेनापिभारत तच्छ्रुत्वाडिभकोराजन्यमुना भस्यमज्जत ४१ विनाहंसेनलोकेस्मिन्नाहंजीवितुमुत्सहे इत्येतांमतिमास्थायडिभकोनिधनंगतः ४२ तथातुडिभकंश्रुत्वाहंसः परपुरंजयः प्रपेदेयमुनामेवसोपितस्यांन्यमज्जत ४३ तौसराजाजरासंधः श्रुत्वाचनिधनंगतौ पुरंशून्येनमनसाप्रययौभरतर्षभ ४४ ततोवयममित्रघ्नतस्मिन्प्रतिगतेनृपे पुनरानंदिनः सर्वेमथुरायांवसामहे ४५ यदात्वभ्येत्यपितरंसावैराजीवलोचना कंसभार्याजरासंधंदुहितामागधंनृपं चोदयत्येववरांजेइपतिव्यसनदुःखिता ४६ पतिघ्नंमेजहीत्येवंपुनः पुनररिंदम ततोवयंमहाराज

१

[illegible]

एम० ३३

नोत्रापितः ४० ४० ४० श्रीरामजयराम० ॥ ॥ ॥

संस्मरंतौविमनसौव्यपयातौनराधिप एवंस्कैनमहाराजसंक्षिप्यमहतींश्रियं ४८ पलायामोभयात्तस्यससुतज्ञातिवांधवाः इतिसंचिं
त्यसर्वेस्मप्रतीचींदिशमाश्रिताः ४९ कुशस्थलींपुरींरम्यांरैवतेनोपशोभितां ततोनिवेशंतस्यांचकृतवंतोवयंनृप ५० तथैवदु
र्गसंस्कारंदेवैरपिदुरासदं स्त्रियोपियस्यांयुध्येयुः किमुवृष्णिमहारथाः ५१ तस्यांवयममित्रघ्ननिवसामोकुतोभयाः आलोच्यगिरिमुख्यं
तंमागधंतीर्णमेवच ५२ माधवाः कुरुशार्दूलपरांमुदमवाप्नुवन् एवंवयंजरासंधादभितः कृतकिल्विषाः ५३ सामर्थ्यवंतः संवंधाद्भ
वंतंसमुपाश्रिताः त्रियोजनायतंसद्मत्रिस्कंधंयोजनावधि ५४ योजनांतेशतद्वारंवीरविक्रमतोरणं अष्टादशावरैर्नद्धंक्षत्रियैर्युद्धदुर्मदैः
५५ अष्टादशसहस्राणिभ्रातॄणांसंतिनः कुले आहुकस्यशतंपुत्राएकैकस्त्रिदशावरः चारुदेष्णः सहभ्रात्राचक्रदेवोथसात्यकिः
अहंचरौहिणेयश्चसांबः शौरिसमोयुधि ५६ एवमेतेरथाः सप्तराजन्नन्यान्निवोधमे कृतवर्माअनाधृष्टिः समीकः समितिंजयः
५७ कंकः शंकुश्चकुंतिश्चसप्तैतेवैमहारथाः पुत्रौचांधकभोजस्यवृद्धोराजाचतेदश ५८ वज्रसंहननावीरावीर्यवंतोमहारथाः
स्मरंतोमध्यमंदेशंवृष्णिमध्येव्यवस्थिताः ५९ सत्वंसम्राड्गुणैर्युक्तः सदाभरतसत्तम क्षत्रेसम्राजमात्मानंकर्तुमर्हसिभारत ६०
नतुशक्यंजरासंधेजीवमानेमहाबले राजसूयंत्वयावाप्तुमेषाराजन्मतिर्मम ६१ तेनरुद्धाहिराजानः सर्वेजित्वागिरिव्रजे कंदरेपर्व
तेंद्रस्यसिंहेनेवमहाद्विपाः ६२ सहिराजाजरासंधोयियक्षुर्वसुधाधिपैः महादेवंमहात्मानमुमापतिमरिंदम ६३ ॥ ॥

त

स०
३४

अध्यायः उक्तं १ ३ राजसूयं दुःसाध्यमत्वा शममेव परं मत्वा नरस्थाह विशालेति भूमिरिव स्थिराणि निश्चयात्मिका चित्तवृत्तिः सा बहुला विषयभेदाद्बहुप्रकारा इदं सा
धयिष्यामि इदं नेत्यादिरूपा अन्त एव विशाला शालेव शाला आवरणानि एवं वरणाज्ञस्य लोकायाधिरूढ इत्यति बहुरत्नसमाचिता बहुभिरनंतैः रत्नैः नज्ञात्मसुखहेतुभिर्विषयैर्व्याप्ता

अश्राद्धमतपसो रेणा निर्जितास्तेन पार्थिवाः प्रतिज्ञायाश्च पारं स गतः पार्थिवसत्तम सहि निर्जित्य निर्जित्य पार्थिवान्पृतनागतान्
पुरमानीय बध्वा च चकार पुरुषव्रजं ६५ वयं चैव महाराज जरासंधभयात्तदा मथुरां संपरित्यज्य गता द्वारवतीं पुरीं ६६ यदि
त्वेतन्महाराज यज्ञं प्राप्तुमभीप्ससि यतस्व तेषां मोक्षाय जरासंधवधाय च ६७ समारंभो न शक्योयमन्यथा कुरुनंदन राज
सूयस्य कार्त्स्न्येन कर्तुं मतिमतां वर ६८ इत्येषा मे मती राजन्यथा वा मन्यसेनघ एवं गते ममाचक्ष्व स्वयं निश्चित्य हेतुभिः
६९ महाभारते सभापर्वणि युधिष्ठिर उवाच उक्तं त्वया बुद्धिमता यन्नान्यो वक्तुमर्हति संशयानां हि निर्मोक्ता त्वन्नान्यो
विद्यते भुवि १ गृहे गृहे हि राजानः स्वस्य स्वस्य प्रियंकराः न च साम्राज्यमाप्तास्ते सम्राट्शब्दो हि कृत्स्नभाक् २ कथं परा
नुभावज्ञः स्वं प्रशंसितुमर्हति परेण समवेतस्तु यः प्रशस्तः स पूज्यते ३ विशाला बहुला भूमिर्बहुरत्नसमाचिता दूरं ग
म१ त्वा विजानाति श्रेयो वृष्णिकुलोद्वह ४

ततः पुरुषः कोयं पुरुषस्य बलाय बलं न जानाति सहदूरं गत्वा बुद्धेः परं निष्ठां प्रत्यगात्मरूपां प्राप्य श्रेयो मोक्षाख्यं विजानाति नान्यथा बहुषु दुःसाध्येषु विषयेषु व्यासक्तचित्तत्वात्
यथोक्तं भगवता व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन बहुशाखा ह्यनंताश्च बुद्धयो व्यवसायिनामिति व्यवसायस्तत्त्वनिश्चय इति ४ ॥ ॥

एम०
३४

यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेदित्युक्तेः शम एव श्रेयानित्याह शममिति प्राचस्तु भूमिर्मंत्रभूमिः मंत्रस्य विषयः विशा
ला विस्तीर्णा च बहुशाखा पुरुषभेदे न बुद्धिभेदात् बहुला बहुरूपा च विस्फुरणात्। अत एव बहुभिर्मंत्रज्ञैः सह मंत्रेण बहुभिर्बृहिरण्यहस्त्यश्वरथमित्रस्त्रीप्रभृतिभिरनेके
रनेकैरर्थैः समन्विता एतस्याश्च मंत्रभूमेर्विगाह्यमानायाः दूरं गत्वा अंगपंचकषड्गुणशक्तित्रयसिद्धित्रयसंधिपायादि समस्तनीतिभूमिमवगाह्य। अतस्त्वमेव सर्वज्ञोऽस

शममेव परं मन्ये शमात्क्षेमं भवेन्मम आरंभे पारमेष्ठ्यं तु न प्राप्यमिति मे मतिः ५ एवमेते हि जानंति कुले जाता मनस्विनः कश्चित्क
दाचिद्देतेषां भवेत् श्रेष्ठो जनार्दन ६ वयं चैव महाभाग जरासंधभयात्तदा शंकिताः स्म महाभाग दौरात्म्यात्तस्य चानघ ७ अहं हि तव
दुर्धर्ष भुजवीर्याश्रयः प्रभो नात्मानं बलिनं मन्ये त्वयि तस्माद्धि शंकिते ८ त्वत्सकाशाच्च रामाच्च भीमसेनाच्च माधव अर्जुनाद्वा
महाबाहो हंतुं शक्यो न वेत्ति वै ९ एवं जानन् हि वार्ष्णेय विमृशामि पुनः पुनः त्वं मे प्रमाणभूतोसि सर्वकार्येषु केशव तच्छ्रुत्वा चा
ब्रवीद्भीमो वाक्यं वाक्यविशारदः १०

द्वितैषी कार्याकार्यनिश्चयं वेत्सीति भावः इति शमस्वीकारे हेतुमाह आरंभे राजसूयारंभे क्रतुफलं पारमेष्ठ्यं परमेष्ठिना ब्रह्मणा दुःप्रापं अप्राक्त्वात् अस्माकमित्यर्थः ५ कुलमु दि
श्याह एवमिति। एते स्म अस्मदीयाः सभासदः मनस्विनो भीमादयः श्रेष्ठः स्पर्शवान् जेतुं समर्थो भविष्यतीति जानंति ६ न त्वस्माकं मध्ये तादृशः कश्चिदस्तीत्याह वय
यं चेति ७ शंकायां हेतुमाह अहं हीति ८ तथापि त्वत्प्रभृतीनां चतुर्णां मध्ये कश्चिदेनं हंतुं समर्थोऽस्ति न भवेति विमृशामि युष्माकमप्यनंतशक्तित्वं जानन्नित्याह
त्वत्सकाशादिति १०

११ नीत्यार्थान्नीतिप्राप्यानर्थान् नीतिनिरतीर्यांत्तेवा १२ मागधंजरासंधं भीमंप्रकोपयन्कृष्णउवाचस्वार्थोनितिवालः अनुसन्नः अनुबंधेविपाकं। अर्थेपरायणस्वकार्य्येन
त्परं १४ नमर्ष्यन्तिनविचारयंति यौवनाश्विर्म्मांधाता जयान्जेतव्यान्वासीतरशत्रून्जित्वा जयाद्यः पंचसाम्राज्यहेतवइतिभावः हित्वाकरानितिपाठेकरस्माद्यः १५
सर्वाकारंजयादिपंचकप्रकारं यौवनाश्विप्रभृतयः एकैकेनगुणेनसाम्राज्यंप्रापुः सत्वेतुतत्संवैरपिगुणैरिछ्सीतिभावः १६ ननिवगुणानाह निग्राह्यानि अहमर्हतिने
नियम्याः विजिताः धनबलस्वलक्षणंध्वज्ञेयस्यसाम्राज्यस्य एतेनजयरूपंकंतनसुख्यमिसुक्तंतद्यौवनाश्वेदृष्टंप्राप्तिः पालनेभगीरथे प्राप्तिरपिसाम्राज्यलक्षणंइ सेक

भीमउवाच अनारंभपरोराजावल्मीकइवसीदति दुर्वलश्चानुपायेनवलिनंयोधितिष्टति ११ अतंद्रितस्तुप्रायेणदुर्वलोवलिनंरिपुं
जयेत्सम्यक्प्रयोगेणनीत्यार्थानात्मनोहितान् १२ कृष्णेनयोमयिवलंजयः पार्थेधनंजये मागधंसाधयिष्यामइष्टिंत्रयइवाग्नयः १३ कृ
ष्णउवाच अर्थानारभतेवालोनानुबंधमवेक्षते तस्मादरिंनमृष्यंतिवालार्थपरायणं १४ हित्वाकरान्यौवनाश्विः पालनाच्चभगीरथ
ः कार्तवीर्यस्तपोवीर्य्याद्वलात्तुभरतोविभुः १५ ऋद्ध्यामरुत्तस्तान्पंचसम्राजस्त्वनुशुश्रुम साम्राज्यमिछतस्तेतुसर्वाकारंयुधिष्ठिर
१६ निग्राह्यलक्षणंप्राप्तोधर्मार्थनयलक्षणैः १७ वार्हद्रथोजरासंधस्तद्विद्धिभरतर्षभ नचैनमनुरुध्यंतेकुलान्येकशतंनृपाः
१८ तस्मादिहवलादेवसाम्राज्यंकुरुतेहिसः १९ ॥ अपा ३ ॥ ॥

देशानुवंगेणायोज्यंसाचधर्मादिलक्षणेनसहितेतितियोज्यंधर्म्मः योगः कार्तवीर्य्ये। अर्थादृद्धिर्मरुत्तेनानयोनीतिवलंभरते १७ वार्हद्रथोजरासंधस्त्वतः प्राकुर्मन्त्रान्वश्या
ननुमश्शानएवमेवसत्तायुगे निग्राह्यलक्षणंप्राप्तोधर्माप्ति नयलक्षणैरितिपठंति जरासंधस्तत्साम्राज्यंनिर्हन्तिसाध्यानअनुमेशान्अनुतिष्ठन् सर्वाकारंसाम्रा
ज्यमिछतस्त्वजरासंधः प्रतिकूलोस्तीति विद्धि नर्हिसएवसम्राडस्त्वितिचेत्तस्यराजपीडाकारत्वान्नेत्याह नचैनमिति १८ ॥ ॥

ग्राह्यलक्षणंप्राप्तइत्यर्धेनसंवंधः किंभूतस्य धर्माप्तिनयलक्षणैः धर्मोलाभोनीतिश्चएतैर्लक्षणैः
सतांयुगेसंघेएवमेववयमिवमंत्रान्विचारान्वश्यान्स्व २

१० नः अस्माभिर्नैवदृष्टः जरासंधेनस्वभागः अस्वीकृतः पुरुषतः मूर्द्धाभिषिक्तेषु पुरुषेषु तेनसर्वेवशीकृताइत्यर्थः २१ २२ शतावरान् शतसूनान् २३ अस्पृष्टा नारुद्रैदैवतायमितिप्रसेकमभिमृष्टानां २३ तदासत्कृतोभवतीस... ध्यात्दृष्ट्ययोज्यं। ततः एतांनिग्रहाद्देतोः प्रतिबाधमहेतुमाशास्महे। यतमागधं प्रतिबाधमनन्तरो हेतोरितियोज्यं २४ क्रूरंराजवधारूपंकर्म्मपशुपतयेबलिदानप्रवात्स्यतेकारयिष्यति २५ तंदुर्बलेराजाकथंपार्थउपैष्यतीतितस्यदुर्जेयत्वमुक्त्वापि तज्ज

राजभागोजोहिराज्ञानोजरासंधमुपासते नचतुष्यतितेनाल्पवाल्पादनयमास्थितः २० मूर्द्धाभिषिक्तंनृपतिंप्रधानपुरुषंबला
त् आदत्तेनच नोदृष्टोभागः पुरुषतः क्वचित् २१ एवंसर्वान्वशेचक्रेजरासंधः प्रतापवान् तंदुर्बलतरोराजाकथंपार्थउपे
ष्यति २२ प्रोक्षितानांप्रमृष्टानांराज्ञांपशुपतेर्गृहे पशूनामिवकाप्रीतिर्जीवितेभरतर्षभ २३ क्षत्रियः शस्त्रमरणोयदाभव
तिसत्कृतः ततःस्ममागधंसंख्येप्रतिबाधेमयद्वयं २४ षडशीतिः समानीताः शेषाराजंश्चतुर्दश जरासंधेनराजानस्ततः क्रूरं
प्रवर्त्स्यते २५ प्राप्नुयात्सयशोदीप्तंतत्रयोविघ्नमाचरेत् जयेद्यश्चजरासंधंससम्राणियतंभवेत् २६ सभापर्वणि युधिष्ठि
रउवाच सम्राड्गुणमभीप्सुर्वैयुष्मान्स्वार्थपरायणः कथंप्रहिणुयांकृष्णसोहं केवलसाहसात् १ भीमार्ज्जुनावुभौनेत्रेम
नोमन्येजनार्दन मनश्चक्षुर्विहीनस्यकीदृशंजीवितंभवेत् २ जरासंधबलंप्राप्यदुष्पारंभीमविक्रमं यमोपिविजयेत्राजौतत्र
वः किंविचेष्टितं ३

यस्यसाम्राज्यहेतुरितिमाहप्राप्नुयादिति सयशोरंजेजरस्यदित्यभिप्रायः २६ अध्यायः संक्षा... एवंजरासंधात्भीषितोराजा कृष्णेनयस्मादिना श्लोकेनभीमेनोक्तउपायोदु
ष्कर इत्याह युष्मानृकृष्णभीमार्ज्जुनान् प्रहिणुयांजरासंधवधार्थमितिशेषः विजेतांजेष्यति यमोपिविजयेताजावितिगौडपाठस्तु यमः यमराणादुर्बलोपिजरासंधे
संधसहायेसतिविजयेतशत्रूनितिशेषः ३ ३

स०
३६

अर्थांतरे दृष्टफलाद्विपरीतफले कार्ये युक्तं पुरुषं प्रति अनर्थः प्रतिपद्यते प्राप्नोति तस्मात्कार्याकार्ययोर्मिथ्याप्रतिपत्तिः राजसूयबुद्धिः नयुक्ता ४ कार्यस्य संन्यासं कर्म मात्रस्य त्यागं न तु कर्तुमात्रस्य कषायं सुलभमिति संतेर्दर्शनात् पारिव्राज्यमेव रोचये इत्यर्थः ५ ६ वीर्यं उत्साहः पक्षो वासुदेवः भूमिः मंत्रपूर्वकः कार्यनिश्चयः

अस्मिंस्त्वर्थांतरे युक्तमनर्थः प्रतिपद्यते तस्मान्न प्रतिपत्तिस्तु कार्यायुक्तामताम्मम ४ यथाहं विमृशाम्येकस्तत्तावच्छ्रूयतां मम संन्यासं रोचये साधु कार्यस्यास्य जनार्दन प्रतिहंति मनो मेद्य राजसूयो दुराहरः ५ वैशंपायन उवाच पार्थः प्राप्य धनुः श्रेष्ठमक्षय्ये च महेषुधी रथं ध्वजं सभां चैव युधिष्ठिरमभाषत ६ धनुः शस्त्रं शरा वीर्यं पक्षो भूमिर्यशो बलं प्राप्तमेतन्मया राजन् दुष्प्रापं यदभी॥प्सितं ७ कुले जन्म प्रशंसंति वैद्याः साधु सुनिष्ठिताः बलेन सदृशं नास्ति वीर्यं तु मम रोचते ८ कृतवीर्यकुले जातो निर्वीर्यः किं करिष्यति निर्वीर्यं तु कुले जातो वीर्यवांस्तु विशिष्यते ९ क्षत्रियः सर्वशो राजन्यस्य वृत्तिर्द्विषज्जये सर्वैर्गुणैर्विहीनोपि वीर्यवान्हि तरेद्रिपून् १० सर्वैरपि गुणैर्युक्तो निर्वीर्यः किं करिष्यति गुणभूता गुणाः सर्वे तिष्ठंति हि पराक्रमे ११ जयस्य हेतुः सिद्धिर्हि कर्म दैवं च संश्रितं संयुक्तो हि बलैः कश्चित्प्रमादान्नोपयुज्यते १२ तेन द्वारेण शत्रुभ्यः क्षीयते सबलो रिपुः १३

बलं शारीरं तेन नास्ति रूपं सामर्थ्यं वैद्याः विद्या विद्यावंतः बलेनेति उत्साहस्य वश्यत्वं यानि इत्यर्थः ११ सिद्धिर्योगः असंतामिनिवेश इति यावत् सिद्धिर्निष्पत्तिर्योगः योगश्चेति विरवः तत्र सिद्धिरूपं वीर्यं कर्मे परिस्पंदरूपं भाग्यं तदुभयापेक्षं नोपयुज्यते तेन कार्यक्षमो भवति १२ तेन प्रमादेन शत्रुभ्यः शत्रुतः १३ १३

राम०
३६

१४ तस्मादुत्साहवताकर्म्मैवकर्त्तव्यंजयायेत्साहजेरेति १५ अकरणेदोषमाह अनारंभइति कर्म्मणाइतिशेषः आरब्धमपिप्रतिकूलंचेत्तत्राह गुणान्तरैर्वोक्ता हन्तुरादिसंपत्ति
रूपात् नैर्गुण्यंपश्चाशक्तत्वं १६ पश्चात्अशक्तत्वनिश्चयाद्दृष्टं काषायंगैरिकरक्तंवस्त्रं १७ अध्यायः जातस्य १ ३ सुनयस्यशोभनस्यमंत्रस्य अनपायस्यदेवा
दिप्रातिकूल्यहीनस्यसंयोगेप्राप्तौसत्यां परमउत्कर्षः क्रमः उपक्रमः सिद्ध्यति तेनचसंगतस्य द्वयोर्मेलनेन असाम्यं अन्यतरोत्कर्षः जायते चकारोहेतौ यतःद्व

जः२

दैन्यंयथाबलवतितथामोहोबलान्विते तावुभौनाशकौहेतूराज्ञात्याज्यौजयार्थिना १४ जरासंधविनाशंचराज्ञांचपरिरक्षणं यदि
कुर्यामयत्तार्थंकिंततः परमंभवेत् १५ अनारंभेहिनियतोभवेदगुणनिश्चयः गुणान्निःसंशयाद्राजन्नैर्गुण्यंमन्यसेकथं १६
काषायंसुलभंपश्चान्मुनीनांशममिच्छतां साम्राज्यंतुभवेच्छक्यंवयंयोत्स्यामहेपरान् १७ सभापर्वणिजरासंधवधे वासुदेवउ
वाच जातस्यभारतेवंशेतथाकुन्त्याः सुतस्यच यावैयुक्तामतिः सेयमर्जुनेनप्रदर्शिता १ नस्ममृत्युंवयंविद्मरात्रौवायदिवा
दिवा नचापिकंचिदमरमयुद्धेनानुशुश्रुम २ एतावदेवपुरुषैः कार्यंहृदयतोषणं नयेनविधिदृष्टेनयदुपक्रमतेपरान् ३
अनयस्यानुपायस्यसंयुगेपरमः क्षयः संशयोजायतेसाम्याज्जयश्चनभवेद्द्वयोः ४ तेवयंनयमास्थायशत्रुदेहसमीपगाः क
थंतंनगच्छेम वृक्षमिवनदीरयाः ५ पररंध्रेपराक्रान्ताः स्वरंध्रावरणेस्थिताः ६ ॥ ॥

योर्युध्यतोः साम्यंनभवतितस्माद्दिनायुद्धं अशक्तत्वनिश्चयायोगात् शङ्कितं कयात्सीमवस्थानंपराभवहेतुरिति भावः विपर्ययेदोषमाह अनयस्यानुपायस्यसं
युगेपरमःक्षयः इति ननुपरस्यापिनयादिमत्त्वेकथंस्वस्यजयः स्यादित्याशंक्याह संशयोजायतेसाम्याज्जयश्चनभवेत्द्वयोरिति द्वयोरुपायादिसाम्येतुद्वयोरपि
परस्परभयाज्जयेसंशयएवंभवतिनतुजयः चात्पराजयोवाकिंतुताटस्थ्येनद्वावपितिष्ठतइत्यर्थः ४ साम्येप्यारंभेवैफल्यमित्याशंक्यस्वस्योत्कर्षमाह सोऽहं
नेतव्यमिति ५ ६

नन्वेवं महतो राजकस्योत्थापनेन क्रतुविघ्न एवमेवेदिस्साधं क्याह स्मृ इति ७ ८ उत्कर्षे कामप्राप्तिः सिद्धा साम्यं तु नैवमेवेदिस्याह एक इति श्रियं साम्राज्यलक्ष्मीं तत्र स्माद न्यतरं जयलिप्सया हेतोः अहं क्षयं स्वीयं नैवोपलक्षये किंतु परस्यैव क्षयोभविष्यतीत्यर्थः तत्क्षयं चैवेति पाठे तस्य जरासंधस्य क्षयं लक्षये संभावये ९

गूढानीकैरतिबलैर्न युध्येरीरिभिः स ८ इति बुद्धिमतां नीतिः तन्ममापीह रोचतां ७ अनवद्या ह्यसंबुद्धाः प्रविष्टाः शत्रुसद्म तत् शत्रुर्देहमुपाक्रम्य तं कामं प्राप्नुयामहे ८ एकोह्येव श्रियं नित्यं बिभर्ति पुरुषर्षभ अंतरात्मेव भूतानां तत्क्षयं चैव लक्षये ९ अथ वैनं निहत्याजौ शेषेणापि समाहताः प्राप्नुयाम ततः स्वर्गं ज्ञातित्राणपरायणाः १० युधिष्ठिर उवाच कृष्ण को यं जरासंधः किंवीर्यः किंपराक्रमः यस्त्वां स्पृष्ट्वाग्निसदृशं न दग्धः शलभो यथा ११ कृष्ण उवाच शृणु राजन् जरासंधो यद्वीर्यो यत्पराक्रमः यथा चोपेक्षितोऽस्माभिर्बहुशः कृतविप्रियः १२ अक्षौहिणीनां तिसृणामासीत्समरदर्पितः राजा बृहद्रथो नाम मगधाधिपतिर्बली १३ रूपवान् वीर्यसंपन्नः श्रीमानतुलविक्रमः नित्यं दीक्षांकिततनुः शतक्रतुरिवापरः १४ तेजसा सूर्यसंकाशः क्षमया पृथिवीसमः यमांतकसमः क्रोधे श्रिया वैश्रवणोपमः १५ तस्याभिजनसंयुक्तैर्गुणैर्भरतसत्तम व्याप्तेयं पृथिवी सर्वा सूर्यस्येव गभस्तिभिः १६ स काशिराजस्य सुते यमजे भरतर्षभ उपयेमे महावीर्यो रूपद्रविणसंयुते तयोश्चकार समयं मिथः स पुरुषर्षभः १७

निहत्य संप्राप्य शेषेणावधेन वधहेतुना शत्रुणा शेषः संकर्षणो नेत्तेउपयुक्तेनरे वधेइतिविश्वः त्रातपः जरासंधवद्धा राजानः १० पतिः पालकः १३ १४ यमो वैवस्वतः अंतकः कालः १५ १६ १७

नातिवर्त्तिष्येवेषम्यं न करिष्ये १८ २२ रत्नैः मुनियोग्यैः उत्कृष्टरत्नैः २३ २७ अवातं चाशुकदंष्टं सरसमिति पावत् आमफले शलाटुः स्वाद्युक्तत्वान मुमेत्रिशुद्रसमरः ञ्च

नातिवर्त्तिष्यइत्येवं पत्नीभ्यां सन्निधौ नृप । स ताभ्यां शुशुभे राजा पत्नीभ्यां वसुधाधिप: १८ प्रियाभ्यामनुरूपाभ्यां करेणुभ्यामिव द्विपः ।
तयोर्मध्यगतश्चापि राजन् वसुधाधिप १९ गंगायमुनयोर्मध्ये मूर्त्तिमानिव सागरः विषयेषु निमग्नस्य तस्य यौवनमभ्यगात् २० न
च वंशकरः पुत्रः तस्याजायत कश्चन मंगलैर्बहुभिर्होमैः पुत्रकामाभिरिष्टिभिः नाससाद च पृथ्वीशः पुत्रं कुलविवर्द्धनं २१ अथ का
शीवनः पुत्रं गौतमस्य महात्मनः शुश्राव तपसि श्रान्तमुदारं चण्डकौशिकं २२ यदृच्छयागतं तं तु वृक्षमूलमुपाश्रितं पत्नीभ्यां सहितो
राजा सर्वै रत्नैरतोषयत् २३ तमब्रवीत्सत्यधृतिः सत्यवागृषिसत्तमः परितुष्टोस्मि राजेन्द्र वरं वरय सुव्रत २४ ततः सभार्य्यः ।
प्रणतस्तमुवाच बृहद्रथः पुत्रदर्शननैराश्याद्बाष्पसंदिग्धया गिरा २५ राजोवाच भगवन् राज्यमुत्सृज्य प्रस्थितोहं तपोवनं किं वरे
णाल्पभाग्यस्य किं राज्येनाप्रजस्य मे २६ कृष्ण उवाच एतच्छ्रुत्वा मुनिर्ध्यानमगमत्क्षुभितेन्द्रियः तस्यैव चाम्रवृक्षस्य छायायां समु
पाविशत् २७ तस्योपविष्टस्य मुनेरुत्संगे निपपात ह शुकदष्टं महारम्यमेकमाम्रफलं किल २८ तत्प्रगृह्य मुनिश्रेष्ठो हृदयेना
भिमन्त्र्य च राज्ञे ददावप्रतिमं पुत्रसंप्राप्तिकारणं २९ उवाच च महाप्राज्ञस्तं राजानं महामुनिः गच्छ राजन् कृतार्थोसि निवर्त्तस्व नरा
धिप ३० ॥ ॥ ति १

वातमिति पाठे नास्ति पात पिता वातो यस्य तत् २८ २९ ॥ ॥ ॥

यथासमयं यथाप्रतिज्ञं नातिवर्तिष्य इति नदर्शितिनरिस्या ३२ ३४ प्रजायेतां सुषुवतुः ३५ स्फिक्कटिप्रदेशो भागः ३६ ते शकले ३७ गर्भसंप्लवे गर्भपाते सति

एतच्छ्रुत्वा मुनेर्वाक्यं शिरसा प्रणिपत्य च मुनेः पादौ महाप्राज्ञः स नृपः स्वगृहं गतः ३१ यथासमयमाज्ञाय तदा स नृपसत्तमः द्वाभ्यामेकं फलं प्रादात्पत्नीभ्यां भरतर्षभ ३२ ते तदाम्रं द्विधा कृत्वा भक्षयामासतुः शुभे भावित्वादपि चार्थस्य सत्यवाक्यतया मुनेः ३३ तयोः समभवद्गर्भः फलप्राशनसंभवः ते च दृष्ट्वा स नृपतिः परां मुदमवाप ह ३४ अथ काले महाप्राज्ञ यथासमयमागते प्रजायेतामुभे राजन्शरीरशकले तदा ३५ एकाक्षिबाहुचरणे अर्धोदरमुखस्फिजे दृष्ट्वा शरीरशकले प्रवेपतुरुभे भृशं ३६ उद्विग्ने सह संमन्त्र्य ते भगिन्यौ तदाबले सजीवे प्राणिशकले तत्यजाते सुदुःखिते ३७ तयोर्धात्र्यौ सुसंवीते कृत्वा गर्भसंप्लवे निर्गम्यान्तःपुरद्वारात्समुत्सृज्याभिजग्मतुः ३८ ते चतुष्पथनिक्षिप्ते जरा नामाथ राक्षसी जग्राह मनुजव्याघ्र मांसशोणितभोजना ३९ कर्तुकामा सुखवहे शकले सा तु राक्षसी संयोजयामास तदा विधानबलचोदिता ४० ते समानीतमात्रे तु शकले पुरुषर्षभ एकमूर्तिधरो वीरः कुमारः समपद्यत ४१ ततः सा राक्षसी राजन्विस्मयोत्फुल्ललोचना न शशाक समुद्वोढुं वज्रसारमयं शिशुं ४२ बालस्ताम्रतलं मुष्टिं कृत्वा चास्ये निधाय सः प्राक्रोशदतिसंरब्धः सतोय इव तोयदः ४३ तेन शब्देन संभ्रान्तः सहसान्तःपुरे जनः निर्जगाम नरव्याघ्र राज्ञा सह परंतप ४४ ते चाबलपरिम्लानपयःपूर्णपयोधरे निराशे पुत्रलाभाय सहसैवाभ्यगच्छतां ४५ ॥ ॥ ॥

३९ सुखवहे एकीकृतयोर्वहनं हि सुखेन भवतीति प्रसिद्धं ४० समानीतमात्रे संयोजितमात्रे ४१ ४२ ४३ ४४ ४५ ५ ॥

५० अराक्षसीवेमत: ५१ कामयाकामनयातीतिरछाविहारिणी ५२ अध्याय: जरा तिष्टमानासुस्थिरा ४ ५ ६ ६

तेथदृष्ट्वातथाम्र्तेराजानंचेष्टसंततिं तंचवालंसुवलिनंचिंतयामासराक्षसी ४६ नार्हामिविषयेराज्ञोवसंतीपुत्रगृद्धिनः वालंपु
त्रमिमंहंतुंधार्म्मिकस्यमहात्मनः ४७ सातंवालमुपादायमेघलेखेवभास्करं कृत्वाचमानुषंरूपमुवाचवसुधाधिपं ४८ राक्ष
स्युवाच बृहद्रथसुतस्तेयंमयादत्तः प्रगृह्यतां तवपत्नीद्वयेजातोद्विजातिवरशासनात् धात्रीजनपरित्यक्तोमयायंपरिरक्षितः ४९
कृष्णउवाच ततस्तेभरतश्रेष्टकाशिराजसुतेशुभे तंवालमभिपद्याशुप्रस्रवैरभ्यषिंचतां ५० ततः सराजासंहृष्टः सर्वंतदुपल
लभ्यच अपृच्छद्धेमगर्भाभांराक्षसींतामराक्षसीं ५१ राजोवाच कात्वंकमलगर्भाभेममपुत्रप्रदायिनी कामंमेब्रूहिकल्याणि
णित्वंनाप्रतिभासिमे ५२ सभापर्वणि राक्षस्युवाच जरानामास्मिभद्रंतेराक्षसीकामरूपिणी तववेश्मनिराजेंद्रपूजिता
न्यवसंसुखं १ गेहेगेहेमनुष्याणांनित्यंतिष्ठामिराक्षसी गृहदेवीतिनाम्नावैपुरासृष्टास्वयंभुवा २ दानवानांविनाशाय
स्थापितादिव्यरूपिणी योमांभक्त्यालिखेत्कुड्येसपुत्रैर्यौवनान्वितां ३ गृहेतस्यभवेद्वृद्धिरन्यथाक्षयमाप्नुयात् त्वद्गृ
हेतिष्ठमानाहंपूजिताहंसदाविभो ४ लिखिताचैवकुड्येषुपुत्रैर्बहुभिरावृता गंधपुष्पैस्तथाधूपैर्भक्ष्यभोज्यैःसुपूजिता ५
साहंप्रत्युपकारार्थंचिंतयाम्यनिशंनव तवेमेपुत्रशकलेदृष्टवत्यस्मिधार्मिक: ६ ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥

११ नंदिकरः समृद्धिकृत् १२ अध्यायः कस्य ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

संश्लेषितेमयायोदेवाःकुमारः समपद्यत तवभाग्यान्महाराजहेतुमात्रमहंत्विह ७ मेरुंचाप्यवहर्तुंशक्ताकिंपुनस्तवबालकं गृहसंपूज
नात्तुष्टामयाप्रत्यर्पितस्तव ८ कृष्णउवाच एवमुक्त्वातुसाराजंस्तत्रैवांतरधीयत ससंगृह्यकुमारंतंप्रविवेशगृहंनृपः ९ तस्यबा
लस्ययत्कृत्यंतच्चकारनृपस्तदा आज्ञापयच्चराक्षस्यामागधेषुमहोत्सवं १० तस्यनामाकरोच्चैवपितामहसमः पिता जरयासंधितो
यस्माज्जरासंधोभवत्वयं ११ सोवर्द्धतमहातेजामगधाधिपतेः सुतः प्रमाणबलसंपन्नोहुताहुतिरिवानलः मातापित्रोर्नंदिकरः
शुक्लपक्षेयथाशशी १२ इतिसभापर्वणिजरासंधवधे कृष्णउवाच कस्यचित्त्वथकालस्यपुनरेवमहातपाः मगधेषूपचक्रामभग
वांश्चंडकौशिकः १ तस्यागमनसंहृष्टः सामात्यः सपुरःसरः सभार्यः सहपुत्रेणनिर्जगामबृहद्रथः २ पाद्यार्घ्याचमनीयैस्तमर्चया
मासभारत सनृपोराज्यसहितंपुत्रंतस्मैन्यवेदयत् ३ प्रतिगृह्यचतांपूजांपार्थिवाद्भगवानृषिः उवाचमागधंराजन्प्रहृष्टेनांतरात्म
ना ४ सर्वमेतन्मयाज्ञातंराजन्दिव्येनचक्षुषा पुत्रस्तुशृणुराजेंद्रयादृशोयंभविष्यति ५ अस्यरूपंचसत्वंचबलमूर्जितमेवच ए
षश्रियासमुदितः पुत्रस्तवनसंशयः ६ प्रापयिष्यतितत्सर्वंविक्रमेणसमन्वितः अस्यवीर्यवतोवीर्यंनानुयास्यतिपार्थिवाः ७
पततोवैनतेयस्यगतिमन्येयथाखगाः विनाशमुपयास्यंतियेचास्यपरिपंथिनः ८ देवैरपिविसृष्टानिशस्त्राण्यस्यमहीपते नरु
जंजनयिष्यंतिगिरेरिवनदीरयाः ९ ॥ ॥

२३ सर्वभूतात्मभूतस्य सर्वेषां तेजसां तथा आत्मवत्प्रियतमो मे सखा: १४ २५ अशस्त्रनिधनौ नचिरे तेशस्त्रेणनिधनं ययोस्तौ २६ ३६ ३६ ३६

सर्वमूर्द्धाभिषिक्तानामेषमूर्ध्नि ज्वलिष्यति प्रभाहरोऽयं सर्वेषां ज्योतिषामिव भास्करः १० एनमासाद्य राजानः समृद्धबलवाहनः विनाशमु
पयास्यंति शलभा इव पावकं ११ एषश्रियः समुदिताः सर्वराज्ञांग्रहीष्यति वर्षास्विवोदीर्णजलानदीर्नदनदीपतिः १२ एषधारयि
तासम्यक्चातुर्वर्ण्यंमहाबलः शुभाशुभमिवस्फीतासर्वसस्यधराधरा १३ अस्याज्ञावशगाः सर्वेभविष्यंतिनराधिपाः सर्वभूतात्मभूत
स्यवायोरिवशरीरिणः १४ एषरुद्रंमहादेवंत्रिपुरांतकरंहरं सर्वलोकेष्वतिबलः साक्षाद्द्रक्ष्यतिमागधः १५ एवंब्रुवन्नेवमुनिः
स्वकार्यमिवचिंतयन् विसर्जयामासनृपंबृहद्रथमथारिहन् १६ प्रविश्यनगरींचापिज्ञातिसंबंधिभिर्वृतः अभिषिच्यजरासंधंमग
धाधिपतिस्तदा १७ बृहद्रथोनरपतिः परांनिर्वृतिमाययौ अभिषिक्तेजरासंधेतदाराजाबृहद्रथः पत्नीद्वयेनानुगतस्तपोवनचा
रोऽभवत् १८ ततोवनस्थेपितरिमात्रोश्चैवविशांपते जरासंधः स्ववीर्येणपार्थिवानकरोद्वशे १९ वैशंपायनउवाच अथदीर्घ
स्यकालस्य तपोवनचरोनृपः सभार्यः स्वर्गमगमत्तपस्तप्त्वाबृहद्रथः २० जरासंधोपिनृपतिर्यथोक्तंकौशिकेनतत् वरप्रदान
मखिलंप्राप्यराज्यमपालयत् २१ निहतेवासुदेवेनतदाकंसेमहीपतौ जातोवैवैरनिर्बंधः कृष्णेनसहतस्यवै २२ भ्रामयित्वाशतगु
णमेकोनंयेनभारत गदाक्षिप्ताबलवतामागधेनगिरिव्रजात् २३ तिष्ठतोमथुरायांवैकृष्णस्याद्भुतकर्मणः एकोनयोजनशतेसा
पपातगदाशुभा २४ दृष्ट्वापौरैस्तदासम्यक्गदाचैवनिवेदिता गदावसानंतत्ख्यातंमथुरायाः समीपतः २५ तस्यास्तांहंस
डिभकावशस्त्रनिधनावुभौ मंत्रेमतिमतांश्रेष्ठौ नीतिशास्त्रविशारदौ २६ ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥

स० ५०

१७ नीतिहेतोः बलीयसास्पर्द्धानकर्त्तव्येतिनीतिमन्तरर्थे २८ अध्यायः पतितो १ २ जयो र्ज्जुनः ३ १० १०

येनोमयानेकथितोः सर्वमेवमहाबलो अयत्नपारांनालोकानांपर्य्याप्तास्रतिमेमतिः २१ एवमेषतरावीरबलिभिः कुकुरांधकैः ब
लिभिश्चमहाराजनीतिहेतोरुपेक्षितः १८ सभापर्वणिराजसंधोत्पत्तिः वासुदेवउवाच पतितोहंसडिभकौकंसश्चसगणोहतः
जरासंधस्यनिधनेकालोयंसमुपागतः १ नशक्योसौरणेजेतुंसर्वैरपिसुरासुरैः प्राणयुद्धेनजेतव्यः सइत्युपलभामहे २
मयिनीतिर्बलंभीमेरक्षिताचावयोर्जयः मागधंसाधयिष्यामइष्टिंत्रयइवाग्नयः ३ त्रिभिरासादितोस्माभिर्विजनेसनराधिपः
नसंदेहोयथायुद्धमेकेनाप्युपयास्यति ४ अवमानाच्चलोभाच्चबाहुवीर्याच्चदर्पितः भीमसेनेनयुद्धायध्रुवमप्युपयास्यति
५ अलंतस्यमहाबाहुर्भीमसेनोमहाबलः लोकस्यसमुदीर्णस्यनिधनायांतकोयथा ६ यदिमेहृदयंवेत्सियदितेप्रत्ययोम
यि भीमसेनार्ज्जुनौशीघ्रंन्यासभूतौप्रयच्छमे ७ वैशंपायनउवाच एवमुक्तोभगवताप्रत्युवाचयुधिष्ठिरः भीमार्ज्जुनौसमालो
क्यसंप्रहृष्टमुखोस्थितो ८ युधिष्ठिरउवाच अच्युताच्युतमामैवंव्याहरामित्रकर्शन पांडवानांभवान्नाथोभवंतंचाश्रितावयं
९ यथावदसिगोविंदसर्वंतदुपपद्यते नहित्वमग्रतस्तेषांयेषांलक्ष्मीः पराङ्मुखी १० १० १०

राम० ५०

॥ ॥ ॥ ॥

बलौघः सेनाप्रवाहः विचक्षणैः प्रणेतव्यः अन्यथान्धवज्जडवद्वा किंचित्कर्तुंबलमसमर्थः १६ एतदेवसदृष्टांतमाहयतइति धीवराः वधिकाःपत्नीयस्मिन्देशेनिम्नंअ
यततस्त्राक्रमणीयस्थानंभवति तेहिततः द्वितीयार्थेतसिः दृष्टंनिरुपद्रवंदेशंप्रतिनिर्गंतुंसैन्यंनयंति नतुपुरःसुमुखेमहावीरस्याग्रेपातयंतिअत्रदृष्टांतोयथाधीवराः न

निरस्तश्चजरासंधोमोक्षिताश्चमहीक्षितः राजसूयश्चमेलब्धोनिर्देशेनतवनिघ्नतः ११ क्षिप्रमेवयथात्वेतत्कार्यंसमुपपद्यते अप्रमत्तो
जगन्नाथतथाकुरुनरोत्तम १२ त्रिभिर्भवद्भिर्हिविनानाहंजीवितुमुत्सहे धर्मकामार्थरहितोरोगार्त्तइवदुःखितः १३ नशौरिणावि
नापार्थोनशौरिःपांडवंविना नाजेयोस्त्यनयोर्लोकेकृष्णयोरितिमेमतिः १४ अयंचबलिनांश्रेष्ठःश्रीमानपिवृकोदरः युवाभ्यां
सहितोवीरःकिन्नकुर्यान्महायशाः १५ सुप्रणीतोबलौघोहिकुरुतेकार्यमुत्तमं अंधंबलंजडंप्राहुःप्रणेतव्यंविचक्षणैः १६
यतोहिनिम्नंभवतिनयंतिहिततोजलं यतश्छिद्रंततश्चापिनयंतेधीवराजलं १७ तस्मान्नयविधानज्ञंपुरुषंलोकविश्रुतं
वयमाश्रित्यगोविंदंयतामःकार्यसिद्धये १८ एवंप्रज्ञानयबलंक्रियोपायसमन्वितं पुरस्कुर्वीतकार्येषुकृष्णंकार्यार्थसिद्धये
१९ एवमेवयदुश्रेष्ठंपार्थःकार्यार्थसिद्धये अर्जुनःकृष्णमन्वेतुभीमोन्वेतुधनंजयं नयोजयोबलंचैवविक्रमेसिद्धिमेष्य
ति २० वैशंपायनउवाच एवमुक्तास्ततःसर्वेभ्रातरोविपुलौजसः वार्ष्णेयःपांडवेयौचप्रतस्थुर्मागधंप्रति २१ ॥

दीनजलजीविनः यतश्छिद्रंकुल्याद्रूपंततः तेनैवमार्गेणजलंवारिरहितंकेदारादिप्रदेशंनयंतिनतद्वत् १७ बलोपक्षयानीतिरेवश्रेष्ठइत्युपसंहरतितस्मादिति १८
१९ २० २१

परिछदं स्वविनं दंडकमंडलुकाषायादिरूपां सामग्रीं आछाघसीकृत्य तयास्ववेषंतिरोधायेत्यर्थः २२ २४ ईशौ नरनारायणौ सर्वाणि निमेषोन्मेषादिमहाप्रलयां

वर्चस्विनां ब्राह्मणानां स्नातकानां परिछदान् आछाद्य सुहृदां वाक्यैर्मनोज्ञैरभिनंदिताः २२ अमर्षरोषितक्रोसानां ज्ञातसर्थमुख्य
तेजसां रविसोमाग्निवपुषां दीप्तमासीत्तदा वपुः २३ हतमेने जरासंधं दृष्ट्वा भीमपुरोगमौ एककार्यसमुद्यंतौ कृष्णौ युद्धेपराजितौ
२४ ईशौ हि तौ महात्मानौ सर्वकार्यप्रवर्तिनौ धर्मकामार्थलोकानां कार्याणां च प्रवर्तकौ २५ कुरुभ्यः प्रस्थितास्ते तु मध्येन कु
रुजांगलं रम्यं पद्मसरो गत्वा कालकूटमतीत्य च २६ गंडकीं च महाशोणं सदानीरां तथैव च एकपर्वतके नद्यः क्रमेणैत्यात्रजंतते
२७ उत्तीर्य सरयूं रम्यां दृष्ट्वा पूर्वांश्च कोशलान् अतीत्य जग्मुर्मिथिलां मालां चर्मण्वतीं नदीं २८ अतीत्य गंगां शोणं च त्रयस्ते प्रा
ङ्मुखास्तदा कुशचीरच्छदा जग्मुर्मागधं क्षेत्रमच्युताः २९ ते शश्वद्गोधनाकीर्णमंबुमंतं शुभद्रुमं गोरथं गिरिमासाद्य ददृशुर्माग
धं पुरं ३० सभापर्वणि वासुदेव उवाच एष पार्थ महान् भाति पशुमान्नित्यमंबुमान् निरामयः सुवेश्माढ्यो निवेशो मागधः शुभः
१ वैहारो विपुलः शैलो वराहो वृषभस्तथा तथा ऋषिगिरिस्तात शुभाश्चैत्यकपंचमाः २ एते पंच महाशृंगाः पर्वताः शीतल
द्रुमाः रक्षंतीवाभिसंहत्य संहतांगा गिरिव्रजं ३ ३

तानिवर्तयितुं शीलं यथो सोनिवर्तनात्रा विसर्थः २५ अध्यायः एष मागधः मगधदेशसंबंधी निवेशः विन्यासः १ २ ३ ३

गौतमस्य क्षयादिति स्थानादैश्वर्यात् च्युतो सो शूद्रायां जातोस्मिकः काक्षीवदादीनां वंशः मानवं वंशं भजते स गौतमस्तु नृपाणामनुग्रहः ६ गौतमक्षयं गृहं गौतमौ

पुष्पवेष्टितशाखाग्रैर्गंधवद्भिर्मनोहरैः निगूढाइवलोध्राणांवलैः कामिजनप्रियैः ४ शूद्रायांगौतमोयत्रमहात्मासंशितव्रतः औशीनर्यामजन
यत्काक्षीवाद्यान्सुतान्मुनिः ५ गौतमस्य गृहात्तस्मादथासौतत्रसद्मनि भजतेमागधंवंशं सनृपाणामनुग्रहः ६ अंगवंगादयश्चैवराजा
नःसुमहाबलाः गौतमक्षयमभ्येत्यरमंतेस्मपुरार्जुन ७ वनराजीस्तुपश्येमाः पिप्पलानांमनोरमाः लोध्राणांचशुभाःपार्थगौतमौकःस
मीपजाः ८ अर्बुदःशक्रवापीचपन्नगौशत्रुतापनौ स्वस्तिकस्यालयश्चात्रमणिनागस्यचोत्तमः ९ अपरिहार्यामेघानांमागधामनुनाकृताः कौशि
कोमणिमांश्चैवचक्रातेचाप्यनुग्रहं १० एवंप्राप्यपुरंरम्यंदुराधर्षंसमंततः अर्थसिद्धिंत्वनुपमांजरासंधोभिमन्यते वयमासादनेतस्यदर्पमद्य
हरेमहि ११ वैशंप० एवमुक्त्वाततः सर्वेभ्रातरोविपुलौजसः वार्ष्णेयःपांडवौचैवप्रतस्थुर्मागधंपुरं १२ हृष्टपुष्टजनोपेतंचातुर्वर्ण्यस
माकुलं स्फीतोत्सवमनाधृष्यमासेदुश्चगिरिव्रजं १३ ततोद्वारमनासाद्यपुरस्यगिरिमुच्छ्रितं बार्हद्रथैःपूज्यमानंतथानगरवासिभिः मा
गधानांतुरुचिरंचैत्यकंतंसमाद्रवन् १५

कः गौतमस्यौको गृहं ८ १३ पुरस्य गिरिं पुरमाकारसंलग्नं गिरिं तुल्यं महान्तं चैत्यक इति भाषायां प्रसिद्धं १४ चैत्यकं नगरस्तबकं १५ ॥

चैत्रेतिमांसादं मांसाहारं ऋषभं वृषभाकारं दैत्यं चासमासाद हतवान् भेरीः दुंदुभीन् मांसतालाभिः मांसेन तता लोध्वनिपरिच्छेदो यासां ताभिराकृतिभिः उपलक्षिताः इतियोज्यं महतो हि कां
स्यादिभाजनस्य सकृदाहतस्य चिरकालानुवर्ती ध्वनिरिति प्रसिद्धं श्वेतु मांसशब्देन ह्यादर्शां त्थांतालशब्देन मध्यमांगुष्ठ भ्रमाणां चोक्त ह्यादशयादेशप्रमाणाभिरिति व्याचक्षते त्वाकृति
भिः संमिता इत्यध्याहृत्य योजना उमयत्र समाना तालः करतलेंगुष्ठमध्यमाभ्यां च संमिते गीतकालक्रियामानेतालः खड्गादिमुष्टिश्चेति विश्वः मांसतालाभिरिति गौड

वृषभं मांसादमृषभमाससाद बृहद्रथः तं हत्वा मासतालाभिस्तिस्रो भेरीरकारयत् १६ स्वपुरे स्थापयामास तेन चानह्य चर्मणा यत्र ताः प्राणदन् भे
र्यो दिव्यपुष्पावचूर्णिताः १७ भंक्त्वा भेरीत्रयं तेपि चैत्यप्राकारमाद्रवन् शिरसीव समाघ्नंतो जरासंधं जिघांसवः १८ स्थिरं सुविपुलं शृंगं सुम
हत्तत्पुरातनं अर्चितं गंधमाल्यैश्च सततं सुप्रतिष्ठितं २० विपुलैर्बाहुभिर्वीरास्तेभिहत्याभ्यपातयन् ततस्ते मागधं हृष्टाः पुरं प्रविविशुस्तदा
२१ एतस्मिन्नेव काले तु ब्राह्मणा वेदपारगाः दृष्ट्वा तु दुर्निमित्तानि जरासंधमदर्शयन् २२ पर्यग्निं कुर्वंश्च नृपं द्विरदस्थं पुरोहिताः तत
स्तच्छांतये राजा जरासंधः प्रतापवान् दीक्षितो नियमस्थोसावुपवासपरोभवत् २३ स्नातकव्रतिनस्ते तु बाहुशस्त्रा निरायुधाः युयुत्सवः प्र
विविशुर्जरासंधेन भारत २४ भक्ष्यमाल्यापणानां च ददृशुः श्रियमुत्तमां स्फीतां सर्वगुणोपेतां सर्वकामसमृद्धिनीं २५ तां तु दृष्ट्वा
समृद्धिं ते वीथ्यां तस्यां नरोत्तमाः राजमार्गेण गच्छंतः कृष्णभीमधनंजयाः बलाद्गृहीत्वा माल्यानि मालाकारान्महाबलाः २६

पाठे तु मांसस्य नालवद्वेष्टनकर्त्रीभिः मांसनालाभिर्वध्रीभिः १६ तेन चर्मणा च आनह्य आनद्धेति अवहितेन संबंधः १६ अवचूर्णिताः अवकीर्णा आसन् इत्यर्थः यत्र पुरस्य गिरेः
१७ १८ चैत्यकं त्विमाहृषदां चयनेन निर्वृत्तं १९ शृंगं तं गिरिमेव शृंगवदुच्छ्रितं भाषायां मुनारा इति प्रसिद्धं २० २२ पर्यग्निमकुर्वन् ज्वलता उल्मुकेन परितो भ्राम्यमाणेन
पशुमिव पर्यग्निकृतवंतः २३ २६

विरागवसनाः विचित्ररागवसनाः २७ गोवासं गोष्ठं २८ २९ कक्ष्याः द्वारदेशाः उत्तममध्यमाधमजनावस्थितियोग्याः ३० ३८ स्वस्त्यस्तु कुशलं राजन् कुशलं निर्विघ्नं

विरागवसनाः सर्वेस्रग्विणोमृष्टकुण्डलाः निवेशनमथाजग्मुर्जरासंधस्यधीमतः २७ गोवासमिववीक्षंतः सिंहाहैमवतायथा शालस्तंभनि
भातिपांचंदनागुरुरूषिताः २८ अशोभंतमहाराजबाहवोयुद्धशालिनां तान्दृष्ट्वाद्विरदप्रख्यान्शालस्कंधानिवोद्गतान् व्यूढोरस्कान्मागधा
नांविस्मयःसमपद्यत २९ तेत्वतीत्यजनाकीर्णाः कक्ष्यास्तिस्रोनरर्षभाः अहंकारेणराजानमुपतस्थुर्गतव्यथाः ३० तान्पाद्यमधुपर्कार्हान्स
त्कृतिंगतान् प्रत्युत्थायजरासंधउपतस्थेयथाविधि ३१ उवाचचैतान्राजासौस्वागतंवोस्त्वितिप्रभुः मौनमासीत्तदापार्थभीमयोर्जनमेजय ३२
तेषांमध्येमहाबुद्धिःकृष्णोवचनमब्रवीत् वक्तुंनायातिराजेंद्रएतयोर्नियमस्थयोः ३३ अर्वाङ्निशीथात्परतस्त्वयासार्धंवदिष्यतः यज्ञागारेस्थापयि
त्वाराजाराजगृहंगतः ३४ ततोर्धरात्रेसंप्राप्तेयातोयत्रस्थिताद्विजाः तस्यह्येतद्व्रतंराजन्बभूवभुविविश्रुतं ३५ स्नातकान्ब्राह्मणान्प्राप्तान्श्रुत्वा
ससमितिंजयः अप्यर्द्धरात्रेनृपतिःप्रत्युद्गच्छतिभारत ३६ तांस्त्वपूर्वेणवेशेनदृष्ट्वासनृपसत्तमः उपतस्थेजरासंधोविस्मितश्चाभवत्तदा ३७
तेतुदृष्ट्वैवराजानंजरासंधंनरर्षभाः इदमूचुरमित्रघ्नाःसर्वेभरतसत्तम ३८ स्वस्त्यस्तुकुशलंराजन्नितितत्रव्यवस्थिताः तंनृपंनृपशार्दूलप्रेक्षमा
णाःपरस्परं ३९ तानब्रवीज्जरासंधस्तथापांडवयादवान् आस्यतामितिराजेंद्रब्राह्मणच्छद्मसंवृतान् ४० अथोपविविशुःसर्वेत्रयस्तेपु
रुषर्षभाः संप्रदीप्तास्त्रयोलक्ष्म्यामहाध्वरइवाग्नयः ४१ तानुवाचजरासंधःसत्यसंधोनराधिपः विगर्हमाणःकौरव्यवेशग्रहणवैकृतान् नस्नातक
व्रताविप्राबहिर्माल्यानुलेपनाः ४२

यथास्यात्तथास्त्वित्युत्तरांशयत्स्वस्तिश्चविनाशिमोक्षपदंतत्तेस्तु कुशलंसमक्षंमरिष्यमाणस्यतत्प्राप्तस्वस्वरूपभावादितिभावः माजीवेत्यर्थः ३९ ४१ बहिर्माल्यानु
लेपनाः बहिः समावर्तनादिनिमित्तंविना ४२

४२ वाचिवीर्यं न तु क्रियायां विलिंगस्थं अमल्लिंगमनत्कर्मेत्यर्थः ४६ अर्हणां पूजां अस्मदागमने अस्मान्प्रति आगमने ४७ ४९ स्नातकत्वं समर्थयति हि मील्लवादिकमपि स्

भवंतो हि नृलोकेस्मिन्विदितं मम सर्वशः कृपापुष्पवंत अभुजे ज्याकृतलक्षणौ ४३ बिभ्रतः क्षात्रमोजश्च ब्राह्मण्यं प्रतिजानथ एवं विरागवसना बहि
र्माल्यानुलेपनाः सत्यं वदत के यूयं सत्यं राजसु शोभते ४४ चैत्यकस्य गिरेः शृंगं भित्वा किमिव छद्मना अद्वारेण प्रविष्टाः स्थ निर्भया राजकिल्बिषात् ४५
वदंत्या वाचि वीर्यं च ब्राह्मणस्य विशेषतः कर्म चैतद्विलिंगस्थं किं वोद्य प्रसमीक्षितं ४६ एवं च मामुपास्थाय कस्माच्च विधिनार्हणां प्रणीतां नानुगृह्णी
त कार्यं किं चास्मदागमे ४७ एवमुक्ते ततः कृष्णः प्रत्युवाच महामनाः स्निग्धगंभीरया वाचा वाक्यं वाक्यविशारदः ४८ कृष्ण उवाच स्नातकान्ब्राह्मणा
न्राजन्विद्ध्यस्मांस्त्वं नराधिप स्नातकव्रतिनो राजन्ब्राह्मणाः क्षत्रिया विशः ४९ विशेषनियमाश्चैषामविशेषाश्च संत्युत विशेषवांश्च सततं क्षत्रि
यः श्रियमृच्छति ५० पुष्पवत्सु ध्रुवा श्रीश्च पुष्पवंतस्ततो वयं क्षत्रियो बाहुवीर्यस्तु न तथा वाक्यवीर्यवान् ५१ अप्रगल्भं वचस्तस्य तस्माद्बार्हद्रथेरितं

स्ववीर्यं क्षत्रियाणां तु बाह्वोर्धाता न्यवेशयत् तद्दिदृक्षसि चेद्राजन्द्रष्टास्यद्य न संशयः ५२ अद्वारेण रिपोर्गेहं द्वारेण सुहृदो गृहान् प्रविशंति
नरा धीरा द्वाराण्येतानि धर्मतः ५३ कार्यवंतो गृहानेत्य शत्रुतो नार्हणां वयं प्रतिगृह्णीम तद्विद्धि एतन्नः शाश्वतं व्रतं ५४ सभापर्वणि जरासंध
वधे जरासंधवधाय न स्मराम्यहं कदा वैरं कृतं युष्माभिरित्युत चिंतयंश्च न पश्यामि भवतां प्रति वैकृतं १ वैकृते वासति कथं मन्यध्वं मामनागसं
अरिं वै ब्रूत हे विप्राः सतां समय एष हि २

क्षत्रियत्वेन समर्थयते विशेषेत्यादिना ५० ५१ वचस्तस्य वाग्वीर्यत्वस्य ५२ ५३ अद्वारेणेत्यादिना वैरं प्रकाशयति ५४ अध्याय वैकृतं अपकारः १ कथं अरिं मन्यध्वं तद्ब्रू
तरणषः तस्य वचन समयः मर्यादा २

प्रसज्जति प्रसंजयति अर्थेद्वेऽपघातं आरोपयति सः क्षत्रियः वृजिनां कष्टां गतिं आप्नोति न संशय इति योजना ३ अपहंति चात्मानं ४ ५ प्रजानां वा नागसं जलमयविपरीत
मर्थं वदस्व ६ वैरमूलं प्रकाशयति कुलेति ७ ८ एनोऽपगच्छेत् एनः पापं कर्तृ अपगच्छेत् आप्नुयात्तद्विराधं १० ११ ननु ब्राह्मणो ब्राह्मणमालभते इत्यादिना सर्वज्ञाती

अर्थे धर्मोपघाताद्धि मनः समुपतप्यते यो नागमिषु प्रसज्जति क्षत्रियो हि न संशयः ३ अतो मया वा लोके धर्मज्ञः सन्महायशः वृजिनां गतिमाप्नोति स्रेय
सोऽप्युपहंति च ४ त्रैलोक्ये क्षत्रधर्मो हि श्रेयान्वै साधुचारिणां नान्यं धर्मं प्रशंसंति ये च धर्मविदो जनाः ५ तस्मै प्रस्थितस्येह स्वधर्मे नियतात्मनः त्व
नागसः प्रजानां च प्रमादाद्विजलस्थ ६ कृष्ण उवाच कुलकार्यं महाबाहो कश्चिदेकः कुलोद्वहः वहते यस्त्रियो गाढ्यमभ्युद्यतास्त्वयि ७ त्वया चोप
दृता राजन्क्षत्रिया लोकवासिनः नरागः क्रूरमुत्पादनमस्ते किमनागसं ८ राजा रुरुः कथं साधून्हिंसान्नृपतिसत्तम तद्वृत्तः सन्निगृह्य त्वं कायो
पजिहीर्षसि ९ अस्मान्त्वं नोऽगच्छेद्धि कृतं वा हेद्य यत्त्वया वर्षं हि शक्ता धर्मस्य रक्षणे धर्मचारिणः १० मनुष्याणां समालंभो न च दृष्टः कदाचन स
कथं मानुषैर्देवं यष्टुमिच्छसि शंकरं ११ सवर्णो हि सवर्णानां पशुसंज्ञां करिष्यति कोऽन्य एवं यथा हि त्वं जरासंध वृथा मतिः १२ यस्यां यस्यामवस्थायां
यद्यत्कर्म करोति यः तस्यां तस्यामवस्थायां तत्फलं समवाप्नुयात् १३ तैस्त्वां ज्ञातिक्षयकरं वयमार्तानुसारिणः ज्ञातिवृद्धिनिमित्तार्थं विनिहंतुमि
हागताः १४ नास्ति लोके पुमानन्यः क्षत्रियेष्विति चैव यत् मन्यसे स च ते राजन्सुमहान्बुद्धिविप्लवः १५ को हि जानन्नभिजनमात्मवान्
क्षत्रियो नृप नाविशेत्स्वर्गमतुलं रणानंतरमव्ययं १६ स्वर्गं ह्येव समास्थाय रणयज्ञेषु दीक्षिताः जयंति क्षत्रिया लोकांस्तद्विद्धि मनुजर्षभ १७

यानां सर्वकर्मणां मनुष्याणामालंभो देवतार्थं वधः शूपनेइत्याशंक्याह सवर्णो हीति १२ १५ अभिजनं नं सज्जातीयं पास्यन पाजानन् १६ १७ ॥

स्वर्गतिश्चस्त्वेदः यशः तपोवेदोक्तंकर्मेव स्वर्गयोनिः सुखहेतुः युद्धेमस्तुश्चव्यभिचारवान्स्वर्गहेतुः वेदादीनांचव्रतादीनांतिस्वर्गहेतुत्वंमास्तियुद्धे मस्तुस्त्कनतये
मर्थः १८ एषःयुद्धेमस्तुः ऐंद्रःइंद्रसंबंधीवैजयंतः मासादः तस्मात्सिद्धेतुरित्यर्थः येनलब्धेन समाहितःदृशः १९ स्वर्गमार्गहेतोः विग्रहोवैरंचस्माभिःसहयथा
नघपुरपातिशयात् ततथाः अस्मास्तिचचहेतुः क्षत्रियावमानइत्याहमागधेरितिसैमैरेवनवाहुबलेन। २० २१ विषहंचसहंविगतः सहः सोढुंयोग्यःसो

म३

स्वर्गयोनिर्महद्ब्रह्मस्वर्गयोनिर्महद्यशः स्वर्गयोनिस्तपोयुद्धेमृत्युस्सोऽव्यभिचारवान् १८ एषहैंद्रोवैजयंतोगुणैर्नित्यंसमाहितः येनासुरान्पराजित्य
जगत्पातिशतक्रतुः १९ स्वर्गमार्गप्रकस्तस्माद्विग्रहोवैयथातव मागधैर्विपुलैस्सैन्यैर्बाहुबलदर्पितः २० मावमंस्थाः परान्राजन्नास्ति
वीर्यंनरेनरे समंतेजस्त्वयाचैवविशिष्टंवानरेश्वर २१ यावदेतदसंबुद्धंतावदेवभवेत्तव वि[illegible]ह्यमेतदस्माकमतोराजन्ब्रवीतिमे २२
जहित्वंसदृशेष्वेवमानदर्पंचमागध मागमः समुत्तमासः सबलश्चयमक्षयं २३ दंभोद्भवः कार्तवीर्यभद्रस्त्वबृहद्रथः श्रेयसोह्यवम
त्येहविनेशुःसबलाः नृपाः २४ मुमुक्षमानास्त्वत्तोहिनवयंब्राह्मणाध्रुवं शौरिरस्मिहृषीकेशोनृवीरौपांडवाविमौ अनयोर्मातुलेयंचकृ
ष्णंमांविद्धितेरिपुं २५ त्वामाह्वयामहेराजन्स्थिरोयुध्यस्वमागध मुंचवानृपतीन्सर्वान्गच्छवात्वंयमक्षयं २६ जरासंधस्त्वाव नाजिता
नैवेनरपतीनहमादद्मिकाश्चन अजितः पर्यवस्यातांकोत्रयोनमयाजितः २७

ठायस्मतत् यद्यात्वएवेतोनृत्वलंचास्माकंविषहंसुसहं २२ २४ मुमुक्षमाणात्त्वत्तोहि त्वत्तः त्वांमुमुक्षमाणाः योगः कपठेनहेतुमिच्छंतः योगोविग्र
ध्यघातिनीतिविश्व' मुमुक्षमाणाइतिपाठेनृपानितिशेषः ब्राह्मणाध्रुवाइतिपाठेब्राह्मणाधमाः २५ २६ अजितः अन्यैरितिशेषः पर्यवस्याता
शत्रुः २७

२९ वृद्धेनवृहद्रथनयास्थितेन ३० ३१ हंसडिम्भकावेवकौशिकचित्रसेनाविताहययोरीति ३३ ३४ मधुभिः यादवैः ३५ नहंतुइयेषेत्स्वयः नत्रहेतुःप्राह्लीमिति ३६

एक२ स२

क्षत्रियस्सन्तंस्वांकुर्धर्मकृस्योपजीवनं विक्रमवृशमानीयकामतोयत्समाचरेत् २८ देवतार्थमुपाहृत्यराज्ञःकृष्णकथंभयात् त्वहमद्यविमुच्येयंक्षात्रंव्रतमनुस्मरन् २९ सैन्यंसैन्येनव्यूढेनएकेनवापुनः द्वाभ्यांत्रिभिर्वायोत्स्येहंयुगपत्पृथगेववा ३० वैशंपायनउवाच एवमुक्त्वाजरासंधः सहदेवाभिषेचनं आज्ञापयत्तदाराजायुयुत्सुर्भीमकर्म्मभिः ३१ सतुसेनापतीराजंस्मारभरतर्षभ कौशिकंचित्रसेनंचतस्मिन्युद्धउपस्थिते ३२ ययोस्तेनामनीराजन्हंसेतिडिम्भकेतिच पूर्वंसंकथितेपुंसिनृलोकेलोकसत्कृते ३३ तंतुराजन्विभुःशौरीराजानंबलिनांवरं स्मृत्वापुरुषशार्दूलशार्दूलसमविक्रमं ३४ सत्यसंधोजरासंधोभुविभीमपराक्रमं भागमन्यस्यनिर्दिष्टमवध्यंमधुभिर्मृधे ३५ नात्मना[illegible]त्मवतांमुख्यइयेषमधुसूदनः ब्राह्मीमाज्ञांपुरस्कृत्यहंतुंहलधरानुजः ३६ सभापर्वणिजरासंधवधे वैशंपायनउवाच ततस्तंनिश्चितात्मानंयुद्धाययदुनंदनः उवाचवाग्मीराजानंजरासंधमधोक्षजः १ कृष्णउवाच त्वयाराजन्केनतेराजन्योद्धुमुत्सहतेमनः अस्मदन्यतमेनेहसज्जीभवतुकोयुधि २ एवमुक्तःसनृपतिर्युद्धंवव्रेमहाद्युतिः जरासंधस्ततोराजाभीमसेनेनमागधः ३ आदायरोचनांमाल्यंमंगल्यान्यपराणिच धारयन्नगदान्मुख्यान्निर्वृतीर्वेदनानिच उपतस्थेजरासंधंयुयुत्सुंवैपुरोहितः ४

अध्यायः ततस्तं १ आदायपुरोहितइतिसार्द्धसंबंधः अगदान्औषधानि निर्वृतीर्वेदनानिच दुःखमूर्छयोःकालेसुखसंज्ञाकराणि २ ३ ४ ४

समनह्यतसंनद्धोबभूव ५ १० कक्षैः दोर्मूलैः कक्षांप्रकोष्ठगतां रज्जुंधुत्वानोपतः तत्रकक्षेत्वास्फोटंचक्रतुः बाहुमूलास्फालनेनत्वंगदवंधरज्जुशैथिल्यंकंपयंतावित्यर्थः ११
१२ चित्रहस्तादिकंहस्तस्यातिवेगेनत्वाकुंचनप्रसारणोत्पर्यधस्चालनमुष्टीकरणानिचित्रहस्तः आदिपदात्पादस्याप्याकुंचनादि कक्षाबंधपरस्परंकक्षायांहस्तौ

कृतस्वस्त्ययनोराजाब्राह्मणेनयशस्विना समनह्यज्जरासंधः क्षात्रंधर्ममनुस्मरन् ५ अवमुच्यकिरीटंसकेशान्समनुगृह्यच उदतिष्ठज्जरासंधो
वेलातिगइवार्णवः ६ उवाचमतिमान्राजाभीमंभीमपराक्रमः भीमयोत्स्येत्वयासार्धंश्रेयसानिर्जितंवरं ७ एवमुक्त्वाजरासंधोभीमसेन
मरिंदमः प्रत्युद्ययौमहातेजाः शक्रंबलइवासुरः ८ ततः सम्मंत्र्यकृष्णेनकृतस्वस्त्ययनोबली भीमसेनोजरासंधमाससादयुयुत्सया ९ त
तस्तौनरशार्दूलौबाहुशस्त्रौसमीयतुः वीरौपरमसंहृष्टावन्योन्यजयकांक्षिणौ १० करग्रहणपूर्वंतुकृत्वापादाभिवंदनं कक्षैः कक्षांविधु
न्वानावास्फोटंतत्रचक्रतुः ११ स्कंधेदोर्भ्यांसमाहत्यनिहत्यचमुहुर्मुहुः अंगमंगैः समाश्लिष्यपुनरास्फालनंविभो १२ चित्रहस्तादिकंकृ
त्वाकक्षाबंधंचचक्रतुः गलगंडाभिघातेनसस्फुलिंगेनचाशनिं १३ बाहुपाशादिकंकृत्वापादाहतशिरावुभौ उरोहस्तंततश्चक्रेपूर्णकुंभौ
प्रयुंजतौ १४

कृत्वाबंधनं गलेतिगलेगंडेनभालदेशेनाभिघातस्तेन पाषाणसदृशांगत्वात्तयोरभिघातेनविस्फुलिंगोत्पत्याऽशनिंवज्रमिवसस्रजतुरित्यर्थः १३ बाहुपाशा
दिकंचरणपाशश्चादिशब्दार्थः पादाभ्यामाहताः शिरः स्थापवोयाभ्यांतौ दृढप्रहारेणनाडीपर्यंतमपिवेदनावंतावित्यर्थः उरोहस्तंउरसिचपेटाप्रहारं पूर्णकुंभौप्र
थितांगुलिभ्यांहस्ताभ्यांपरशिरसः पीडनं पूर्णकुंभः १४

द्दिलं परस्परं हृष्टावपि चक्रतुरिति संकुद्दिलं १५ तलेन चपेटया १६ आहत्य शत्रुदेशे पृष्ठं कृत्वा बाहुभिः वक्षुलाहूवपि मिथः उदरं आदाय प्रचक्रतुः प्रविक्षिपतुः कृ
विश्लेऽस्मरत्यं १७ एवं कक्षां सुपार्श्वे च प्रचक्रतुः तत्र स्वं तौ तत्र स्खलनं कारणं गात्रसंकोचः इत्यर्थः तहस्तौ अधोहस्तं उदरस्याधस्तात् हस्तं कृत्वा हस्ताभ्यामुरस्यावे
ष्टनं कंठे स्वोरसि च कंठोरः समीपे आनीय आक्षिपत् आस्फालितवान् १८ पृष्ठस्य मूलं संबंधनं जातं भंगं पराभवं बाहुभ्यां उदरादिनिपीडनेन संपूर्णां मूर्च्छां १९ तृ

कारसंपीडनं कृत्वा गर्जन्तौ वारणाविव नर्दन्तौ मेघसंकाशौ बाहुप्रहरणावुभौ १५ तलेनाहन्यमानौ तु अन्योन्यं कृतवीक्षणौ सिंहाविव सुसंक्रु
द्धावाकृष्याकृष्य युध्यतां १६ अंगेनांगं समापीड्य बाहुभ्यामुभयोरपि आवृत्य बाहुभिश्चापि उदरं च प्रचक्रमुः १७ उभौ कक्षां सुपार्श्वे तु तत्र स्वं
तौ च शिक्षितौ अधोहस्तं स्वकंठे तु उरसोरसि वाक्षिपत् १८ सर्वातिक्रान्तमर्यादं पृष्ठभंगं च चक्रतुः संपूर्णमूर्च्छां बाहुभ्यां पूर्णकुंभं प्रचक्रतुः १९
तृणपीडं यथाकामं पूर्णयोगं समुष्टिकं एवमादीनि युद्धानि प्रकुर्वन्तौ परस्परं २० तयोर्युद्धं ततो द्रष्टुं समेताः पुरवासिनः ब्राह्मणा वणिजश्चैव
क्षत्रियाश्च सहस्रशः २१ शूद्राश्च नरशार्दूल स्त्रियो वृद्धाश्च सर्वशः निरन्तरमभूत्तत्र जनौघैरभिसंवृतं २२ तयोरथ भुजाघातान्निग्रहः प्रग्रहात्तथा
आसीत्सुभीमः संपातो वज्रपर्वतयोरिव २३ उभौ परमसंहृष्टौ बलेन बलिनां वरौ अन्योन्यस्यान्तरप्रेप्सू परस्परजयैषिणौ २४ तद्भीममुत्सार्य
जनं युद्धमासीदुपह्वरे बलिनोः संयुगे राजन् वृत्रवासवयोरिव २५

णपीडनं रज्जुकरणेन तृणमिव पञ्चषाङ्गुलिकं आवर्त्तनेन युद्धं तृणपीडं पूर्णयोगं योगो विग्रहः घातनं तत्र पूर्णं अमनमुष्टेः पातनं मरः शर्प अग्रमन्त्र पातनमित्यर्थः एवमादीनि
पादाकर्षणशीर्षकक्षीकरणादीनि निग्रहः हस्ताभ्यां कंधराकर्षणेन शत्रोः अधोमुखीकरणं प्रग्रहः शत्रोरुत्थानपातनार्थं पादाकर्षणं २३ २४ उत्सार्य जनं हस्तबाहुवेधे
न परस्परापसारणात् हरीकृतं भेपकजनं उपह्वरे युद्धभूमौ उपह्वरे इति पाठे निकटदेशे २५

प्रकर्षणेपश्चादपसारणेऽन्तरेणानुकर्षति अवाङ्मुखंपातयितुं आकर्षणेऽग्रेऽवकर्षणेऽन्तरेविकर्षति तिर्यक् नयतीत्यर्थः आचकर्षतुः देहौविलिलिखतुः प्रहारैरितिशे
षः २८ नियुद्धंनिरस्त्रयुद्धं अनाहारंनास्तिआहरणंआहारमुपसंहारोयस्मिन्तत् अविश्रान्ते नविशेषेणश्रान्तोऽन्तरोयस्मिन्नतथा २९ तद्वृत्तंतादृशप्रकारंयु

प्रकर्षणाकर्षणाभ्यामनुकर्षविकर्षणैः आचकर्षतुरन्योन्यंजानुभिश्चावजघ्नतुः २६ ततःशब्देनमहताभर्त्सयन्तौपरस्परं पाषाणसंघातनिभैः
प्रहारैरभिजघ्नतुः २७ व्यूढोरस्कौदीर्घभुजौनियुद्धकुशलावुभौ बाहुभिःसमसज्जेतामायसैःपरिघैरिव २८ कार्तिकस्तुमासस्यप्रवृत्तंप्रथ
मेऽहनि अनाहारंदिवारात्रमविश्रान्तमवर्त्तत २९ तद्वृत्तंतुत्रयोदश्यांसमवेतंमहात्मनोः चतुर्दश्यांनिशायांतुनिवृत्तोमागधःक्लमात् ३० तंराजा
नंतथाक्लांतंदृष्ट्वाराजन्जनार्दनः उवाचभीमकर्माणंभीमंसंबोधयन्निव ३१ क्लांतःशत्रुर्नकौन्तेयलभ्यःपीडयितुंरणे पीड्यमानोहिकार्त्स्न्येनज
ह्याज्जीवितमात्मनः ३२ तस्मात्तेनैवकौन्तेयपीडनीयोजनाधिप सममेतेनयुध्यस्वबाहुभ्यांभरतर्षभ ३३ एवमुक्तःसकृष्णेनपांडवःपरवीर
हा जरासंधस्यतद्रूपंज्ञात्वाचक्रेमतिंवधे ३४ ततस्तमजितंजेतुंजरासंधंवृकोदरः संरम्भंबलिनांश्रेष्ठोजग्राहकुरुनंदनः ३५ सभापर्वणि

वैशंपायनउवाच भीमसेनस्ततःकृष्णमुवाचयदुनंदनं बुद्धिमास्थायविपुलांजरासंधवधेप्सया १ नायंपापोमयाकृष्णयुक्तःस्यादनुरोधितुं
प्राणेनयदुशार्दूलबद्धकक्षेणवाससा २ एवमुक्तस्ततःकृष्णःप्रत्युवाचवृकोदरं त्वरयन्पुरुषव्याघ्रोजरासंधवधेप्सया ३

द्धंत्रयोदश्यांसमवेतंत्रयोदशीपर्यंतंजातमितिशेषः क्लमात्क्लमंप्राप्यनिवृत्तः निगृहीतप्रहर्तोऽभूत् ३० संबोधयन्निवशिष्टाचारप्रदर्शनव्याजेनशत्रुवधकालंसू
चयन्निव ३१ ३२ तस्मात्त्वया ३३ तद्रूपंक्लांतंरूपं ३४ संरंभंकोपं ३५ अध्यायः १ अनिरोधितुंनिरोद्धुंप्राणेनबलेन २ ३

५ जानुभ्यां धनुर्वंशिखरस्थं संक्षिप्य विनाम्य ६ १० कुलद्वारि गृहद्वारि ११ भ्रातरौ भीमार्जुनौ बांधवाञ्जरासंधबद्धान्नृपान् १२ ते कृष्णं रत्नैर्भुजं चक्रुरित्यन्वयः १३ १४ सो
दर्यवान् भीमयुक्तः द्वियोधी द्वाभ्यां हस्ताभ्यां शराणां विक्षेपात् अभ्यासघाती पुनः पुनरहतनिरभ्यासः तं परकीयं हंतुं शीलमस्य धनुर्विद्यायां परोत्कर्षं जेता संहृष्य रमणीयां

यत्नैर्दैवं परं सत्त्वं यस्य ते मातरिश्वनः बले भीम जरासंधे दर्शयाद्युत तद्ध्रुवं ४ एवमुक्तस्तदा भीमो जरासंधमरिंदमः उत्क्षिप्य भ्रामयामास बलवंतं महा
बलः भ्रामयित्वा शतगुणं जानुभ्यां भरतर्षभ बभंज पृष्ठं संक्षिप्य निष्पिष्य विननाद च ६ करे गृहीत्वा चरणं द्वेधा चक्रे महाबलः तस्य निष्पिष्यमाण
स्य पांडवस्य च गर्जतः अभवत्तुमुलो नादः सर्वप्राणिभयंकरः ८ वित्रेसुर्मागधाः सर्वे स्त्रीणां गर्भाश्च सुस्रुवुः भीमसेनस्य नादेन जरासंधस्य चैव ह
९ किंनु स्विद्धिमवान्भिन्नः किंनु स्विद्दीर्यते मही इति वै मागधा जज्ञुर्भीमसेनस्य निस्वनात् १० गृहीत्वा या रयोः शत्रुं पारयामास भूतले एकं पा
दं पदाक्रम्य दोर्भ्यां मन्यं च गृह्य च ११ गुरुतः पाटयामास शाखामिव महागजः एकपादोरुवृषणकटितस्तनांसिके १२ एकबाह्वक्षिभ्रूकर्णे शक
ले ददृशुः प्रजाः ततो राज्ञः कुलद्वारि प्रसुप्तमिव तं नृपं रात्रौ गतासुमुत्सृज्य निश्चक्रमुररिंदमाः ११ जरासंधरथं कृष्णो योजयित्वा पताकिनं आ
रोप्य भ्रातरौ चैव मोक्षयामास बांधवान् १२ ते वै रत्नभुजं कृष्णं रत्नार्हाः पृथिवीश्वराः राजानश्चक्रुरासाद्य मोक्षिता महतो भयात् १३ अक्षतः श
स्त्रसंपन्नो जितारिः सह राजभिः रथमास्थाय तं दिव्यं निर्जगाम गिरिव्रजात् १४ यः स सोदर्यवान्नाम द्वियोधी कृष्णसारथिः अभ्यासघाती संदृ
श्यो दुर्जयः सर्वराजभिः १५ भीमार्जुनाभ्यां योधाभ्यामास्थितः कृष्णसारथिः सुशुभे रथवर्योऽसौ दुर्जयः सर्वधन्विभिः १६ शक्रविष्णू हि संग्रामे
चेरतुस्तारकामये रथेन तेन वै कृष्ण उपारुह्य ययौ तदा १७ तप्तचामीकराभेण किंकिणीजालमालिना मेघनिर्घोषनादेन जैत्रेणामित्रघातिना
१८ येन शक्रो दानवानां जघान नवतीर्नव तं प्राप्य समहृष्यंत रथं ते पुरुषर्षभाः १९

ग० १५ १६ शक्रविष्णू हि शब्द इवार्थे तारकामये तारका तारा बृहस्पतिभार्या सैव आमयस्तद्विनाशहेतुर्यस्मिन् आमयो रोगः १७ १८ १९

सभा०
४७

२१ असंगः रथस्पर्शहीनः २२ चैत्यवृक्षः ग्रामादिचिह्नभूतो वृक्षः २३ २४ २६ रिष्यते हिंस्यते पार्थिवत्वं साम्राज्यं ३७

ततः कृष्णं महाबाहुं भ्रातृभ्यां सहितं तदा रथस्थं मागधा दृष्ट्वा समपद्यंत विस्मिताः २० हयैर्दिव्यैः समायुक्तो रथो वायुसमो जवे अधिष्ठितः स शुशुभे कृष्णे
नातीव भारत २१ असंगो देवविहितस्तस्मिन्रथवरे ध्वजः योजनाद्ददृशे श्रीमानिंद्रायुधसमप्रभः २२ चिंतयामास कृष्णोथ गरुत्मंतं स चाभ्ययात् क्ष
णे तस्मिन्स तेनासीच्चैत्यवृक्ष इवोच्छ्रितः २३ व्यादितास्यैर्महानादैः सह भूतैर्ध्वजालयैः तस्मिन्रथवरे तस्थौ गरुत्मान्पन्नगाशनः २४ दुर्निरीक्ष्यो
हि भूतानां तेजसाभ्यधिकं बभौ आदित्य इव मध्याह्ने सहस्रकिरणावृतः २५ न स सज्जति वृक्षेषु शस्त्रैश्चापि न रिष्यते दिव्यो ध्वजवरो राजन्दृश्यते
चेह मानुषैः २६ तमास्थाय रथं दिव्यं पर्जन्यसमनिस्वनं निर्ययौ पुरुषव्याघ्रः पांडवाभ्यां सहाच्युतः २७ यं लेभे वासवाद्राजा वसुस्तस्माद्बृहद्रथः बृ
हद्रथात्क्रमेणैव प्राप्तो बार्हद्रथं नृपं २८ स निर्याय महाबाहुः पुंडरीकेक्षणस्ततः गिरिव्रजाद्बहिस्तस्थौ समे देशे महायशाः २९ तत्रैनं नागराः
सर्वे सत्कारेणाभ्ययुस्तदा ब्राह्मणप्रमुखा राजन्विधिदृष्टेन कर्मणा ३० बंधनाद्विप्रमुक्ताश्च राजानो मधुसूदनं पूजयामासुरूचुश्च स्तुतिपूर्व
मिदं वचः ३१ नैतच्चित्रं महाबाहो त्वयि देवकिनंदने भीमार्जुनबलोपेते धर्मस्य प्रतिपालनं ३२ जरासंधह्रदे घोरे दुःखपंके निमज्जतां राज्ञां स
मभ्युद्धरणं यदिदं कृतमद्य वै ३३ विष्णो समवसन्नानां गिरिदुर्गे सुदारुणे दिष्ट्या मोक्षाद्यशो दीप्तमाप्तं ते यदुनंदन ३४ किं कुर्मः पुरुषव्याघ्र शा
धि नः प्रणतिस्थितान् कृतमित्येव तद्विद्धि नृपैर्यद्यपि दुष्करं ३५ तानुवाच हृषीकेशः समाश्वास्य महामनाः युधिष्ठिरो राजसूयं क्रतुमाहर्तुमिच्छ
ति ३६ तस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः सर्वैर्भवद्भिर्विज्ञाय साहाय्यं क्रियतामिति ३७

सभा०
४७

३८ कृष्णान्मोक्षितेभ्योधनग्रहणांपशोहानिकर्मितिसंकटात् ३९ ४२ एककंसत्स्वं यथावयः ज्येष्ठानुक्रमेण प्रथमं भीमेन ततः कृष्णेन ततोर्जुनेन ४३ जरासंध

ततः सुप्रीतमनसस्ते नृपा नृपसत्तम तथेत्येवाब्रुवन्सर्वे प्रतिगृह्यास्य तां गिरं ३८ रत्नभाजं च दाशार्हं चक्रुस्ते पृथिवीश्वराः कृष्णश्चाप्याह गोविंदस्ते
षां तदनुकंपया ३९ जरासंधात्मजश्चैव सहदेवो महामनाः निर्ययौ सजनामात्यः पुरस्कृत्य पुरोहितं ४० स नीचैः प्रणतो भूत्वा बहुरत्नपुरोगमाः स
हदेवो नृणां देवं वासुदेवमुपस्थितः ४१ भयार्ताय ततस्तस्मै कृष्णो दत्त्वाभयं तदा आददेऽस्य महार्हाणि रत्नानि पुरुषोत्तमः ४२ अभ्यषिंचत तत्रैव
जरासंधात्मजं मुदा गत्वैकत्वं च कृष्णेन पार्थाभ्यां चैव सत्कृतः ४३ विवेश राजा द्युतिमान् बार्हद्रथपुरं पुनः अभिषिक्तो महाबाहुर्जारासंधिर्महात्म
भिः ४४ कृष्णस्तु सह पार्थाभ्यां श्रिया परमया युतः रत्नान्यादाय भूरीणि प्रययौ पुरुषर्षभ ४५ इंद्रप्रस्थमुपागम्य पांडवाभ्यां सहाच्युतः समेत्य
धर्मराजानं प्रीयमाणोभ्यभाषत ४६ दिष्ट्या भीमेन बलवान् जरासंधो निपातितः राजानो मोक्षिताश्चैव बंधनान्नृपसत्तम ४७ दिष्ट्या कुशलि
नौ चेमौ भीमसेनधनंजयौ पुनः स्वनगरं प्राप्तावक्षताविति भारत ४८ ततो युधिष्ठिरः कृष्णं पूजयित्वा यथार्हतः भीमसेनार्जुनौ चैव प्रहृष्टः प
रिषस्वजे ४९ ततः क्षीणे जरासंधे भ्रातृभ्यां विहितं जयं अजातशत्रुरासाद्य मुमुदे भ्रातृभिः सह ५० यथावयः समागम्य भ्रातृभिः सह पांडवः
सत्कृत्य पूजयित्वा च विससर्ज नराधिपान् ५१ युधिष्ठिराभ्यनुज्ञातास्ते नृपा हृष्टमानसाः जग्मुः स्वदेशांस्त्वरिता यानैरुच्चावचैस्ततः ५२ एवं पुरु
षशार्दूलो महाबुद्धिर्जनार्दनः पांडवैर्घातयामास जरासंधमरिं तदा ५३ घातयित्वा जरासंधं बुद्धिपूर्वमरिंदमः धर्मराजमनुज्ञाप्य पृथां कृष्णां च
भारत ५४ सुभद्रां भीमसेनं च फाल्गुनं यमजौ तथा धौम्यमामंत्रयित्वा च प्रययौ स्वां पुरीं प्रति ५५ तेनैव रथमुख्येन मनसस्तुल्यगामिना ध
र्मराजविसृष्टेन दिव्येनानादयन् दिशः ५६ ततो युधिष्ठिरमुखाः पांडवा भरतर्षभ प्रदक्षिणमकुर्वंत कृष्णमक्लिष्टकारिणं ५७ ततो गते भ
गवति कृष्णे देवकिनंदने जयं लब्ध्वा सुविपुलं राज्ञां दत्त्वाभयं तदा ५८ संवर्द्धितं यशो भूयः कर्मणा तेन भारत द्रौपद्याः पांडवा राजन् परां प्री
तिमवर्द्धयन् ५९ तस्मिन् काले तु यद्युक्तं धर्मकामार्थसंहितं तद्राजा धर्मतश्चक्रे प्रजापालनकीर्तनं ६० सभापर्वणि जरासंधवधः समाप्तः

पार्थः क्षत्रियस्य शत्रुजयेन धनार्जनं धर्म इति शिष्टाचारेणादर्शयितुं पांडवानां दिग्विजयमुपक्रामति सत्तभिरध्यायैः पार्थः प्राप्य धनुः श्रेष्ठमित्यादिना १ पक्षो वासुदेवः

वैशंपायन उवाच पार्थः प्राप्य धनुः श्रेष्ठमक्षय्ये च महेषुधी रथं ध्वजं सभां चैव युधिष्ठिरमभाषत १ अर्जुन उवाच धनुः शस्त्रं शरा वीर्यं पक्षो भूमिर्यशो बलं प्राप्तमेतन्मया राजन्दुष्प्रापं यदभीप्सितं २ तत्र कृत्यमहं मन्ये कोशस्य परिवर्द्धनं करमाहारयिष्यामि राज्ञः सर्वान्नृपोत्तम ३ विजयाय प्रयास्यामि दिशं धनदपालितां तिथावथ मुहूर्ते च नक्षत्रे चाभिपूजिते ४ वैशंपायन उवाच धनंजयवचः श्रुत्वा धर्मराजो युधिष्ठिरः स्निग्धगंभीरनादिन्या तं गिरा प्रत्यभाषत ५ स्वस्ति वाच्यार्हतो विप्रान्प्रयाहि भरतर्षभ दुर्हृदामप्रहर्षाय सुहृदां नंदनाय च ६ विजयस्ते ध्रुवं पार्थ प्रियं काममवाप्स्यसि इत्युक्तः प्रययौ पार्थः सैन्येन महता वृतः ७ अग्निदत्तेन दिव्येन रथेनाद्भुतकर्मणा तथैव भीमसेनोपि यमौ च पुरुषर्षभौ ८ ससैन्याः प्रययुः सर्वे धर्मराजेन पूजिताः दिशं धनपतेरिष्टामजयत्पाकशासनिः ९ भीमसेनस्तथा प्राचीं सहदेवस्तु दक्षिणां प्रतीचीं नकुलो राजन्दिशं व्यजयतास्त्रवित् १० खांडवप्रस्थमध्यास्थो धर्मराजो युधिष्ठिरः आसीत्परया लक्ष्म्या सुहृद्गणवृतः प्रभुः ११ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सभापर्वणि

भूमिर्दुर्ग १ २ ३ ४ ५ ६ ७ ८ ९ १० खांडवप्रस्थं खांडवदाहेन स्थापितं स्थानं ११ अध्यायः ॥

अध्यायः १६

जनमेजयउवाच दिशामभिजयंब्रह्मन्विस्तरेणानुकीर्तय नहितृप्यामिपूर्वेषांशृण्वानश्चरितंमहत् १ वैशंपायनउवाच धनंजयस्यवक्ष्यामिवि
जयंपूर्वमेवमयौगपद्येनपार्थोहिनिर्जितेयंवसुंधरा २ पूर्वंकुलिंदविषयेवशेचक्रेमहीपतीन् धनंजयोमहाबाहुर्नातितीव्रेणकर्मणा ३ आन
र्तान्कालकूटांश्चकुलिंदांश्चविजित्यसः सुमंडलंचावजितंकृतवान्सहसैनिकं ४ सतेनसहितोराजन्सव्यसाचीपरंतपः विजिग्येशाक[illegible]लंद्वी
पंप्रतिविंध्यंचपार्थिवं ५ शाकलद्वीपवासाश्चसप्तद्वीपेषुयेनृपाः अर्जुनस्यचसैन्यैस्तैर्विग्रहस्तुमुलोभवत् ६ सतानपिमहेष्वासान्विजिग्येभर
तर्षभ तैरेवसहितःसर्वैःप्राग्ज्योतिषमुपाद्रवत् ७ तत्रराजामहानासीद्भगदत्तोविशांपते तेनासीत्सुमहद्युद्धंपांडवस्यमहात्मनः ८ स
किरातैश्चचीनैश्चवृतःप्राग्ज्योतिषोभवत् अन्यैश्चबहुभिर्योधैःसागरानूपवासिभिः ९ ततःसदिवसानष्टौयोधयित्वाधनंजयं प्रहसन्नब्रवी
द्राजासंग्रामेविगतक्लमं १० उपपन्नंमहाबाहोत्वयिकौरवनंदन पाकशासनदायादेवीर्यमाहवशोभिनि ११ अहंसखामहेंद्रस्यशक्रा
दनवरोरणे नशक्ष्यामितेतातस्थातुंप्रमुखतोयुधि १२ त्वमीप्सितंपांडवेयब्रूहिकिंकरवाणिते यद्वक्ष्यसिमहाबाहोतत्करिष्यामिपुत्र
क १३ अर्जुनउवाच कुरूणामृषभोराजाधर्मपुत्रोयुधिष्ठिरः धर्मज्ञःसत्यसंधश्चयज्वाविपुलदक्षिणः १४ तस्यपार्थिवतामीप्सेकरस्तस्मै
प्रदीयतां भवान्पितृसखाचैवप्रीयमाणोमयापिच ततोनाज्ञापयामित्वांप्रीतिपूर्वंप्रदीयतां १५ भगदत्तउवाच कुंतीमातर्यथामेत्वंत
थाराजायुधिष्ठिरः सर्वमेतत्करिष्यामिकिंचान्यत्करवाणिते १६ सभापर्वणिअर्जुनदिग्विजये १६

सभा०
४९

एवमु अनेनैवकारणेनैव अनुजानता अनुज्ञांदत्तवता १ सन्निपातः संघर्षः ८ १५ उत्सवसंकेतान् स्त्रीपुंसयोः परस्परप्रीतिरेवउत्सवार्थंसंकेतः नतुदांपत्यव्यवस्था

वैशंपायनउवाच एवमुक्तः प्रत्युवाचभगवन्तंधनंजयः अनेनैवकृतंसर्वंभविष्यत्यनुजानता १ तंविजित्यमहाबाहुः कुंतीपुत्रोधनंजयः प्रयया
वुत्तरांतस्माद्दिशंधनदपालितां २ अंतर्गिरिंचकौंतेयस्तथैवचबहिर्गिरिं तथैवोपगिरिंचैवविजिग्येपुरुषर्षभः ३ विजित्यपर्वतान्सर्वान्येच
तत्रनराधिपाः तान्वशेस्थापयित्वासधनान्यादायसर्वशः ४ तैरेवसहितः सर्वैरनुरज्यचतान्नृपान् उलूकवासिनंराजन्बृहंतमुपजग्मि
वान् ५ मृदंगवरनादेनरथनेमिस्वनेनच हस्तिनांचनिनादेनकंपयन्वसुधामिमां ६ ततोबृहंतस्त्वरितोबलेनचतुरंगिणा निष्क्रम्यनगरात्त
स्माद्योधयामासफाल्गुनं ७ सुमहान्सन्निपातोभूद्धनंजयबृहंतयोः नशशाकबृहंतस्तुसोढुंपांडवविक्रमं ८ सोविषह्यतमंमत्वाकौंते
यंपर्वतेश्वरः उपावर्ततदुर्द्धर्षोरत्नान्यादायसर्वशः ९ सतद्राज्यमवस्थाप्यउलूकसहितोययौ सेनाबिंदुमथोराजन्राज्यादाशुसमाक्षि
पत् १० मोदापुरंवामदेवंसुदामानंसुसंकुलं उलूकानुत्तरांश्चैवतांश्चराज्ञः समानयत् ११ तत्रस्थः पुरुषैरेवधर्मराजस्यशासनात् किरीटी
जितवान्देशान्देशान्पंचगणांस्ततः १२ सदेवप्रस्थमासाद्यसेनाबिंदोः पुरंप्रति बलेनचतुरंगेणनिवेशमकरोत्प्रभुः १३ सतैः परिवृतः
सर्वैर्विष्वगश्वंनराधिपं अभ्यगच्छन्महातेजाः पौरवंपुरुषर्षभं १४ विजित्यचाहवेशूरान्पार्वतीयान्महारथान् जिगायसेनयाराजन्पुरंपौरवर
क्षितं १५ पौरवंयुधिनिर्जित्यदस्यून्पर्वतवासिनः गणानुत्सवसंकेतानजयत्सप्तपांडवः १६ ततः काश्मीरकान्वीरान्क्षत्रियान्क्षत्रियर्ष
भः व्यजयल्लोहितंचैवमंडलैर्दशभिः सह १७

पशूनामिवयत्रास्तीत्यर्थः १६ मंडलैः क्षुद्रराजैः १७

१८ अभिसारीं नगरीं १९ २३ प्रागुत्तरं ऐशानीं २४ २८ जवनान् धावनशीलान् आशुगान् यदृच्छयाचलनसमर्थान् २८ निष्कुटं शैलविशेषं २९ अध्यायः

ततस्त्रिगर्तान्कौंतेयं दार्वान्कोकनदांस्तथा क्षत्रिया बहवो राजन्नुपावर्त्तंत सर्वशः १८ अभिसारीं ततो रम्यां विजिग्ये कुरुनंदनः उरगावासिनं चैव रोचमानं रणेऽजयत् १९ ततः सिंहपुरं रम्यं चित्रायुधसुरक्षितं प्राधमद्बलमास्थाय पाकशासनिराहवे २० ततः सुह्मांश्च चोलांश्च किरीटी पांडवर्षभः सहितः सर्वसैन्येन प्रामथत्कुरुनंदनः २१ ततः परमविक्रांतो बाल्हीकान्पाकशासनिः महता परिमर्द्देन वशे चक्रे दुरासदान् २२ गृहीत्वा तु बलं सारं फाल्गुनः पांडुनंदनः दरदान्सह कांबोजैरजयत्पाकशासनिः २३ प्रागुत्तरां दिशं ये च वसंत्याश्रित्य दस्यवः निवसंति वने ये च तान्सर्वानजयत्प्रभुः २४ लोहान्परमकांबोजानृषिकानुत्तरानपि सहितांस्तान्महाराज व्यजयत्पाकशासनिः २५ ऋषिकेष्वपि संग्रामो बभूवातिभयंकरः तारकामयसंकाशः परस्त्वृषिकपार्थयोः २६ स विजित्य ततो राजन्नृषिकान्रणमूर्द्धनि शुकोदरसमांस्तत्र हयानष्टौ समानयत् २७ मयूरसदृशानन्यानुत्तरानपरानपि जवनानाशुगांश्चैव करार्थं समुपानयत् २८ स विनिर्जित्य संग्रामे हिमवंतं सनिष्कुटं श्वेतपर्वतमासाद्य न्यविशत्पुरुषर्षभः २९ सभापर्वणि फाल्गुनदिग्विजये वैशंपायन उवाच स श्वेतपर्वतं वीरः समतिक्रम्य वीर्यवान् देशं किंपुरुषावासं द्रुमपुत्रेण रक्षितं १ महता सन्निपातेन क्षत्रियांतकरेण ह अजयत्पांडवश्रेष्ठः करे चैनं न्यवेशयत् २ तं जित्वा हाटकं नाम देशं गुह्यकरक्षितं पाकशासनिरव्यग्रः सहसैन्यः समासदत् ३ तांस्तु सांत्वेन निर्जित्य मानसं सर उत्तमं ऋषिकुल्यास्तथा सर्वा ददर्श कुरुनंदनः ४ सरो मानसमासाद्य हाटकानभितः प्रभुः गंधर्वरक्षितं देशमजयत्पांडवस्ततः ५

स श्वेत १ २ ३ ४ ५

८ न समवेतान्नियेते समर्थः १० १५ क्षुमाश्च तशौविशेषः क्षुमाः तत्तौनी लिकयौरितिमेदिनी तत्रं तु निर्मितानि क्षौमाणि आजिनानि च १६ २१ अध्यायः

त३

तत्रतित्तिरिकल्माषान्मंडूकाख्यान्हयोत्तमान् लेभे सकरमत्यंतं गंधर्वनगरात्तदा ६ उत्तरं हरिवर्षं तु समासाद्य स पांडवः इयेष जेतुं तं देशं
पाकशासननंदनः ७ ततएनं महावीर्या महाकाया महाबलाः द्वारपालाः समासाद्य हृष्टा वचनमब्रुवन् ८ पार्थ नेदं त्वया शक्यं पुरं जेतुं कथं
चन उपावर्तस्व कल्याण पर्याप्तमिदमच्युत ९ इदं पुरं यः प्रविशेद्ध्रुवं न स भवेन्नरः प्रीयामहे त्वया वीर पर्याप्तो विजयस्तव १० नचात्र
किंचिज्जेतव्यमर्जुनात्र प्रदृश्यते उत्तराः कुरवो ह्येते नात्र युद्धं प्रवर्तते ११ प्रविष्टोपि हि कौंतेय नेह द्रक्ष्यसि किंचन नहि मानुषदेहेन शक्यम
त्राभिवीक्षितुं १२ अथेह पुरुषव्याघ्र किंचिदन्यच्चिकीर्षसि तत्प्रब्रूहि करिष्यामो वचनात्तव भारत १३ ततस्तानब्रवीद्राजन्नर्जुनः प्र
हसन्निव पार्थिवत्वं चिकीर्षामि धर्मराजस्य धीमतः १४ न प्रवेक्ष्यामि वो देशं विरुद्धं यदि मानुषैः युधिष्ठिराय यत्किंचित्करपण्यं
प्रदीयतां १५ ततो दिव्यानि वस्त्राणि दिव्यान्याभरणानि च क्षौमाजिनानि दिव्यानि तस्य ते प्रददुः करं १६ एवं स पुरुषव्याघ्रो विजिग्ये
दिशमुत्तरां संग्रामान्सुबहून्कृत्वा क्षत्रियैर्दस्युभिस्तथा १७ स विनिर्जित्य राज्ञस्तान्करे च विनिवेश्य तु धनान्यादाय सर्वेभ्यो र
त्नानि विविधानि च १८ हयांस्तित्तिरिकल्माषान्शुकपत्रनिभानपि मयूरसदृशानन्यान्सर्वाननिलरंहसः १९ वृतः सुमह
ता राजन्बलेन चतुरंगिणा आजगाम पुनर्वीरः शक्रप्रस्थं पुरोत्तमं २० धर्मराजाय तत्पार्थो धनं सर्वं सवाहनं न्यवेदयदनुज्ञात
स्तेन राज्ञा गृहान्ययौ २१ सभापर्वणि उत्तरदिग्विजयः

एतस्मिन् १ बलचक्रेण सेनासमूहेन दंशितेन सन्नद्धेन २ ३ ४ दशार्णो देशात् निरायुधं बाहुयुद्धं ५ अधिचक्रे इति संबंधः जित्वा तस्य बलं ज्ञात्वा सेनाप

वैशंपायन उवाच एतस्मिन्नेव काले तु भीमसेनोऽपि वीर्यवान् धर्मराजमनुज्ञाप्य ययौ प्राचीं दिशं प्रति १ महता बलचक्रेण परराष्ट्रावम
र्दिना हस्त्यश्वरथपूर्णेन दंशितेन प्रतापवान् २ ततो भरतशार्दूलो द्विषच्छोकविवर्द्धनः स गत्वा नरशार्दूलः पंचालानां पुरं महत् ३ पंचा
लान्विविधोपायैः सांत्वयामास पांडवः ततः स गंडकान्शूरो विदेहान्भरतर्षभः ४ विजित्याल्पेन कालेन दशार्णानजयत्प्रभुः तत्र दा
शार्णको राजा सुधर्मा लोमहर्षणं कृतवान्भीमसेनेन महद्युद्धं निरायुधं ५ भीमसेनस्तु तद्दृष्ट्वा तस्य कर्म महात्मनः अधिसेनापतिं चक्रे
सुधर्म्माणं महाबलं ६ ततः प्राचीं दिशं भीमो ययौ भीमपराक्रमः सैन्येन महता राजन् कंपयन्निव मेदिनीं ७ सोऽश्वमेधेश्वरं राजन् रोचमा
नं सहानुगं जिगाय समरे वीरो बलेन बलिनां वरः ८ स तं निर्जित्य कौंतेयो नातितीव्रेण कर्म्मणा पूर्वदेशं महावीर्यो विजिग्ये कुरुनंद
नः ९ ततो दक्षिणमागम्य पुलिंदनगरं महत् सुकुमारं वशे चक्रे सुमित्रं च नराधिपं १० ततस्तु धर्मराजस्य शासनाद्भरतर्षभः
शिशुपालं महावीर्यमभ्यगाज्जनमेजय ११ चेदिराजोऽपि तच्छ्रुत्वा पांडवस्य चिकीर्षितं उपनिष्क्रम्य नगरात्प्रत्यगृह्णात्परंतप १२ तौ स
मेत्य महाराज कुरुचेदिवृषौ तदा उभयोरात्मकुलयोः कौशल्यं पर्य्यपृच्छतां १३ ततो निवेद्य तद्राष्ट्रं चेदिराजो विशांपते उवाच भीमं प्र
हसन् किमिदं कुरुषेऽनघ १४ तस्य भीमस्तदाचख्यौ धर्मराजचिकीर्षितं स च तं प्रतिगृह्यैव तथा चक्रे नराधिपः १५ ततो भीमस्तत्र राज
न्नुषित्वा त्रिदशाः क्षपाः सत्कृतः शिशुपालेन ययौ सबलवाहनः १६ सभापर्व्वणि भीमदिग्विजये

तिं तस्मै दत्तवानित्यर्थः अधिसेनापतिं सेनापतिष्वधिकं मुख्यं चक्रे इत्यर्थः ६ १२ वृषौ श्रेष्ठौ १३ १५ त्रिदशाः अधिका दश त्रयोदश १६ अध्यायः

ततः १५ सुह्माः प्रह्माः मागधानभ्यधाद्बली करंप्रयच्छतेत्युक्तवान् सर्वमेवपराक्रांतवान् १६ १७ १८

वैशंपायनउवाच ततःकुमारविषयेश्रेणिमंतमथाजयत् कोशलाधिपतिंचैवबृहद्बलमरिंदमः १ अयोध्यायांतुधर्मज्ञंदीर्घप्रज्ञंमहाबलं अजयत्पांडवश्रेष्ठोनातितीव्रेणकर्मणा २ ततोगोपालकक्षंचसोत्तरानपिकोशलान् मल्लानामधिपंचैवपार्थिवंचाजयत्प्रभुः ३ ततोहिमवतः पार्श्वेसमभ्येत्यजलोद्भवं सर्वमल्पेनकालेनदेशंचक्रेवशेबली ४ एवंबहुविधान्देशान्विजित्यभरतर्षभः भल्लाटमभितोजिग्येशुक्तिमंतंचपर्वतं ५ पांडवः सुमहावीर्योबलेनबलिनांवरः सकाशिराजंसमरेसुबाहुमनिवर्तिनं ६ वशेचक्रेमहाबाहुर्भीमोभीमपराक्रमः ततः सुपार्श्वमभितस्तथाराजपतिंक्रथं ७ युध्यमानंबलात्संख्येविजिग्येपांडवर्षभः ततोमत्स्यान्महातेजामलदांश्चमहाबलान् ८ अनघानभयांश्चैवपशुभूमिंचसर्वशः निवृत्यचमहाबाहुर्मदधारंमहीधरं ९ सोपदेशंविनिर्जित्यप्रययावुत्तरामुखः वत्सभूमिंचकौंतेयोविजिग्येबलवान्बलात् १० भर्गाणामधिपंचैवनिषादाधिपतिंतथा विजिग्येभूमिपालांश्चमणिमत्प्रमुखान्बहून् ११ ततोदक्षिणमल्लांश्चभोगवंतंचपर्वतं तरसैवाजयद्भीमोनातितीव्रेणकर्मणा १२ शर्मकान्वर्मकांश्चैवअजयत्सांत्वपूर्वकं वैदेहकंचराजानंजनकंजगतीपतिं १३ विजिग्येपुरुषव्याघ्रोनातितीव्रेणकर्मणा शकांश्चबर्बरांश्चैवअजयच्छद्मपूर्वकं १४ वैदेहस्थस्तुकौंतेयइंद्रपर्वतमंतिकात् किरातानामधिपतीनजयत्सप्तपांडवः १५ ततःसुह्मान्प्रसुह्मांश्चसपक्षानतिवीर्यवान् विजित्ययुधिकौंतेयोमागधानभ्यधाद्बली १६ दंडंचदंडधारंचविजित्यपृथिवीपतीन् तैरेवसहितः सर्वैर्गिरिव्रजमुपाद्रवत् १७ जारासंधिंसांत्वयित्वाकरेचविनिवेश्यह तैरेवसहितः सर्वैः कर्णमभ्यद्रवद्बली १८

सकंपयन्निवमहींबलेनचतुरंगिणाॅयुयुधेपांडवश्रेष्ठः कर्णेनामित्रघातिना १९ सकर्णंयुधिनिर्जित्यवशेकृत्वाचभारत ततोविजिग्ये
बलवान्राज्ञः पर्वतवासिनः २० अथमोदागिरौचैवराजानंबलवत्तरं पांडवोबाहुवीर्येणनिजघानमहामृधे २१ ततःपुंड्राधिपंवी
रंवासुदेवंमहाबलं कौशिकीकच्छनिलयंराजानंचमहौजसं २२ उभौबलभृतौवीरावुभौतीव्रपराक्रमौ निर्जित्याजौमहाराजवंग
राजमुपाद्रवत् २३ समुद्रसेनंनिर्जित्यचंद्रसेनंचपार्थिवं ताम्रलिप्तंचराजानंकर्वटाधिपतिंतथा २५ सुह्मानामधिपंचैवयेच
सागरवासिनः सर्वान्म्लेच्छगणांश्चैवविजिग्येभरतर्षभः २५ एवंबहुविधान्देशान्विजित्यपवनात्मजः वसुतेभ्यउदयाद
यलौहित्यमगमद्बली २६ ससर्वान्म्लेच्छनृपतीन्सागरानूपवासिनः करमाहारयामासरत्नानिविविधानिच २७ चंदनागुरुव
स्त्राणिमणिमौक्तिककंबलं कांचनंरजतंचैवविद्रुमंचमहाधनं २८ तेकोटिशतसंख्येनकौंतेयंमहतातदा अभ्यवर्षन्महात्मानं
धनवर्षेणपांडवं २९ इंद्रप्रस्थमुपागम्यभीमोभीमपराक्रमः निवेदयामासतदाधर्मराजायतद्धनं ३० सभापर्वणिभीमदिग्विज
यः वैशंपायनउवाच तथैवसहदेवोपिधर्मराजेनपूजितः महत्यासेनयाराजन्प्रययौदक्षिणांदिशं १ सशूरसेनान्कात्स्न्येन
पूर्वमेवाजयत्प्रभुः मत्स्यराजंचकौरव्योवशेचक्रेबलाद्बली २

पटच्चरान् चोरदेशान् ४ ५ ६ ७ ८ १०

अधिराजाधिपं चैव दंतवक्रं महावलं जिगाय करदं चैव कृत्वा राज्ये न्यवेशयत् ३ सुकुमारं वशे चक्रे सुमित्रं च नराधिपं तथैवापरमत्स्यांश्च
व्यजयत्स पटच्चरान् ४ निषादभूमिं गोशृंगं पर्वतप्रवरं तथा तरसैवाजयद्धीमान् श्रेणिमंतं च पार्थिवं ५ नवराष्ट्रं च निर्जित्य कुंतिभोजमुपा
द्रवत् प्रीतिपूर्वं च तस्यासौ प्रतिजग्राह शासनं ६ ततश्चर्मण्वतीकूले जंभकस्यात्मजं नृपं ददर्श वासुदेवेन शेषितं पूर्ववैरिणा ७
चक्रे तेन स संग्रामं सहदेवेन भारत स तमाजौ विनिर्जित्य दक्षिणाभिमुखो ययौ ८ सेकानपरसेकांश्च व्यजयत्सुमहावलः करं तेभ्य उपा
दाय रत्नानि विविधानि च ९ ततस्तेनैव सहितो नर्मदामभितो ययौ विंदानुविंदावावंत्यौ सैन्येन महता वृतौ जिगाय समरे वीरावाश्विने
यः प्रतापवान् १० ततो रत्नान्युपादाय पुरीं भोजकटं ययौ तत्र युद्धमभूद्राजन् दिवसद्वयमच्युत ११ स विजित्य दुराधर्षं भीष्मकं माद्रि
नंदनः कोशलाधिपतिं चैव तथा वेणातटाधिपं १२ कांतारकांश्च समरे तथा प्राकोटकान्नृपान् नाटकेयांश्च समरे तथा हेरंबकान्युधि १३
मारुधं च विनिर्जित्य रम्यग्राममथो बलात् नाचीनानर्बुकांश्चैव राज्ञश्चैव महावलः १४ तांस्तानाटविकान्सर्वानजयत्पांडुनंदनः वाताधि
पं च नृपतिं वशे चक्रे महावलः १५ पुलिंदांश्च रणे जित्वा ययौ दक्षिणतः पुनः युयुधे पांड्यराजेन दिवसं नकुलानुजः १६ तं जित्वा स महा
बाहुः प्रययौ दक्षिणापथं गुहामासादयामास किष्किंधां लोकविश्रुतां १७ तत्र वानरराजाभ्यां मैंदेन द्विविदेन च युयुधे दिवसान्सप्त न
च तौ विकृतिं गतौ १८

२२ धृतमित्रः शत्रुः २६ पारदारिकः स्त्रेणानूढायाश्चापि परकीयपत्न्याः परदाररतः कोऽगृहीतः विवशः २० २९ चकमे मातुपसत्स्वेरागाद्वृतः कामयामास एवं सर्वेषामपि

टी २

ततस्तौ तु महात्मानौ सहदेवाय पाण्डवौ कृत्वा तु स्ववशं हृष्टौ प्रीतिपूर्वमिदं वचः १९ गच्छ पाण्डवशार्दूल रत्नान्यादाय सर्वशः अविघ्नमस्तु कार्याय धर्मराजाय धीमते २० ततो रत्नान्युपादाय पुरीं माहिष्मतीं ययौ तत्र नीलेन राज्ञा स चक्रे युद्धं नरर्षभः २१ पाण्डवः परवीरघ्नः सहदेवः प्रतापवान् ततोऽस्य सुमहद्युद्धमासीद्भीरुभयंकरं २२ सैन्यक्षयकरं चैव प्राणानां संशयावहं चक्रे तस्य हि साहाय्यं भगवान्हव्यवाहनः २३ ततो रथा हया नागाः पुरुषाः कवचानि च प्रदीप्तानि व्यदृश्यन्त सहदेवबले तदा २४ ततः सुसंभ्रान्तमना बभूव कुरुनन्दनः नोत्तरं प्रति वक्तुं च शक्तोऽभूज्जनमेजय २५ जनमेजय उवाच किमर्थं भगवानग्निः प्रत्यमित्रोऽभवद्युधि सहदेवस्य यज्ञार्थं घटमानस्य वै द्विज २६ वैशम्पायन उवाच तत्र माहिष्मतीवासी भगवान्हव्यवाहनः श्रूयते हि गृहीतो वै पुरस्तात्पारदारिकः २७ नीलस्य राज्ञो दुहिता बभूवातीव शोभना साग्निहोत्रमुपातिष्ठद्बोधनाय पितुः सदा २८ व्यजनैर्धूयमानोऽपि तावज्ज्वलते न सः यावच्चारुपुटौष्ठेन वायुना न विधूयते २९ ततः स भगवानग्निश्चकमे तां सुदर्शनां नीलराज्ञः सर्वेषामुपनीतश्च सोऽभवत् ३० ततो ब्राह्मणरूपेण रममाणो यदृच्छया तं तु राजा यथाशास्त्रमशासद्धार्मिकस्तदा ३१ प्रजज्वाल ततः कोपाद्भगवान्हव्यवाहनः तं दृष्ट्वा विस्मितो राजा जगाम शिरसावनिं ३२ ततः कालेन तां कन्यां तथैव हि तदा नृपः प्रददौ विप्ररूपाय वह्नये शिरसा नतः ३३ प्रतिगृह्य च तां सुभ्रूं नीलराज्ञः सुतां तदा चक्रे प्रसादं भगवांस्तस्य राज्ञो विभावसुः ३४ वरेणाच्छंदयामास तं नृपं स्विष्टकृत्तमः अभयं च स जग्राह स्वसैन्ये वै महीपतिः ३५

गृहे इत्युक्तं सर्वेषामिति तथा चसः उपनीतः स्वीकृतः नीलस्य राज्ञोऽविदितं इति शेषः ३० ३४ शोभनः सुतरां इष्टकृत् प्रियकृत् अतिशयेन स्विष्टकृत्तमः छंदयामास संप्रीणितवान् ३५

३६ छंदतः इच्छातः अनतिग्राह्याः अनंतंतसुग्रहाः नबभूवुः सर्वासामग्निमापरिगृहीतत्वात् ३७ अप्रतिवारणे प्रातिकूल्येन स्त्रीणां वारणं न कर्तुं शक्यः कश्चिदपि स्वैरिण्यो

ततः प्रभृति ये केचिदज्ञानात्तां पुरीं नृपाः जिगीषंति बलाद्राजन्ते दह्यंते स्म वह्निना ३६ तस्यां पुर्यां तदा चैव माहिष्मत्यां कुरूद्वह बभूवुरनतिग्राह्याः योषितः छंदतः किल ३७ एवमग्निर्वरं प्रादात्स्त्रीणामप्रतिवारणे स्वैरिण्यस्तत्र नार्यो हि यथेष्टं विचरंत्युत ३८ वर्जयंति च राजानस्तद्राष्ट्रं पुरुषर्षभ भयादग्नेर्महाराज तदाप्रभृति सर्वदा ३९ सहदेवस्तु धर्मात्मा सैन्यं दृष्ट्वा भयार्दितं परीतमग्निना राजन्नाकंपत यथाचलः उपस्पृश्य शुचिर्भूत्वा सोऽब्रवीत्पावकं ततः ४० सहदेव उवाच त्वदर्थोऽयं समारंभः कृष्णवर्त्मन्नमोऽस्तु ते मुखं त्वमसि देवानां यज्ञस्त्वमसि पावक ४१ पावनात्पावकश्चासि वहनाद्धव्यवाहनः वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि चित्रभानुः सुरेशश्च अनलस्त्वं विभावसो स्वर्गद्वारस्पृशश्चासि हुताशो ज्वलनः शिखी ४३ वैश्वानरस्त्वं पिंगेशः प्लवंगो भूरितेजसः कुमारसूस्त्वं भगवान्रुद्रगर्भो हिरण्यकृत् ४४ अग्निर्ददातु मे तेजो वायुः प्राणं ददातु मे पृथिवी बलमादध्याच्छिवं चापो दिशंतु मे ४५ अपांगर्भ महासत्त्व जातवेदः सुरेश्वर देवानां मुखमग्ने त्वं सत्येन विपुनीहि मां ४६ ऋषिभिर्ब्राह्मणैश्चैव दैवतैरसुरैरपि नित्यं सुहुत यज्ञेषु सत्येन विपुनीहि मां ४७ धूमकेतुः शिखी च त्वं पापहानिलसंभवः सर्वप्राणिषु नित्यस्थः सत्येन विपुनीहि मां ४८ एवं स्तुतोऽसि भगवन्प्रीतेन शुचिना मया तुष्टिं पुष्टिं श्रुतं चैव प्रीतिं चाग्ने प्रयच्छ मे ४९ वैशंपायन उवाच इत्येवं मंत्रमाग्नेयं पठन्यो जुहुयाद्विभुं ऋद्धिमान्सततं दांतः सर्वपापैः प्रमुच्यते ५० सहदेव उवाच यज्ञविघ्नमिमं कर्तुं नार्हस्त्वं हव्यवाहन एवमुक्त्वा तु माद्रेयः कुशैरास्तीर्य मेदिनीं ५१ विधिवत्पुरुषव्याघ्रः पावकं प्रत्युपाविशत् प्रमुखे तस्य सैन्यस्य भीतोद्विग्नस्य भारत ५२ न चैनमत्यगाद्वह्निर्वेलामिव महोदधिः तमुपेत्य शनैर्वह्निरुवाच कुरुनंदनं ५३

निवरः तस्वाहसौ शिरएच इति मद्गुल्मस्य वा शरीरे प्रविश्य शायिरे वा स्माकं भोगं करोतीति निश्चयार्थः ३८ ४८ तुष्टिं बलं बुद्धिं प्रीतिं सुखं ४९ आग्नेयं मंत्रं श्लोकरूपं मंत्राष्टकं जुहुयात् आपसादिना ताहांतेन मंत्रेहोमं कुर्यात् ५० ५३

५६ अस्मगात्तएनंचातिक्रम्यसैन्यंनदहहेतवः पुःपुरी ५८ ५९ ६० ७४

सहदेवंनृणांदेवंसांत्वपूर्वमिदंवचः उत्तिष्ठोत्तिष्ठकौरव्यजिज्ञासेयंकृतामया वेद्मिसर्वमभिप्रायंतवधर्मसुतस्यच ५४ मयातुरक्षितव्येयंपुरीभरतसत्तम या
वद्राज्ञोहिनीलस्यकुलेवंशधराइति ५५ ईप्सितंतुकरिष्यामिमनसस्तवपांडव ततउत्थायहृष्टात्मापांजलिःशिरसानतः पूजयामासमाद्रेयःपावकंभर
तर्षभ ५७ पावकेविनिवृत्तेतुनीलोराजाभयान्नरः पावकस्याज्ञयाचैवमर्चयामासपार्थिवः ५८ सत्कारेणनरव्याघ्रंसहदेवंयुधांपतिं प्रतिगृह्यचतांपूजां कृ
तेचविनिवेशयच ५९ माद्रीसुतस्ततःप्रायाद्विजयीदक्षिणांदिशं त्रैपुरंसवशेकृत्वाराजानममितौजसं ६० निजग्राहमहाबाहुस्तरसापोरवेश्वरं आकृ
तिंकौशिकाचार्यंयत्नेनमहताततः ६१ वशेचक्रेमहाबाहुःसुराष्ट्राधिपतिंतदा सुराष्ट्रविषयस्थश्चप्रेषयामासरुक्मिणे ६२ राज्ञेभोजकटस्थायमहामात्रा
यधीमते भीष्मकायसधर्मात्मासाक्षादिन्द्रसखायवै ६३ सचास्यप्रतिजग्राहससुतःशासनंतदा प्रीतिपूर्वंमहाराजवासुदेवमवेक्ष्यच ६४ ततःसर
त्नान्यादायपुनःप्रायाद्युधांपतिः ततःशूर्पारकंचैवतालाकटमथापिच ६५ वशेचक्रेमहातेजादंडकांश्चमहाबलः सागरद्वीपवासांश्चनृपतीन्
म्लेच्छयोनिजान् ६६ निषादान्पुरुषादांश्चकर्णप्रावरणानपि येचकालमुखानामनरराक्षसयोनयः ६७ कृत्स्नंकोल्लगिरिंचैवसुरभीपट्टनंत
था द्वीपंताम्राह्वयंचैवपर्वतंरामकंतथा ६८ तिमिंगिलंचसनृपंवशेकृत्वामहामतिः एकपादांश्चपुरुषान्केरलान्वनवासिनः ६९ न
गरींसंजयंतींचपाषंडंकरहाटकं दूतैरेववशेचक्रेकरंचैनानदापयत् ७० पांड्यांश्चद्रविडांश्चैवसहितांश्चोड्रकेरलैः अंध्रांस्तालवनांश्चैव
कलिंगानुष्ट्रकर्णिकान् ७१ आटवींचपुरींरम्यांयवनानांपुरंतथा दूतैरेववशेचक्रेकरंचैनानदापयत् ७२ ततःकच्छगतोधीमान्दू
तान्माद्रवतीसुतः प्रेषयामासराजेंद्रपौलस्त्यायमहात्मने ७३ विभीषणायधर्मात्माप्रीतिपूर्वमरिंदमः सचास्यप्रतिजग्राहशासनंप्रीतिपू
र्वकं तच्चकालकृतंधीमानभ्यमन्यतसप्रभुः ७४

अध्यायः नकुल ३ रोहीतकंगिरिमत्तमयूरसत्तैः क्षत्रियैः ५ १५ पहरांपुटभेदनं १५

ततःसंप्रेषयामासरत्नानिविविधानिच चंदनागुरुकाष्ठानिदिव्यान्याभरणानिच वासांसिचमहार्हाणिमणींश्चैवमहाधनान् मवर्त्ततततोधीमान्सह
देवःप्रतापवान् ७६ एवंनिर्जित्यतरसासांत्वेनविजयेनच करदान्पार्थिवान्कृत्वाप्रत्यागच्छदरिंदमः ७७ धर्मराजायतत्सर्वंनिवेद्यभरतर्षभ कृ
तकर्मासुखंराजन्नुवासजनमेजय ७८ इतिसभापर्वणिसहदेवदिग्विजयः वैशंपायनउवाच नकुलस्यतुवक्ष्यामिकर्माणिविजयंतथा वा
सुदेवजितामाशांयथासावजयत्प्रभुः १ निर्यायखांडवप्रस्थात्प्रतीचीमभितोदिशं उद्दिश्यमतिमान्प्रायान्महत्यासेनयासह २ सिंहनादेन
महतायोधानांगर्जितेनच रथनेमिनिनादैश्चकंपयन्वसुधामिमां ३ ततोबहुधनंरम्यंगवाढ्यंधनधान्यवत् कार्तिकेयस्यदयितंरोहीतकमु
पाद्रवत् ४ तत्रयुद्धंमहच्चासीच्छूरैर्मत्तमयूरकैः मरुभूमिंसकार्त्स्न्येनतथैवबहुधानकं ५ शैरीषकंमहेत्थंचवशेचक्रेमहाद्युतिः आक्रो
शंचैवराजर्षितेनयुद्धमभून्महत् ६ तान्दशार्णान्सजित्वाचप्रतस्थेपांडुनंदनः शिबींस्त्रिगर्त्तानंबष्ठान्मालवान्पंचकर्पटान् ७ तथाम
ध्यमकेयांश्चवाटधानान्द्विजानथ पुनश्चपरिवृत्याथपुष्करारण्यवासिनः ८ गणानुत्सवसंकेतानजयत्पुरुषर्षभः सिंधुकूलाश्रितायेच
ग्रामणीयामहाबलाः ९ शूद्राभीरगणाश्चैवयेचाश्रित्यसरस्वतीम् वर्तयंतिचयेमत्स्यैर्येचपर्वतवासिनः १० कृत्स्नंपंचनदंचैवतथैवाम
रपर्वतं उत्तरज्योतिषंचैवतथादिव्यकटंपुरं ११ द्वारपालंचतरसावशेचक्रेमहाद्युतिः रामठान्हारहूणांश्चप्रतीच्याश्चैवयेनृपाः १२
तान्सर्वान्सवशेचक्रेशासनादेवपांडवः तत्रस्थःप्रेषयामासवासुदेवायभारत १३ सचास्यगतभीराजन्प्रतिजग्राहशासनं ततःशा
कलमभ्येत्यमद्राणांपुटभेदनं १४ मातुलंप्रीतिपूर्वेणशल्यंचक्रेवशेबली सतेनसत्कृतोराज्ञासत्कारार्होविशांपते १५

१७ करभाणांउष्ट्राणां १८ २० दिग्विजयः समाप्तः रक्षणात् शत्रूणांदस्यूनां १ बलीनांकराणांनिकामंयथेष्टंवर्षतीतिनिकामवर्षी स्फीतःसमृद्धः २ सुप्रवृत्ताः स्वस्व परिपाकंहितावहाः नतुक्रूराः राजकर्मणःराज्ञःपुण्यात् ३ दस्युभ्यः चोरेभ्यःवंचकेभ्यःधूर्तेभ्यःराज्ञोराजवल्लभतोवामृषागिरोवानाश्रूयंतसर्वेपिसत्यवादिनः राजवदि

रत्नानिभूरीण्यादायसंप्रतस्थेयुधांपतिः ततः सागरकुक्षिस्थान्म्लेछान्परमदारुणान् १६ पल्हवान्बर्बरांश्चैवकिरातान्यवनाञ्छकान् ततोरत्नान्युपादायवशेकृत्वाचपार्थिवान् न्यवर्तत्तकुरुश्रेष्ठोनकुलश्चित्रमार्गवित् १७ करभाणांसहस्राणिकोशंतस्यमहात्मनः ऊहुर्दशमहाराजकृछ्रादिवमहाधनं १८ इंद्रप्रस्थगतंवीरमभ्येत्यसयुधिष्ठिरं ततोमाद्रीसुतःश्रीमान्धनंतस्मैन्यवेदयत् १९ एवंविजित्यनकुलोदिशंवरुणपालितां प्रतीचींवासुदेवेननिर्जितांभरतर्षभ २० इतिसभापर्वणिराजसूयेदिग्विजयः समाप्तः वैशंपायनउवाच रक्षणाधर्मराजस्यसत्यस्यपरिपालनात् शत्रूणांक्षपणाच्चैवस्वकर्मनिरताःप्रजाः १ बलीनांसम्यगादानात्धर्मतश्चानुशासनात् निकामवर्षीपर्जन्यः स्फीतोजनपदोभवत् २ सर्वारंभाःसुप्रवृत्ताःगोरक्षाकर्षणंवणिक् विशेषात्सर्वमेवैतत्संजज्ञेराजकर्मणा ३ दस्युभ्योवंचकेभ्योवाराजन्प्रतिपरस्परं राजवल्लभतश्चैवनाश्रूयंतमृषागिरः ४ अवर्षंचातिवर्षंचव्याधिपावकमूर्छनं सर्वमेतत्तदानासीद्धर्मनित्येयुधिष्ठिरे ५ प्रियंकर्तुमुपस्थातुंबलिकर्मस्वभावजं अभिहर्तुंनृपाजग्मुर्नान्यैःकार्यैःकथंचन ६ धर्म्यैर्धनागमैस्तस्यववृधेनिचयोमहान् कर्तुंयस्यनशक्येतक्षयोवर्षशतैरपि ७ स्वकोष्ठस्यपरीमाणंकोषस्यचमहीपतिः विज्ञायराजाकौंतेयोयज्ञायैवमनोदधे ८ सुहृदश्चैवयेसर्वेपृथक्चसहिताब्रुवन् यज्ञकालस्तवविभोक्रियतामत्रसांप्रतं ९

र्थः दस्यवोपिपरस्परंनवंचयंतिनाप्यस्मानेवंवंच्यमत्रएतेजानंतःखलाअपिनतत्कर्मकुर्वंतीत्यर्थः ४ मूर्छनंप्रदीपनं ५ जग्मुः राजानंप्रतीतिशेषः नान्यैः जिगीषादिभिः ६ निचयोभांडागारं ७ कोशोधनं कोष्ठंधान्यादितयोः परीमाणं ८ ९

ऋषिर्नारायणः अदृश्यइतिच्छेदः विजानतां विदुषां अदृश्यः अस्मगात्मत्वात् अविजानतां तु कार्यकारणरूपेणादृश्यः तथाच श्रुतिः अविज्ञातं विजानतां विज्ञात
मविजानतां विज्ञातमविजानतामिति १० प्रभवउत्पत्तिस्थानं अप्ययो लयस्थानं ११ प्राकारः प्राकारवद्रक्षकः बलाधिकारे सेनाधिपत्ये १२ उद्धर्षे हर्षमाप्य

धनौघं पुरुषव्याघ्रो बलेन महता वृतः १३ । २

अथैवं स्तुवतामेवं तेषामभ्याययौ हरिः ऋषिः पुराणो वेदात्मा अदृश्यश्चैव विजानतां १० जगतस्तस्थुषां श्रेष्ठः प्रभवश्चाप्ययश्च ह भूतभव्यभवन्नाथः
केशवः केशिसूदनः ११ प्राकारः सर्ववृष्णीनामापत्स्वभयदोऽरिहा बलाधिकारे निक्षिप्य सम्यगानकदुंदुभिं १२ उच्चावचमुपादाय धर्मराजाय
माधवः तं धनौघमपर्यंतं रत्नसागरमक्षयं नादयन्रथघोषेण प्रविवेश पुरोत्तमं १४ पूर्णमापूरयंस्तेषां द्विषच्छोकावहोऽभवत् असूर्यमिव सूर्येण
निवातमिव वायुना कृष्णेन समुपेतेन जहृषे भारतं पुरं १५ तं मुदाभिसमागम्य सत्कृत्य च यथाविधि स पृष्ट्वा कुशलं चैव सुखासीनं युधि
ष्ठिरः १६ धौम्यद्वैपायनमुखैः ऋत्विग्भिः पुरुषर्षभ भीमार्जुनयमैश्चैव सहितः कृष्णमब्रवीत् १७ युधिष्ठिर उवाच त्वत्कृते पृथिवी सर्वा
मद्वशे कृष्ण वर्त्तते धनं च बहु वार्ष्णेय त्वत्प्रसादादुपार्जितं १८ सोऽहमिच्छामि तत्सर्वं विधिवद्देवकीसुत उपयोक्तुं द्विजाग्र्येभ्यो हव्यवाहे च मा
धव १९ तदहं यष्टुमिच्छामि दाशार्ह सहितस्त्वया अनुजैश्च महाबाहो तन्मानुज्ञातुमर्हसि २० तद्दीक्षापय गोविंद त्वमात्मानं महाभुज त्व
य्यीष्टवति दाशार्ह विपाप्मा भविता ह्यहं २१ मां वाप्यभ्यनुजानीहि सहैभिरनुजैर्विभो अनुज्ञातस्त्वया कृष्ण प्राप्नुयां क्रतुमुत्तमं २२ वैशं
पायन उवाच तं कृष्णः प्रत्युवाचेदं बहूक्त्वा गुणविस्तरं त्वमेव राजशार्दूल सम्राडर्हो महाक्रतुं २३ संप्राप्नुहि त्वया प्राप्ते कृतकृत्यास्ततो व
यं यजस्वाभीप्सितं यज्ञं मयि श्रेयस्यवस्थिते नियुंक्ष्व त्वं च मां कृत्ये सर्वं कर्तास्मि ते वचः २४

१५ २० मा मां वा अनुज्ञातुं त्वं दीक्षस्वेति वक्तव्ये आत्मानं दीक्षापयेत्युक्तिः अकर्तुरात्मनो दीक्षणायोगात् औपाधिकमेव प्रतिबिंबचलनमायेनैव तस्य दीक्षापनं ज्ञेयं २१ २३
श्रेयसि कल्याणकरे २४

अधियज्ञान्यज्ञियान्संभारान्आज्यपश्वादीन् ३० ३१ काम्यन्तइतिकामाः इष्टान्नादीनि ३२ ३४ धनंजयानांधनंजयगोत्राणांमध्येश्रेष्ठः सुसामानामआंगिरसः ३५

युधिष्ठिरउवाच सफलः कृष्णसंकल्पः सिद्धिश्चनियताम मम यस्यमेत्वंहृषीकेशयथेप्सितमुपस्थितः २६ वैशंपायनउवाच अनुज्ञातस्तुकृष्णेन पांडवोभ्रातृभिः सह ईजितुंराजसूयेनसाधनान्युपचक्रमे २७ ततस्त्वाज्ञापयामासपांडवोरिनिबर्हणः सहदेवंयुधांश्रेष्ठंमंत्रिणश्चैवसर्वशः २८ अस्मिन्क्रतौयथोक्तानियज्ञांगानिद्विजातिभिः तथोपकरणंसर्वंमंगलानिचसर्वशः २९ अधियज्ञांश्चसंभारान्धौम्योक्तान्क्षिप्रमेवहि समानयंतुपुरुषायथायोगंयथाक्रमं ३० इंद्रसेनोविशोकश्चपूरुश्चार्जुनसारथिः अन्नाद्याहरणेयुक्ताः संतुमत्प्रियकाम्यया ३१ सर्वकामाश्चकार्यंतांरसगंधसमन्विताः मनोरथप्रीतिकराद्विजानांकुरुसत्तम ३२ तद्वाक्यसमकालंचकृतंसर्वमवेदयत् सहदेवोयुधांश्रेष्ठोधर्मराजेयुधिष्ठिरे ३३ ततोद्वैपायनोराजन्नृत्विजः समुपानयत् वेदानिवमहाभागान्साक्षान्मूर्तिमतोद्विजान् ३४ स्वयंब्रह्मत्वमकरोत्तस्यसत्यवतीसुतः धनंजयानामृषभः सुसामासामगोभवत् ३५ याज्ञवल्क्योबभूवाथब्रह्मिष्ठोध्वर्युसत्तमः पैलोहोतावसोः पुत्रोधौम्येनसहितोभवत् ३६ एतेषांपुत्रवर्गाश्चशिष्याश्चभरतर्षभ बभूवुर्होत्रगाः सर्वेवेदवेदांगपारगाः ३७ तेवाचयित्वापुण्याहमूहयित्वाचतंविधिं शास्त्रोक्तंयोजयामासुस्तद्देवयजनंमहत् ३८ तत्रचक्रुरनुज्ञाताः शरणान्युतशिल्पिनः गंधवंतिविशालानिवेश्मानीवदिवौकसां ३९ ततआज्ञापयामाससराजाराजसत्तमः सहदेवंतदासद्योमंत्रिणंपुरुषर्षभः ४० आमंत्रणार्थंदूतांस्त्वंप्रेषयस्वाशुगान्द्रुतं उपश्रुत्यवचोराज्ञः सदूतान्प्राहिणोत्तदा ४१ आमंत्रयध्वंराष्ट्रेषुब्राह्मणान्भूमिपानथ विशश्चमान्याञ्छूद्रांश्चसर्वानानयतेतिच ४२ वैशंपायनउवाच समाज्ञप्तास्ततोदूताः पांडवेयस्यशासनात् आमंत्रयांबभूवुश्चआनयंश्चापरान्द्रुतं तथापरानपिनरानात्मनः शीघ्रगामिनः

३६ होत्रकाः सप्तसंस्थाः ३७ ऊहयित्वाचतंविधिं राजसूयेनयक्ष्येतावत्समवाप्तवानीदृतिसंकल्पादिरूपमूहंकृत्वा देवयजनंयज्ञस्थानं ३८ शरणानिपर्णशालादीन्यगाराणि ४३

५२ रुक्मस्य कांचनस्य शयनानां तूलिकादिसहितानां नानास्थानां ५३ ५६ अध्यायः समाप्तः ४

ततस्ते तु यथाकालं कुंतीपुत्रं युधिष्ठिरं दीक्षयांचक्रिरे विप्रा राजसूयाय भारत ४४ दीक्षितः स तु धर्मात्मा धर्मराजो युधिष्ठिरः जगाम यज्ञायत
नं वृतो विप्रैः सहस्रशः ४५ भ्रातृभिर्ज्ञातिभिश्चैव सुहृद्भिः सचिवैः सह क्षत्रियैश्च मनुष्येंद्रैर्नानादेशसमागतैः ४६ अमात्यैश्च नरश्रेष्ठो धर्मो वि
ग्रहवानिव आजग्मुर्ब्राह्मणास्तत्र विषयेभ्यस्ततस्ततः ४७ सर्वविद्यासु निष्णाता वेदवेदांगपारगाः तेषामावसथांश्चक्रुर्धर्मराजस्य शासनात्
४८ बह्वन्नाच्छादनैर्युक्तान्सगणानां पृथक्पृथक् सर्वर्तुगुणसंपन्नान्शिल्पिनोथ सहस्रशः ४९ तेषु ते न्यवसन्राजन्ब्राह्मणा भृशसत्कृताः
कथयंतः कथा बह्वीः पश्यंतो नटनर्तकान् ५० भुंजतां चैव विप्राणां वदतां च महास्वनः अनिशं श्रूयते तत्र मुदितानां महात्मनां ५१ दीयतां दीयता
मेषां भुज्यतां भुज्यतामिति एवंप्रकाराः संजल्पाः श्रूयंते स्मात्र नित्यशः ५२ गवां शतसहस्राणि शयनानां च भारत रुक्मस्य योषितां चैव धर्मराजः
पृथग्ददौ ५३ प्रावर्ततैवं यज्ञः स पांडवस्य महात्मनः पृथिव्यामेकवीरस्य शक्रस्येव त्रिविष्टपे ५४ ततो युधिष्ठिरो राजा प्रेषयामास पांडवं
नकुलं हास्तिनपुरं भीष्माय पुरुषर्षभ ५५ द्रोणाय धृतराष्ट्राय विदुराय कृपाय च भ्रातृणां चैव सर्वेषां येनुरक्ता युधिष्ठिरे ५६ सभापर्वणि
राजसूये वैशंपायन उवाच स गत्वा हास्तिनपुरं नकुलः समितिंजयः भीष्ममामंत्रयांचक्रे धृतराष्ट्रं च पांडवः १ सत्कृत्यामंत्रितास्तेन त्वा
चार्यप्रमुखास्ततः प्रययुः प्रीतमनसो यज्ञं ब्रह्मपुरःसराः २ संश्रुत्य धर्मराजस्य यज्ञं यज्ञविदस्तदा अन्ये च शतशस्तुष्टैर्मनोभिर्भरत
र्षभ ३ द्रष्टुकामाः सभां चैव धर्मराजं च पांडवं दिग्भ्यः सर्वे समापेतुः क्षत्रियास्तत्र भारत ४

८ यज्ञसेनो द्रुपदः १८ दीर्घिका गृहवापी १९ २० मणिकुट्टिमं मणिबद्धभूमिः २१ २३ आवसथानन्यपश्यन्निति अन्यनुकृष्टेन संबंधः २४ २५ अध्यायः

समुपादाय रत्नानि विविधानि महांति च धृतराष्ट्रश्च भीष्मश्च विदुरश्च महामतिः ५ दुर्योधनपुरोगाश्च भ्रातरः सर्व एव ते गांधारराजः सुबलः शकुनिश्च म
हाबलः ६ अचलो वृषकश्चैव कर्णश्च रथिनां वरः तथा शल्यश्च बलवान् बाह्लिकश्च महाबलः ७ सोमदत्तोऽथ कौरव्यो भूरिर्भूरिश्रवाः शलः अश्व
त्थामा कृपो द्रोणः सैंधवश्च जयद्रथः ८ यज्ञसेनः सपुत्रश्च शाल्वश्च वसुधाधिपः प्राग्ज्योतिषश्च नृपतिर्भगदत्तो महारथः ९ स तु सर्वैः सह
म्लेच्छैः सागरानूपवासिभिः पार्वतीयाश्च राजानो राजा चैव बृहद्बलः १० पौंड्रको वासुदेवश्च वंगः कालिंगकस्तथा आकर्षः कुंतलश्चैव मालवाश्चांध्र
कास्तथा ११ द्राविडाः सिंहलाश्चैव राजा काश्मीरकस्तथा कुंतिभोजो महातेजाः पार्थिवो गौरवाहनः १२ बाह्लिकाश्चापरे शूरा राजानः सर्व एव ते
विराटः सह पुत्राभ्यां मावेल्लश्च महाबलः १३ राजानो राजपुत्राश्च नानाजनपदेश्वराः शिशुपालो महावीर्यः सह पुत्रेण भारत १४ आगच्छ
त् पांडवेयस्य यज्ञं समरदुर्मदः रामश्चैवानिरुद्धश्च कंकश्च सह सारणः १५ गदप्रद्युम्नसांबाश्च चारुदेष्णश्च वीर्यवान् उल्मुको निशठश्चैव
वीरश्चांगावहस्तथा १६ वृष्णयो निखिलाश्चान्ये समाजग्मुर्महारथाः एते चान्ये च बहवो राजानो मध्यदेशजाः १७ आजग्मुः पांडुपुत्रस्य
राजसूयं महाक्रतुं ददुस्तेषामावसथान् धर्मराजस्य शासनात् १८ बहुभक्ष्यान्वितान् राजन् दीर्घिकावृक्षशोभितान् तथा धर्मात्मजः पूजां च
क्रे तेषां महात्मनां १९ सत्कृताश्च यथोद्दिष्टान् जग्मुरावसथान् नृपाः कैलासशिखरप्रख्यान् मनोज्ञान् द्रव्यभूषितान् २० सर्वतः संवृतानुच्चैः प्राका
रैः सुकृतैः सितैः सुवर्णजालसंवीतान् मणिकुट्टिमभूषितान् २१ सुखारोहणसोपानान् महासनपरिच्छदान् स्रग्दामसमवच्छन्नानुत्तमागुरु
गंधिनः २२ हंसेंदुवर्णसदृशानायोजनसुदर्शनान् असंबाधान् समद्वारान् युतानुच्चावचैर्गुणैः २३ बहुधातुनिबद्धांगान् हिमवच्छिखराणि
व विश्रांतास्ते ततोऽपश्यन् भूमिपा भूरिदक्षिणं २४ वृतं सदस्यैर्बहुभिर्धर्मराजं युधिष्ठिरं तत्सदः पार्थिवैः कीर्णं ब्राह्मणैश्च महर्षिभिः भ्राजते
स्म तदा राजन्नाकपृष्ठं यथाऽमरैः २५ इति सभापर्वणि राजसूये

पितामहं १ २ प्रणयंतु प्रकर्षेण आश्रयः प्रापयंतु अभिमंत्रिताः प्रार्थिताः संतः ३ ६ हिरण्यस्य कांचनस्य सुवर्णस्य शोभनवर्णस्य ७ स्वामिवत्स्वीयवदित्यर्थः ८
अर्हणानि उपायनानि ९ सर्वलोकसमावृत्तः सर्वैः उपायनप्रदैर्लोकैः समावृत्तः वेष्टितः पिप्रीषुः प्रीणयितुमिच्छुः १० १२ सविमानाग्रैः उत्तमागतानां देवानां विमा

वैशंपायन उवाच पितामहं गुरूंश्चैव वसुदेवं युधिष्ठिरः अभिवाद्य ततो राजन्निदं वचनमब्रवीत् १ भीष्मं द्रोणं कृपं द्रौणिं दुर्योधनविविंशती अस्मि
न्यज्ञे भवंतो मामनुगृह्णंतु सर्वशः २ इदं वः सुमहच्चैव यदिहास्ति धनं मम प्रणयंतु भवंतो मां यथेष्टमभिमंत्रिताः ३ एवमुक्त्वा स तान्सर्वान्दीक्षि
तः पांडवाग्रजः युयोज स यथायोगमधिकारेष्वनंतरं ४ भक्ष्यभोज्याधिकारेषु दुःशासनमयोजयत् परिग्रहे ब्राह्मणानामश्वत्थामानमुक्तवान्
५ राज्ञां तु प्रतिपूजार्थे संजयं संन्ययोजयत् कृताकृतपरिज्ञाने भीष्मद्रोणौ महामती ६ हिरण्यस्य सुवर्णस्य रत्नानां चान्ववेक्षणे दक्षिणानां चैव
दाने कृपं राजा न्ययोजयत् ७ तथान्यान्पुरुषव्याघ्रांस्तांस्तस्मिंस्तस्मिन्न्ययोजयत् बाह्लीको धृतराष्ट्रश्च सोमदत्तो जयद्रथः नकुलेन समानीताः
स्वामिवत्तत्र रेमिरे ८ क्षत्ता व्ययकरस्त्वासीद्विदुरः सर्वधर्मवित् दुर्योधनस्त्वर्हणानि प्रतिजग्राह सर्वशः ९ चरणक्षालने कृष्णो ब्राह्मणा
नां स्वयं ह्यभूत् सर्वलोकसमावृत्तः पिप्रीषुः फलमुत्तमं १० द्रष्टुकामः सभां चैव धर्मराजं युधिष्ठिरं न कश्चिदाहरत्तत्र सहस्रावरमर्हणं ११
रत्नैश्च बहुभिस्तत्र धर्मराजमवर्धयत् कथं तु मम कौरव्यो रत्नदानैः समाप्नुयात् १२ यज्ञमित्येव राजानः स्पर्धमाना ददुर्धनं भवनैः सविमानाग्रैः
सोदर्कैर्बलसंवृतैः १३ लोकराजविमानैश्च ब्राह्मणावसथैः सह कृतैरावसथैर्दिव्यैर्विमानप्रतिमैस्तथा १४ विचित्रै रत्नवद्भिश्च ऋद्ध्या
परमया युतैः राजभिश्च समावृत्तैरतीव श्रीसमृद्धिभिः अशोभत सदो राजन् कौंतेयस्य महात्मनः १५

नैः सहितानि संलग्नानि अग्र्याणि उपरिभागा येषां तैः १३ लोकराजविमानैः इंद्रादिलोकपालविमानैः लोकराजः स्वर्गो यानत्वे तैर्विमानैः स्वर्गिणामप्याश्चर्यकरैर्यं
यज्ञ इत्यर्थः १४ कौंतेयस्य यज्ञ इति शेषः १५

अद्यानुवर्तरांदेवमित्यादेरध्यायशेषस्य तात्पर्ये सर्वांगसंपूर्णोयंयज्ञ इत्यर्थः षडग्निनाषडृत्त्रयः आरंभणीयः क्षत्रधृतिः व्युष्टिः द्विरात्रः दशपेयः इति १६ रत्नोपहारसंपन्नइत्यत्र र
मत्ररक्षोपहारकर्मणइतिपाठेरक्षसांनाशेसाधुनांकर्मणायुक्तः १६ १७ इडाकर्मविशिष्टैः सूक्तैः शिष्टहविः प्रतिपत्तिकर्मभिः मंत्रशिक्षाविशारदैः मंत्रेषुशिक्षायांहस्तक्रियायांच
विशारदैर्ऋत्विग्भिः १८ १९ सभापर्वणिराजसूयेध्यायः तत्राभिषेचनीयेचब्राह्मणाराजभिः सहेत्यादिकाशिशुपालवधांतादशाध्यायीनानाविधमतभेदोयस्मात्स्वपूर्वकं
कृष्णशिशुपालरूपकेणब्रह्मणोजीवस्यमहाकाशमठाकाशन्यायेनलयंदर्शयति तत्रकथाप्रसंगेनसर्वमेवलम्पोर्थःस्पष्टः अध्यात्मपक्षेतुपरोक्षवन्निरूप्यतयातंदुर्म

सन्दर्भः १

अथावभृथनुगांदेवं सद्भिर्मानो युधिष्ठिरः षडग्निनाथयज्ञेन सोयजद्दक्षिणावता १६ सर्वाञ्जनान्सर्वकामैः समतर्पयत् अन्नवान्बहुभक्ष्यश्च भुक्तवज्जु
नसंवृतः रत्नोपहारसंपन्नो बभूव स समागमः १७ इडाज्यहोमाहुतिभिर्मंत्रशिक्षाविशारदैः तस्मिन्हि ततृपुर्देवास्तते यज्ञे महर्षिभिः १८
यथा देवास्तथा विप्रा दक्षिणान्नमहाधनैः ततृपुः सर्ववर्णाश्च तस्मिन्यज्ञे मुदान्विताः १९ इति सभापर्वणि वैशंपायन उवाच ततोभिषेचनीये
द्विजा ब्राह्मणा राजभिः सह अंतर्वेदीं प्रविविशुः सत्कारार्थं महर्षयः १ नारदप्रमुखास्तस्यामंतर्वेद्यां महात्मनः समासीनाः शुशुभिरे सह राज
र्षिभिस्तदा २ समेता ब्रह्मभवने देवा देवर्षयस्तथा कर्मांतरमुपासंतो जजल्पुरमितौजसः ३ इदमेवं न चाप्येवमेवमेवं न चान्यथा प्रत्यू
चुर्बहवस्तत्र वितंडावादिनो द्विजाः ४ कृशानर्थांस्ततः केचिदकृशांस्तत्र कुर्वते अकृशांश्च कृशांश्चक्रुर्हेतुभिः शास्त्रनिश्चयैः ५ अर्थं मेधा
विनः केचिदनुमानैः प्रपूरितं विचिक्षिपुर्यथा श्येना नभोगतमिवामिषं ६ केचिद्धर्मार्थकुशलाः केचित्तत्र महाव्रताः रेमिरे कथयंतश्च स
र्वभाष्यविदां वराः ७

स्येयमितितदेवप्रकाश्यते १२ अभिषेचनीयेराजसूयांगभूतेसोमयागविशेषे कर्मांतरंमध्येमध्येकर्मविरामकालंउपासंतः उपगच्छंतः प्रो
चुवंतः अप्रगताविततरूपं कर्मच्छिद्रंप्राप्यजल्पकथांचक्रुरित्यर्थः अमितौजसः बहुप्रतिभावंतः ३ एवमेतदितिस्वपक्षस्थापनंनचाप्येवमितिपरपक्षदूषणंएवंप्रति
वादिप्रक्षेपि बहवांकसामान्याः वितंडांस्वपक्षपरपक्षस्थापनाहीनांकथां ४ कृशानयुक्तिशेषांस्तान् अकृशान्युक्तिप्राचस्मात् तत्रविपरीतंकुर्वंतीतिहेतुभिर्नानाविधैस्तर्कैः
५ ६ तत्रेतिपरोक्षस्वरूपरोएवाहृताः नतुशास्त्रतत्त्वेइतिभावः ७

१० अथचिंतांसमापेदइमादित्तयोसवहुमानतइमंतोयंथः नारदस्यपूर्वापरानुसंधानात्क्षत्रस्यसात्तः पतुंपक्रमोजातइतिचिंताचित्तयथास्मृतिर्वाः शाश्वतरणात्माक्रमह्म
सभायांनिश्चितस्यभूभारहरणस्याभूदिमर्थः क्षत्रेक्षत्रियजातोजातः आविर्भूतः १४ १५ नारायणास्यैवशंभुत्वंचतुर्वक्त्रापरपर्यायंभूतभावनत्वंचेतियुक्तं एकस्यैवत्रिमूर्ति
धारित्वात् यदुस्येयदुगृहे १६ १७ महद्भूतंमहाविष्णुः स्वयंभूः अस्मदादिवच्छरीरस्यपारतंत्र्यत्वेनापिभववंनसह्नेइत्यर्थः आरास्यतिआच्छेत्तुमिच्छति पुनरितित्रसकृदे

सा वै दिव्यैः समापन्नैर्देवद्विजमहर्षिभिः आवभासे समाकीर्णा नक्षत्रैर्द्यौरिवामला ८ न तस्यां संनिधौ शूद्रः कश्चिदासीन्न चाव्रती अतस्तेषां तदा राजन्
युधिष्ठिरनिवेशने ९ तां तु लक्ष्मीवतो लक्ष्मीं तदा यज्ञविधानजां तुतोष नारदः पश्यन् धर्मराजस्य धीमतः १० अथ चिंतां समापेदे स मुनिर्मनुजाधिप
नारदस्तु तदा पश्यन् सर्वक्षत्रसमागमं ११ सस्मार च पुरा वृत्तां कथां तां पुरुषर्षभ अंशावतरणे याऽसौ ब्रह्मणो भवनेऽभवत् १२ देवानां संगमं तं तु विज्ञा
य कुरुनंदन नारदः पुंडरीकाक्षं सस्मार मनसा हरिं १३ साक्षात्स विबुधारिघ्नः क्षत्रे नारायणो विभुः प्रतिज्ञां पालयंश्चेमां जातः परपुरंजयः १४
संदिदेश पुरा योऽसौ विबुधान्भूतकृत्स्वयं अन्योन्यमभिनिघ्नंतः पुनर्लोकानवाप्स्यथ १५ इति नारायणः शंभुर्भगवान्जगतः प्रभुः आदिश्य
विबुधान्सर्वानजायत यदुक्षये १६ क्षितावंधकवृष्णीनां वंशे वंशभृतां वरः परया शुशुभे लक्ष्म्या नक्षत्राणामिवोडुराट् १७ यस्य बाहुबलं सेंद्राः सु
राः सर्व उपासते सोऽयं मानुषवन्नाम हरिरास्ते रिमर्दनः १८ अहो बत महद्भूतं स्वयंभूर्यदिदं स्वयं आदास्यति पुनः क्षत्रमेवं बलसमन्वितं १९ इत्येतां ना
रदश्चिंतां चिंतयामास धर्मवित् हरिं नारायणं ज्ञात्वा यज्ञैरीज्यं तमीश्वरं २० तस्मिन्धर्मविदां श्रेष्ठो धर्मराजस्य धीमतः महाध्वरे महाबुद्धिस्तस्थौ स
बहुमानतः २१ ततो भीष्मोऽब्रवीद्राजन्धर्मराजं युधिष्ठिरं क्रियतामर्हणं राज्ञां यथार्हमिति भारत २२ आचार्यमृत्विजं चैव संयुजं च युधिष्ठिर स्ना
तकं च प्रियं प्राहुः षडर्घ्यार्हान्नृपं तथा २३ एतानर्घ्यानभिगतानाहुः संवत्सरोषितान् त इमे कालपूगस्य महतोऽस्मानुपागताः २४ एषामेकैक
शो राजन्नर्घ्यमानीयतामिति अथ चैषां वरिष्ठाय समर्थायोपनीयतां २५

तदनेन कर्म कृतमस्तीति सूचितं १९ २० धर्मविदांश्रेष्ठोनारदः धर्मराजस्ययज्ञेरीज्यं २१ २२ संयुजंसंबंधिनंश्वशुरादिं प्रियंमित्रं २३ २४ एकैकशः प्रत्येकं अथयथा
पिएषांमध्येवरिष्ठायप्रथममितिशेषः २५

२६ बुध्यासुध्यतिजानातिवक्तृतत्तमनयेतिबुद्धिः अवणमननध्यानात्मिकाचेतोवृत्तिः तयानिश्चितमसाक्षात्कृतमा अर्हणीयतमं अर्हणीयाः ब्राह्मणाः देवताप्रसादहे
तुत्वात् अर्हणीयतराः देवाः कामप्रदत्वात् अर्हणीयतमस्त्वात्मासर्वस्मात्प्रियतमत्वात्तथाचश्रुतिः नवाअरेदेवानांकामायदेवाः प्रियाभवंत्यात्मनस्तुकामायदेवाः प्रिया
भवंतीतितदेतत्प्रेयः पुत्रात्प्रेयोवित्तात्प्रेयोन्यस्मात्सर्वस्मादंतरतरंयदयमात्मेतिच श्रुतीसनेनात्मैवकर्ममभूमावर्हणीयः इहचेदवेदीदथसत्यमस्तिनचेदिहावेदीन्महतीविनष्टिरितिकृतेर
मत्रतदलाभात् एवमात्मनोजिज्ञास्यत्वमुक्त्वा तत्स्वरूपमाह एषहीति एषपुरोवर्त्तीअपरोक्षः सूर्यश्चज्योतिषांपदार्थप्रकाशकानांसूर्यचंद्राग्निवागादीनांचंद्राग्निताराहीनांवसमस्ता
नांसमस्तंगतानांस्वप्नावस्थायामग्निवन्मध्ये तत्तपत्राभातीतियोजना अयंभावः नतावदग्निः स्वयंज्योतिः सूर्यकांतादिद्वारासूर्यस्यैवइंधनादेरेतद्रूपेणाद्भूतत्वात् ना

युधिष्ठिर उवाच कस्मिन्भवान्मन्यते धर्म्मं कस्मैकुरुनंदन उपनीयमानं युक्तं च तन्मे ब्रूहि पितामह २६ वैशंपायन उवाच ततो भीष्मः शां
तनवो युधिष्ठिरमितवीर्यवान् वार्ष्णेयं मन्यते कृष्णं पूजनीयतमं भुवि २७ एषह्येषां समस्तानां तेजोबलपराक्रमैः मध्ये तपन्निवाभाति
ज्योतिषामिवभास्करः २८

पिचंद्रतारादितस्यजलमयस्यसूर्यज्योतिषैवभास्वरत्वात् यथायंदृष्टांतएवंचक्षुरादयोपिनस्वशक्त्याप्रकाशकाः किंतुआत्मसत्तानुवेधादेव तथायथाआघभावेपिसूर्यः
इतरनिरपेक्षः प्रकाशयतिएवमात्माचक्षुराद्युपरमेपिस्वप्नेस्वप्रकाशेनैवसर्वंवासनामयंपदार्थजातंप्रकाशयति तस्यभासासर्वमिदंविभातिअत्रायंपुरुषः स्वयंज्योति
रित्यादिश्रुतिभ्यः तेजोबलपराक्रमैः तेजःप्रकाशः बलंतेजोंतराभिभवसामर्थ्यंपराक्रमः निःविशेषेणात्मनोनाशकत्वंचदृष्टांतेतेजआदि दार्ष्टांतिकेतुचित्प्रकाशः
बलंअवाध्यत्वं पराक्रमः सर्वोपादानत्वेनसर्वव्यापकत्वंच कथापक्षेतुतेजः कांतिबलंपराभिभवसामर्थ्यं पराक्रमः संग्रामोद्यमः २८

अस्तर्ष्यमिवेति यथा गाढांधकारस्थं घटादि अस्मल्लकं अप्रकाशमानं च तत्सन्निधानात्स्फूर्तीक्षये चैव भवत्तः एवं अहंकारादेर्घटान्तस्यार्थजातस्य सत्ताप्रकाशो विद्धी नाविवे
तिपूर्वोक्तस्यैव विवरणं एवं तथा निवातवातभूमेः यथार्के निहाद्येधिष्ठमानानां जंतूनां वान एवाल्हादयति एवं अयं स्वरूपानंदेन जगदाल्हादयति एष ह्येवानंदय
ति एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः सोयं यस्य दृशिनृप एवं स न दर्पणेन मुखमिवाविस्पमायया परागदृश्यत्वमिवापादितः पूजनीयः
अन्नादिदेहाद्युपाधिविस्मरणेन लब्धपदं चिन्नमोभ्यायकल्पते तथोक्तं भगवता पतंजलिना बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षय इति

अतर्ष्यमिव तर्ष्येण निर्वातमिव वायुना भासितं ल्हादितं चैव कृष्णेनेदं सदो हि नः २९ तस्मै भीष्माभ्यनुज्ञातः सहदेवः प्रतापवान् उ
पजह्रेथ विधिवद्वार्ष्णेयायार्घ्यमुत्तमं ३० प्रतिजग्राह तत्कृष्णः शास्त्रदृष्टेन कर्मणा शिशुपालस्तु तां पूजां वासुदेवेन च क्षमे ३१ स उ
पालभ्य भीष्मं च धर्मराजं च संसदि अपाक्षिपद्वासुदेवं चेदिराजो महाबलः ३२ इति सभापर्वणि अर्घाभिहरणे शिशुपाल उवाच
नायमर्हति वार्ष्णेयस्तिष्ठत्स्विह महात्मसु महीपतिषु कौरव्य राजवत्पार्थिवार्हणं १

बहिः सूत्रादेः अकल्पितानदेहादिधर्मयेनासंकोचेण महाविदेहेति धारणायानाम २९ ३० अध्यायः कर्तृत्वादिकं कृष्णस्य वास्तवमेव न तु मायिकम् अविद्याकार्यशरीरस्यास्य
कर्मजन्यत्वनियमात् मिथ्याभूतस्यापि गात्वस्यार्थक्रियाकारित्वे मुक्तिरजतादेरपि रजतो चितकटकीभावापन्ने चेत्त अभिसंदधानो जैमिनिमतानुसारी शिशुपालः वर्णा
श्रमवयस्तपोविद्यादिभिरेव पुंसां श्रेष्ठ्यं श्रेष्ठ्यविभागं वदन्मन्यमानो न पांतं साधारणेप न कृष्णस्य महत्वं करोति नायमिति वार्ष्णेयः वृष्णिषूत्पन्नः इति पूर्वोक्तं स्वयंभूत्वं नि
राकृतं तद्धि आत्मनः सर्वसाधारणं देहस्य तु अस्मदादिवद्देवकीजातत्वादुर्वचमिति भावः १

२ अपास्य पत्नदंष्ट्रिपतवान् आपगेयो भीष्मः ३ ४ ननु अस्मदादिवज्ज्ञातो ऽराजापि वृद्धत्वादिना हेतुना अस्य कृष्णस्य इत्याशंक्य विकल्पयति अथवा मन्यसे इत्यादिना
२० अप्राप्तलक्षणं राजचिह्नं छत्रचामरादि यस्य अप्राप्तलक्षणः अप्राप्यत्वे च द्वितीयेति समासः तस्मात् अप्राप्तलक्षणात् वक्तृत्वात् पितृत्वात् दशांश संगति मात्र

नायं युक्तः समाचारः पांडवेषु महात्मसु यत्कामात् पुंडरीकाक्षं पांडवार्चितवानसि २ बाला यूयं न जानीध्वं धर्मः सूक्ष्मो हि पांडवाः अयं च स्मृ
तिक्रांतो ह्यापगेयो ल्पदर्शनः ३ त्वादृशो धर्मयुक्तो हि कुर्वाणः प्रियकाम्यया भवत्यभ्यधिकं भीष्मो लोकेष्ववमतः सतां ४ कथं ह्यराजा दाशा
र्हो मध्ये सर्वमहीक्षितां अर्हणामर्हति तथा यथा युष्माभिरर्चितः ५ अथवा मन्यसे कृष्णं स्थविरं कुरुपुंगव वसुदेवे स्थिते वृद्धे कथमर्हति तत्सु
तः ६ अथवा वासुदेवोपि प्रियकामोनुवृत्तवान् द्रुपदे तिष्ठति कथं माधवोर्हति पूजनं ७ आचार्यं मन्यसे कृष्णमथवा कुरुनंदन द्रोणे ति
ष्ठति वार्ष्णेयं कस्मादर्चितवानसि ८ ऋत्विजं मन्यसे कृष्णमथवा कुरुनंदनं द्वैपायने स्थिते वृद्धे कथं कृष्णोर्चितस्त्वया ९ भीष्मे शांतनवे राजे
स्थिते पुरुषसत्तमे स्वछंदमृत्युके राजन् कथं कृष्णोर्चितस्त्वया १० अश्वत्थाम्नि स्थिते वीरे सर्वशास्त्रविशारदे कथं कृष्णस्त्वया राजन्नर्चितः कुरु
नंदनं ११ दुर्योधने च राजेंद्रे स्थिते पुरुषसत्तमे कृपे च भारताचार्ये कथं कृष्णस्त्वयार्चितः १२ द्रुमं किंपुरुषाचार्यमतिक्रम्य तथार्चितः भीष्म
के चैव दुर्द्धर्षे पांडुवत्कृतलक्षणे १३ नृपे च रुक्मिणि श्रेष्ठे एकलव्ये तथैव च शल्ये मद्राधिपे चैव कथं कृष्णस्त्वयार्चितः १४ अयं च सर्वराज्ञां
वै बलश्लाघी महाबलः जामदग्न्यस्य दयितः शिष्यो विप्रस्य भारत १५ येनात्मबलमाश्रित्य राजानो युधि निर्जिताः तं च कर्णमतिक्रम्य क
थं कृष्णस्त्वयार्चितः १६ नैव र्त्विङ्न चाचार्यो न राजा मधुसूदनः अर्चितश्च कुरुश्रेष्ठ किमन्यत्प्रियकाम्यया १७ अथवाभ्यर्चनीयोयं यु
ष्माकं मधुसूदनः किं राजभिरिहानीतैरवमानाय भारत १८ वयं तु न भयादस्य कौंतेयस्य महात्मनः प्रयच्छामः करान् सर्वे न लोभान्न च
सांत्वनात् १९ अस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः करानस्मै प्रयच्छामः सोयमस्मान्न मन्यते २० किमन्यदवमानाद्धि यदेनं
॥ राजसंसदि अप्राप्तलक्षणं कृष्णमर्घेणार्चितवानसि २१

तात् अलक्षणामर्त्यंस्म इत्यादि कर्णेरीति वाक्यविवेचनायास्तात्पर्यं २१

२२ धर्मच्युतत्वमेवाह योयमिति राजानंकंसं २३ २६ अयुक्तामिति आत्मनः अयुक्तां पूजां अद्वैतेन पूज्यपूजकभावेन भेदस्यायोगात् तथापि हविर्विघसोनिः स्वदं लेशं प्राशितुं द्वैपदीशाकशेषवत् प्राशनायप्राप्य हविर्बुद्ध्याश्वन्मायया भेदमारूढोपक्लृप्तत्वाज्जातदेववद्भुमन्यसे निर्जने निर्मनुष्ये अन्तरिक्षं श्वसतीति श्वा वायुः मातरिश्वा सदागति रितिकोशः मातर्यन्तरिक्षे श्वसतीति यास्कः इति सरस्वत्याः पयः कथापक्षे तु स्पष्ट एवार्थः २७ पलंभंते अवलंबंते २८ २९ अध्यायः १ अधर्मश्चैति वैदेकगा

अकस्मात् धर्मपुत्रस्य धर्मात्मेति शापशोगतं कोहि धर्मच्युते पूजामेवंयुक्तां नियोजयेत् २३ योयं वृष्णिकुले जातो राजानं हतवान् पुरा जरासंधं महात्मा नमर्मोयेन दुरात्मवान् २३ अयधर्मात्मतां चैव व्यपकृष्य युधिष्ठिरात् दर्शितं कृपणत्वं च कृष्णेर्घस्य निवेदनात् २४ यदि भीतास्तु कौंतेयाः कृप णाश्च तपस्विनः ननु त्वयापि बोद्धव्यं यां पूजां माधवार्हसि २५ अथवा कृपणैरेतामुपनीतां जनार्दन पूजामनर्हः कस्मात्त्वमभ्यनुज्ञातवानसि २६ अयुक्तामात्मनः पूजां त्वं पुनर्बहुमन्यसे हविषः प्राप्यनिस्यंदं प्राशिता श्वेव निर्जने २७ नत्वयं पार्थिवेंद्राणामपमानैः प्रयुज्यते त्वामेव कुरवो व्यक्तं प्रलंभंते जनार्दन २८ क्लीबे दारक्रियायाद्वगंधे वारूपदर्शनं अराज्ञो राजवत् पूजा तथा ते मधुसूदन २९ दृष्टो युधिष्ठिरो राजा दृष्टो भी ष्मश्च यादृशः वासुदेवोप्ययं दृष्टः सर्वमेतद्यथातथं ३० इत्युक्ता शिशुपालस्तानुत्थाय परमासनात् निर्ययौ सहितो राजभिस्त दा ३१ इति सभापर्वणि अर्घ्याभिहरणे वैशंपायन उवाच ततो युधिष्ठिरो राजा शिशुपालमुपाद्रवत् उवाच चैनं मधुरं सांत्वपूर्वमिदं व चः १ नेदं युक्तं महीपाल यादृशं वै त्वमुक्तवान् अधर्मश्च परो राजन्पारुष्यं च निरर्थकं २

मापरदेवताकस्मोनत तर्कगम्यात्तर्कबलेन तु नांपस्याच क्षाराणस्वशाकत्वसेवततया धर्मो महान् भवतीत्यर्थः यतः पारुष्यं च निरर्थकं पत्नूषिपर्वाणि त्वं ज्ञः मेदइतियावत् पन्नूपेव पारुष्यं स्वार्थे ष्यञ् तन्निरर्थकं स्वभगजवदर्थशून्यमाभासमात्रं पौरुषं चेति पाठे पुरुषधर्मः कर्तृत्वादिः पौरुषं तदपि मुक्तिसमाध्यादौ व्यसगात्मनि स्वप्रदर्शना तराज्यरगादिवदाभासमात्रं तत्राधिष्ठानभूतं आत्मवस्तु कूटस्थ एव निरधिष्ठानकभ्रमायोगात् २